


परम पूज्य तपश्चर्या–चक्रवर्ती पट्टाधीशाचार्यश्री

# सुविधिसागर जी महाराज

के

50 वें जन्मदिवस के पावन अवसर पर

सुविधि–परिवार के द्वारा आयोजित

## जिनवाणी-महोत्सव

# सहस्रग्रन्थसंग्रह

* जन्मदिवस 19–03–1971 * मुनिदीक्षा–11–05–1989 * आचार्यपद– 20–06–2004

पट्टाधीशपद– 24–12–2010 (20–06–2004 को की गई उद्घोषणा के अनुसार)

परम पूज्य आचार्यश्री सन्मतिसागर जी महाराज के द्वारा की गई उद्घोषणाः–

हमारी समाधि के पश्चात् आपको इस संघ के संचालकपद पर नियुक्त करते हैं।


(अंकलीकर वाणी–जुलाई 2004) (अक्षयज्योति–अक्तूबर 2004)

# स्तोत्रादि संग्रह

सम्पादक
परम पूज्य मुनिश्री अजितसागर जी महाराज

प्रकाशक
श्री शिवसागर दिगम्बर जैन ग्रन्थमाला श्री महावीर जी (राजस्थान)

(परम्परानायक)




परम पूज्य चारित्र–चक्रवर्ती,
आचार्यश्री आदिसागर जी महाराज
(अंकलीकर)

(द्वितीय पट्टाधीश)



परम पूज्य तीर्थभक्त–शिरोमणि,
आचार्यश्री महावीरकीर्ति जी महाराज

(तृतीय पट्टाधीश)



परम पूज्य सिद्धान्त–चक्रवर्ती,
आचार्यश्री सन्मतिसागर जी महाराज

(चतुर्थ पट्टाधीश)



परम पूज्य तपश्चर्या–चक्रवर्ती, आचार्यश्री सुविधिसागर जी महाराज

दिगम्बर साधु निरन्तर पगविहार करते रहते हैं। ग्रन्थभण्डार को साथ में रख कर विहार करना अशक्यप्राय: होता है। फलत: उनको ग्रन्थों के सन्दर्भ देखने में असुविधा होती है। उनकी सुविधा के लिये इस कोश का निर्माण किया गया है। इस कोश के निर्माण में किसी भी प्रकार का व्यापारिक हेतु नहीं है।

आर्थिक दृष्टि से सम्पन्न श्रावकबन्धुओं से निवेदन है कि वे ग्रन्थ का विक्रय कर अध्ययन करने की परम्परा को कायम रखें।

मुखपृष्ठ पर हमने ग्रन्थकर्त्ता, अनुवादक, सम्पादक, प्रकाशक आदि के नाम दिये हैं। किसी संस्थान का कर्तुत्व हमने लुप्त नहीं किया है।

इस कोश के लिये आवश्यक ग्रन्थ हमें अनेक स्रोतों से प्राप्त हुये हैं। हम उन सभी का आभार मानते हैं।

सुविधि–परिवार

श्री शिवसागर दि० जैन ग्रन्थमाला पुष्प संख्या २१

ॐ

# स्तोत्रादिसंग्रह:

सम्पादक

परमपूज्य १०८ मुनि श्री अजितसागरजी महाराज

प्रकाशक

दशमप्रतिमाधारी ब्र० लाडमल जैन

श्री शिवसागर दिगम्बर जैन ग्रन्थमाला

शान्तिवीरनगर, श्रीमहावीरजी (राज०)

# स्तोत्रादिसंग्रहस्य विषयसूची

—卐—


| क्रमाङ्क | विषयनाम | पृष्ठाङ्क |
|---|---|---|
| १ | मङ्गलाचरणम् | १-५ |
| २ | सरस्वतीस्तुतिः | ६-७ |
| ३ | सरस्वती स्तोत्रम् | ८-१० |
| ४ | श्रीशारदा स्तोत्रम् | ११-१३ |
| ५ | अष्टोत्तरशतनाम | १४-१५ |
| ६ | भगवत्सहस्रनाम | १६-२१ |
| ७ | जिनसहस्रनाम | २२-३६ |
| ८ | बृहत्सुप्रभातस्तोत्रम् | ३७-४१ |
| ९ | लघुसुप्रभातस्तोत्रम् | ४२-४३ |
| १० | सुप्रभाताष्टकम् | ४४- |
| ११ | दर्शनपाठः | ४५-४६ |
| १२ | दर्शनपाठः | ४७ |
| १३ | दर्शनपाठः | ४८-५२ |
| १४ | दर्शनपाठः | ५३-५४ |
| १५ | पञ्चपरमेष्ठिस्तवनम् | ५५ |
| १६ | अर्हत्स्तुतिः | ५६ |
| १७ | अर्हत्स्तुतिः | ५८-६१ |
| १८ | भोगनिन्दा | ६२-६६ |
| १९ | चतुर्विंशतिस्तुतिः | ६७-७१ |
| २० | चतुर्विंशतिस्तवनम् | ७२-७५ |
| २१ | श्रीआदिनाथस्तोत्रम् | ७६-७९ |

| क्रमाङ्क | विषयनाम | पृष्ठाङ्क |
|---|---|---|
| २२ | गुरुदेवाष्टकम् | ८०-८१ |
| २३ | शान्तिस्तवनम् | ८२ |
| २४ | चतुर्विंशतिस्तवनम् | ८३-८६ |
| २५ | शान्तिनाथस्तोत्रम् | ८७-८८ |
| २६ | श्रीपार्श्वनाथस्तोत्रम् | ८९-९३ |
| २७ | चिन्तामणि पार्श्वनाथ | ९४-९५ |
| २८ | श्रीपार्श्वनाथ स्तोत्रम् | ९६ |
| २९ | श्रीपार्श्वनाथ स्तोत्रम् | ९७-९८ |
| ३० | श्रीगौतमस्तोत्रम् | ९९ |
| ३१ | श्रीमहावीरस्तोत्रम् | १०० |
| ३२ | वीरस्तवनम् | १०१-१०२ |
| ३३ | बाहुबल्यष्टकम् | १०३ |
| ३४ | श्रीबाहुबलिस्तोत्रम् | १०५-१०६ |
| ३५ | वीतरागस्तोत्रम् | १०७-१०८ |
| ३६ | वीतरागस्तोत्रम् | १०९-११० |
| ३७ | श्रीवीतरागस्तोत्रम् | १११ |
| ३८ | आत्मभावनाष्टकम् | ११२-११३ |
| ३९ | उपयोगाष्टकम् | ११४ |
| ४० | अध्यात्माष्टकम् | ११५-११६ |
| ४१ | प्रष्टकस्तोत्रम् | ११७ |
| ४२ | नवदेवतास्तोत्रम् | ११८-१२० |
| ४३ | चैत्यवन्दना | १२१-१२२ |
| ४४ | देववन्दनाप्रयोगविधिः | १२३ |
| ४५ | चैत्यभक्तिः | १२७-१३२ |
| ४६ | पच्चगुरु भक्तिः | १३३ |

| क्रमाङ्क | विषयनाम | पृष्ठाङ्क |
|---|---|---|
| ४७ | समाधिभक्तिः | १३४-१३६ |
| ४८ | ध्यानोपदेशकोषः | १३७-१५२ |
| ४९ | ध्यानसारः | १५३-१७१ |
| ५० | अध्यात्मरहस्यम् | १७२-१८० |
| ५१ | अर्हद्भक्तिः | १८१-१८२ |
| ५२ | अर्हद्भक्तिः | १८३-१८४ |
| ५३ | हार्दिकभावना | १८५ |
| ५४ | अर्हत्स्तुतिः | १८६-१८७ |
| ५५ | सिद्धभक्तिः | १८८-१८९ |
| ५६ | सिद्धभक्तिः | १९०-१९१ |
| ५७ | दर्शनभक्तिः | १९२ |
| ५८ | ज्ञानभक्तिः | १९३ |
| ५९ | चारित्रभक्तिः | १९३ |
| ६० | योगिभक्तिः | १९४ |
| ६१ | द्वितीययोगिभक्तिः | १९५ |
| ६२ | पञ्चपरमेष्ठिभक्तिः | १९६ |
| ६३ | पञ्चगुरुभक्तिः | १९७ |
| ६४ | पञ्चगुरुभक्तिः | १९८ |
| ६५ | शान्तिभक्तिः | १९८ |
| ६६ | वर्द्धमाननिर्वाणभक्तिः | १९९ |
| ६७ | महावीरस्तवनम् | २०१ |
| ६८ | दर्शनभक्तिः | २०४ |
| ६९ | ज्ञानभक्तिः | २०४ |
| ७० | चारित्रभक्तिः | २०५ |
| ७१ | मृत्युमहोत्सवः | २०७ |

| क्रमाङ्क | विषयनाम | पृष्ठाङ्क |
| --- | --- | --- |
| ७२ | संस्तारारोहणनक्षत्रफलम् | २०९ |
| ७३ | दीक्षानक्षत्रफलम् | २१३ |
| ७४ | गुरुस्तोत्रम् | २१७ |
| ७५ | मङ्गलाष्टकम् | २१९-२२० |
| ७६ | स्वरूपसम्बोधनम् | २२१-२२३ |
| ७७ | इष्टोपदेशः | २२४-२२८ |
| ७८ | समाधिशतकम् | २२९-२३९ |
| ७९ | सज्जनचित्तवल्लभम् | २४०-२४४ |
| ८० | प्रश्नोत्तररत्नमालिका | २४५-२४७ |
| ८१ | अपरा प्रश्नोत्तररत्न मालिका | २४८-२४९ |
| ८२ | ज्ञानाङ्कुशस्तोत्रम् | २५०-२५३ |
| ८३ | वैराग्यमणिमाला | २५४-२५९ |
| ८४ | द्वादशानुप्रेक्षा | २६० |
| ८५ | द्वादशानुप्रेक्षा | २६४-२६९ |
| ८६ | द्वादशानुप्रेक्षा | २७० |
| ८७ | द्वादशानुप्रेक्षा | २८१-२८५ |
| ८८ | द्वाविंशति परीषहाः | २८६-२९२ |
| ८९ | द्वाविंशति परीषहाः | २९३-२९६ |
| ९० | धर्मकुसुमोद्यानम् | २९७-३१० |
| ९१ | गृहवासनिन्दा | ३११ |
| ९२ | महावीरस्तवनम् | ३१२-३१६ |
| ९३ | साम्यप्रकरणम् | ३१७-३१८ |
| ९४ | सल्लेखनाप्रकरणम् | ३१९-३२० |

# 卐 शुद्धि पत्र 卐

| पृष्ठ संख्या | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २ | २ | अविभाविनो | अविनाभाविनो |
| २ | ३ | अरहन्त: | अर्हन्त: |
| २ | २२ | यैस् | ये |
| १३ | १९ | देवेश्वारा | देवेश्वरा |
| १४ | ३ | स्वयम्भू। | स्वयम्भो |
| १८ | १७ | अचिन्त | अचिन्त्य |
| २३ | १ | जिनधिराजो | जिनाधिराजो |
| २७ | १३ | अवर्णगि: | अवर्णगी: |
| २७ | १६ | तर्थकृत्वगो | तीर्थकृत्स्वगी: |
| २९ | १३ | अप्रतिघो | अप्रतिघो |
| ३३ | ७ | अनादिघनो | अनादिनिधनो |
| ३५ | १५ | संलेश्य | सलस्व |
| ४० | १० | संविहित।पत्र | संविहितातपत्र |
| ४१ | ७ | नष्ठारिवर्ग | नष्टारिवर्ग |
| ५३ | ३ | मिदुरा | भिदुरा |
| ५५ | ४ | हाम्यमर्हत | हाम्यहमर्हत |
| ६० | ७ | दोषयती | दूषोषयती |

| पृष्ठ संख्या | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ६० | १३ | नोपरोद्धमलं | नोपरोद्धुमलं |
| ६४ | १ | श्लाद्यमानः | श्लाघ्यमानः |
| ६५ | ११ | [illegible] | [illegible] |
| ६५ | १९ | सम्फुलल्ल | सम्फुल्ल |
| ७२ | ९ | निलम्पपति | निलिम्पपति |
| ९० | १० | मध्यस्तु | मध्यस्थतु |
| ९२ | १७ | मावम्बतां | मालम्बतां |
| ९३ | १ | हृपीकसौख्यं | हृषीकसौख्यं |
| ९३ | २ | मुक्त्या | मुक्त्वा |
| ९५ | १८ | दुरिते | दुरिते |
| १०४ | १३ | यदीयाङ्घ्रिलग्नं | यदीयाङ्घ्रिलग्नं |
| १०६ | १९ | श्याम | श्यामि |
| १११ | ८ | भवनेन्द्र | भुवनेन्द्र |
| १११ | १८ | महुन्तं | महान्तम् |
| ११४ | ६ | मपद्यन | मपद्यन |
| ११७ | २ | भजोऽहम् | भजेऽहम् |
| ११७ | ८ | मानकीना | मामकीना |
| ११८ | ३ | धर्मक्षिमादि | धर्मःक्षमादि |
| १२४ | १० | उत्त | उत्तर |
| ११४ | २२ | विभ्रावर्त्त | विभ्रावर्त्त |
| ११२ | ६ | जिणचेयाणि | जिणचेइयाणि |

| पृष्ठ संख्या | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १४० | १ | इहृता: | इहृत |
| १४७ | ६ | अश्वाश्वतम् | अशाश्वतम् |
| १४८ | ९ | क्रिमि | कृमि |
| १५४ | १५ | तचेवा | तदेवा |
| १६४ | १७ | कुलोद्यमा। | कुलोद्यमा। |
| १७४ | ५ | मोर्गो | मार्गो |
| १८५ | ४ | यापाम् | यायाम् |
| १८७ | १४ | छेन्ने | छेत्ते |
| १९० | १ | यच्छिक्ति | यच्छक्तिः |
| १९८ | १० | दूरित | दुरित |
| २०४ | १६ | सूक्ष्मेकमू | सूक्ष्ममेकम् |
| २१८ | २ | -रंधि | -रंध्रि |
| २१९ | १० | मातृगृहे | मातुर्गृहे |
| २४१ | २० | कथ | कथम् |
| २४२ | २० | दारिद्रोप- | दारिद्र्योप |
| २४४ | १२ | भंक्तु | भङ्क्तुम् |
| २४८ | १ | कार्यण्यम् | कार्पण्यम् |
| २४८ | २ | सहि गुत्वं | सहिष्णुत्वं |
| २४८ | ५ | वाक्य | वाक् |
| २४८ | १३ | प्रलम | प्रलप |
| २५० | ८ | भवाक्षयं | भवक्षयं |

| पृष्ठ संख्या | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २५७ | ५ | मलिखम् | मखिलम् |
| २६१ | १७ | स्फुर्जम् | स्फुर्जाम् |
| २६३ | २० | द्वोषोव | दोषोव |
| २६५ | १० | नित्यं मद्य | नित्यमद्य |
| २६८ | १२ | गोरचरा | गोचरा |
| २७० | ९ | संसारेमेन | संसारमेन |
| २९२ | १२ | वृद्धो | वृद्धौ |
| २९३ | १६ | पराङ्न् | पराङ् |
| २९४ | ८ | रावकुल | रविकुल |
| २९४ | १ | संशया | सहाया |
| २९७ | २० | निदधामि | विदधामि |
| २९८ | ३ | मुद्धत्य | मुद्धृत्य |
| २९८ | १८ | खङ्गः | खड्गः |
| २९९ | ७ | उश्वपल | उच्चाल |
| २९९ | १० | सङ्घम् | सङ्घम् |
| २९९ | ८ | लङ्कार | लङ्कार |
| २९९ | १९ | पुरुष | पूरुष |
| ३०१ | १ | रावर्त्ती | रावर्त्ती |
| ३०१ | २ | तहि भवि | तर्हि |
| ३०१ | ५ | सुपरिते | सुपरित |
| ३०१ | ६ | भियेव | भियेवा |

| पृष्ठ संख्या | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ३०२ | ९ | विरता | द्विरता |
| ३०२ | १४ | सहस्र | सहस्राचो |
| ३०४ | २ | व्यहार | व्यवहार |
| ३०४ | ६ | सदभावा: | सद्भाव: |
| ३०५ | ४ | राधक | रोधक |
| ३०६ | १३ | वैं | नहीं चाहिए |
| ३०७ | ११ | सूर्या | सूषी |
| ३०७ | १६ | प्रचक्षते | प्रचक्ष्यते |
| ३०७ | १७ | ह्यान्यस्य | ह्यानस्य |
| ३०७ | २० | सलिलस्य | विलरति सलिलस्य |
| ३०८ | २ | तरङ्गै। | तरङ्गै: |
| ३०८ | ५ | श्रयेच | श्रयेन |
| ३०८ | ७ | मुक्तञ्ज | मुक्तञ्ज |
| ३०८ | २१ | विह्वायता | विह्वीता |
| ३०९ | ८ | भवेत् | भवे |
| ३०९ | १२ | तद्वयं | न तद्वयं |
| ३०९ | १२ | न | स |
| ३०९ | १३ | तरवर: | तरव: |
| ३१० | २ | समुज्झित्वा | समुज्झित्य |
| ३१० | ८ | भिद्यानत। | भिद्यावत: |
| ३१० | ११ | अहि | ह्य |

| पृष्ठ संख्या | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| २१२ | ९ | मोहरह्लिना | मोहमह्लिना |
| २१३ | ३ | विजितेन्द्व | विजितेन्दु |
| २१४ | १६ | जयति | जमति |
| २१५ | ८ | ससुरः | सुसुरः |
| २१९ | १९ | खरवरं | खरं |

# स्तोत्रादिसंग्रहः

## अथ मङ्गलाचरणम्

# णमो अरहंताणं णमो सिद्धाणं णमो आइरियाणं णमो उवज्झायाणं णमो लोए सव्वसाहूणं

### अर्हद्गुणानाह—

णमो अरहंताणं—अरिहननादरहन्तः। नरकतिर्यक्कुमानुष्यप्रेतावासगताशेषदुःखप्राप्तिनिमित्तत्वादरिर्मोहः। तथा च शेषकर्मव्यापारो वैफल्यमुपेयादिति चेन्न, शेषकर्मणां मोहतन्त्रत्वात्। न हि मोहमन्तरेण शेषकर्माणि स्वकार्यनिष्पत्तौ व्यापृतान्युपलभ्यन्ते येन तेषां स्वातन्त्र्यं जायेत। मोहे विनष्टेऽपि कियन्तमपि कालं शेषकर्मणां सत्त्वोपलम्भान्न तेषां तत्तन्त्रत्वमिति चेन्न, विनष्टेऽरौ जन्ममरणप्रबन्धलक्षणसंसारोत्पादनसामर्थ्यमन्तरेण तत् सत्त्वस्यासत्त्वसमानत्वात्, केवलज्ञानाद्यशेषात्मगुणाविर्भावप्रतिबन्धनप्रत्ययसमर्थत्वाच्च। तस्यारेर्हननादरहन्तः।

रजोहननाद्वा अरहन्तः, ज्ञानदृगावरणानि रजांसीव बहिरङ्गान्तरङ्गाशेषत्रिकालगोचरानन्तार्थव्यञ्जनपरिणामात्मकवस्तुविषयबोधानुभवप्रतिबन्धकत्वाद् रजांसि। मोहोऽपि रजः भस्मरजसा पूरिताननानामिव भूयो मोहावरुद्धात्मनां जिह्मभावोपलम्भात्। किमिति त्रितयस्यैव विनाश उपदिश्यत इति चेन्न एतद् विनाशस्य शेषकर्मविनाशाविनाभावित्वात् तेषां हननादरहन्तः।

रहस्याभावाद्वा अरहन्तः, रहस्यमन्तरायः तस्य शेषघातित्रितयविनाशाविनाभाविनो भ्रष्टबीजवदंकुरशक्तिहीनबीजवदित्यर्थः, निःशक्तीकृताघातिकर्मणो हननादरहन्तः ।

अतिशयपूजार्हत्वाद् वा अरहन्तः, स्वर्गावतरणजन्माभिषेकपरिनिष्क्रमणकेवलज्ञानोत्पत्तिपरिनिर्वाणेषु देवकृतानां पूजानां देवासुरमानवप्राप्तपूजाभ्योऽधिकत्वादतिशयानामर्हत्वाद् योग्यत्वादरहन्तः ।

आविर्भूतानन्तज्ञानदर्शनसुखवीर्यविरतिक्षायिकसम्यक्त्वदानलाभभोगोपभोगाद्यनन्तगुणत्वादिहैवात्मसात्कृतसिद्धस्वरूपाः स्फटिकमणिमहीधरगर्भोद्भूतादित्यबिम्बवद् देदीप्यमानाः, स्वशरीरपरिमाणा अपि ज्ञानेन व्याप्तविश्वरूपाः, स्वस्थिताशेषप्रमेयत्वतः प्राप्तविश्वरूपाः निर्गताशेषामयत्वतो निरामयाः, विगताशेषपापाञ्जनपुञ्जत्वेन निरञ्जना दोषकलातीतत्वतो निष्कलाः, तेभ्योऽर्हद्भ्यो नमः नमस्कारः । ८

तथा चोक्तं — दिव्यौदारिकदेहस्थो धौतघातिचतुष्टयः ।
ज्ञानदृग्वीर्यसौख्याढ्यः सोऽर्हन् धर्मोपदेशकः ॥

## सिद्धगुणानाह

णमो सिद्धाणं—सिद्धाः, निष्ठिताः, कृतकृत्याः, सिद्धसाध्याः, नष्टाष्टकर्माणः । अथवा सितं प्रभूतकालेन बद्धं अष्टप्रकारं कर्म शुक्लध्यानाग्निना ध्मातं भस्मीकृतं यैस्ते सिद्धाः इति निरुक्तिः । सितं बद्धं अष्टप्रकारं कर्मेन्धनं ध्मातं दग्धं जाज्वल्यमान शुक्लध्यानानलेन यैस्ते सिद्धाः । अथवा अपुनरावृत्त्या निर्वृतिपुरीमगच्छन् स्म इति सिद्धाः ।

यद्वा— सिद्धगतिनामधेयं स्थानं प्राप्ताः यैस्ते सिद्धाः ।

उक्तं च—ध्याने स्थितं येन पुराणकर्म संध्या गतो निर्वृतिसौधमूर्ध्नि ।
ख्यातोऽनुशास्ता परिनिष्ठितार्थो यः सोऽस्तु सिद्धः कृतमङ्गलो मे ॥

तेभ्यः सिद्धेभ्यो नमो नमस्कारः ।

## आचार्यगुणानाह—

णमो आइरियाणं—पञ्चधाचारं स्वयमाचरन्ति शिष्यानाचारयन्ति इति आचार्याः । मुक्ताहारपयोधरनिशाकरवासराधीश्वरकल्पमहीरुहादय इव प्रत्युपकारनिरपेक्षपरोपकाराः, सुरभूधरवद्धीराः, सर्वशास्त्रपारदृश्वानः स्वयं श्रेयःपथे स्थिताः, विनीतविनेयांस्तत्र स्थापयन्तः, शुद्धदेशकुलजातयो, विनयसिद्धा, मानममोविभो विगतभयरागद्वेषमोहाः, आयतातिधवलज्ञान पृथुलदर्शनपक्ष्मलेक्षणाः शल्यव्यपेतास्तपसि तेजसि, यशसि, तरसि, वचसि च निरौपम्या इति ।

चतुर्दशविद्यास्थानपारगाः, एकादशाङ्गधराः, आचाराङ्गधरा वा तात्कालिकस्वसमयपरसमयपारगा वा । मेरुरिव निश्चलाः क्षितिरिव सहिष्णवः, सागर इव बहिःक्षिप्तमलाः, तेभ्यः आचार्येभ्यो नमः नमस्कारः ।

## उपाध्यायगुणानाह

उपेत्य विनयेन ढौकित्वाऽधीयते श्रुतमेतेभ्य इति उपाध्यायाः, इति निरुक्तेः प्रबुद्धजिनागमार्थयाथातथ्याः, सुचरितचूडामणयः, षट्तर्कीसुरस्रोतस्विनीनदीणमतयो, निरस्तनिद्रातन्द्राप्रमादाः, सुमेधसः, सुशीलाः शिष्यमेधानुरूपव्याख्यानाः, चतुर्दशविद्यास्थानव्याख्यातारः, तात्कालिकप्रवचनव्याख्यातारः, संग्रहानुग्रहादिगुणहीनाः, तेभ्य उपाध्यायेभ्यो नमः नमस्कारः ।

## साधुगुणानाह

णमो लोए सव्वसाहूणं — उत्त्रोटितप्रियवचनमुखरदुर्भेदबन्धुसमिति-शृङ्खला:, दुस्तरतरसंसारावर्तचिरपरिभ्रमणचकितसवेपथुहृदया:, अनित्यताभावनावहितचेतस्तया निरस्तशरीरद्रविणादिगोचरा:, दुःखसंहृतिसम्पातरक्षाक्षमस्वापरस्य जिनप्रणीताद् धर्मादभावात् तमेव शरणमित्युपगता: । ज्ञानरत्नप्रदीपप्रभाप्रकरनिर्मूलित-भुवनभवनान्तर्लीनाज्ञानध्वान्तसन्ततय:, कर्मणामादाने, तत्फला-नुभवने, तन्निर्मूलने च वयमेकका एवेति कृतविनिश्चितय:, असाधारणचैतन्यादिलक्षणोपनीतभेदापेक्षयाऽन्ये वयमितरद्रव्य-कलापादित्यन्यताभावनायामासक्ता:, सुखदुःखयोरकृतादरद्वेषा:, सदसद्वेद्योदयकर्मनिमित्तत्वेन समाहृतिमनभिमतं चापेक्षते इति उपकारापकारयोरहमेव प्रणेता, आत्मन: शुभाशुभकर्मारोपणे ममैव स्वातन्त्र्यात्तदुपचरितत्वात् । अनुग्रहनिग्रहयो: परे वराका: किं कुर्वन्तीति मत्वा स्वजनपरजनविवेकनिरुत्सुका:, समन्तादुप-सर्गं महोरगैरवार्यवीर्यैरवष्टब्धा अप्यविचलवृत्तय:, क्षुत्पिपासा-दिपरीषहमहारातिसरभससम्पातेऽप्यदीनासंक्लिष्ट - चेतोवृत्तय:, त्रिगुप्तिगुप्तिमुपाश्रिता:, अनशनादितपोराज्य-पालनोद्युक्तमतय:, धृतानूनव्रतकवचा:, गृहीतशीलखेटा:, उद्गीर्णध्यानातिनिशित-मण्डलाग्रा:, कर्मारिपृतनासाधनोद्यता: साधव इति । सिंहवत् पराक्रमिण:, गजवत् स्वाभिमानिन:, वृषभवद् भद्र-प्रकृतय:, मृगवत् ऋजव:, पशुवत् निरीहा:, पवनवत् नि:सङ्गा:, सूर्यवत् तेजस्विन:, समुद्रवत् गम्भीरा:, चन्द्रवत् शान्तिप्रदायका:, आकाशवत् निर्लेपा:, सततमोक्षपदसाधनोद्यता:, मन्दर इव अकम्पा:, तेभ्य: सर्वसाधुभ्यो नम: नमस्कार: ।

चत्तारि मंगलं अरहंता मंगलं सिद्धा मंगलं ।
साहू मंगलं केवलिपण्णत्तो धम्मो* मंगलं ॥
चत्तारि लोगुत्तमा अरहंता लोगुत्तमा सिद्धा लोगुत्तमा ।
साहू लोगुत्तमा केवलिपण्णत्तो धम्मो लोगुत्तमा ॥
चत्तारि सरणं पव्वज्जामि अरहंते सरणं पव्वज्जामि ।
सिद्धे सरणं पव्वज्जामि साहू सरणं पव्वज्जामि ॥
केवलिपण्णत्तं धम्मं सरणं पव्वज्जामि ।

---

## धर्ममाहात्म्यमाह—

* दुःखात् त्रातुं, सुखं दातुं निधीनां रत्नानां चाधिपत्ये स्थापयितुं, स्वचक्रविक्रमाभिनतसकलभूपालखेचरगणबद्धमकुटचक्रांशुचक्रलाञ्छनानृपादयोः पातयितुं, सुरविलासिनीचेतःसम्मोहावहं, तदीयविलुठत्पाठीनलोचनरागमभिवर्धयन्तीं, हर्षभरपरवशोद्भिन्नसान्द्ररोमाञ्चकञ्चुकमाचरितुं, उद्धतां रूपशोभामन्दिरां सम्पादयितुं, अतिशयिताणिमादिगुणप्रसाधनां, सामानिकादिसुरसहस्रानुयानोपनीतमहत्तां, सततप्रत्यग्रयुवतालिङ्गितां सुभगतालतारोहयष्टिम्, अनेकसमुद्रबिन्दुगणनागणितायुःस्थितिं, मेरुकुरुसुरसरित्कुलाचलादिगोचरस्वेच्छाविहारचतुरां, सुराङ्गनापृथुलनितम्बबिम्बाधरकठिननिबिडसमुन्नतकुचतटक्रीडालोकनस्पर्शनादिक्रियोपयोगामितप्रीतिविस्मितां, शतमखतामखेदेन झटिति घटयितुं, विरूपताजननीजराडाकिनीनामगोचरां, शोकवृकानुल्लङ्घितां, विपद्दावानलशिखाभिरनुपप्लुतां, रोगोरगैरदष्टवपुषं, यममहिषखुराखण्डितां, भीतिवराहसमितिभिरनुल्लिखितां, संक्लेशशतशरभैरनध्यासितां, प्रियवियोगचण्डपुण्डरीकैरसेवितां, अनर्घ्यसुखरत्नप्रभवभूमिं निर्वृतिं प्रापयितुं समर्थो जिनप्रणीतो धर्म इति ।

# सरस्वतीस्तुतिः

त्रिजगदीशजिनेन्द्रमुखोद्भवा,
त्रिजगतिजनजातिहितङ्करा ।
त्रिभुवनेशनुता हि सरस्वती,
चिदुपलब्धिमियं वितनोतु मे ॥१

अखिलनाकशिवाध्वनिदीपिका,
नवनयेषु विरोधविनाशिनी ।
मुनिमनोऽम्बुजमोदनभानुभा,
चिदुपलब्धिमियं वितनोतु मे ॥२

यतिजनाचरणादिनिरूपणा,
द्विदशभेदगता गतदूषणा ।
भवभयातपनाशनचन्द्रिका,
चिदुपलब्धिमियं वितनोतु मे ॥३

गुणसमुद्रविशुद्धपरात्मना,
प्रकटनैककथा सुपटीयसी ।
जितसुधा निजभक्तशिवप्रदा,
चिदुपलब्धिमियं वितनोतु मे ॥४

विविधदुःखजले भवसागरे,
गदजरादिझषौघसमाकुले ।
असुभृतां किल तारणनौसमा,
चिदुपलब्धिमियं वितनोतु मे ॥५

गगनपुद्गलधर्मतदन्यकैः,
सह सदा सगुणांश्चिदनेहसः ।
कलयतीह नरो यदनुग्रहात्,
चिदुपलब्धिमियं वितनोतु मे ॥६

गुरुरयं हितवाक्यमिदं गुरोः,
शुभमिदं जगतामथवाशुभम् ।
यतिजनो हि यतोऽत्र विलोकते,
चिदुपलब्धिमियं वितनोतु मे ॥७

त्यजति दुर्मतिमेव शुभे मतिं,
प्रतिदिनं कुरुते च गुणे रतिम् ।
जडनरोऽपि यथार्पितधीधन-
श्चिदुपलब्धिमियं वितनोतु मे ॥८

खलु नरस्य मनो रमणीजने,
न रमते रमते परमात्मनि ।
यदनुभक्तिपरस्य वरस्य वै,
चिदुपलब्धिमियं वितनोतु मे ॥९

त्रिविधकाव्यकृते मतिसम्भवो,
भवति चापि तदर्थविचारणे ।
यदनुभक्तिभरान्वितमानवे,
चिदुपलब्धिमियं वितनोतु मे ॥१०

योऽहर्निशं पठति मानसमुक्तभारः,
स्यादेव तस्य भवनीरसमुद्रपारः ।
युङ्क्ते जिनेन्द्रवचसां हृदये च हारः,
श्रीज्ञानभूषणमुनिः स्तवनं चकार ।।११।

इति सरस्वतीस्तुतिः ।

---

# सरस्वतीस्तोत्रम्

शब्दात्मिका या त्रिजगद् बिभर्ति,
स्फुरद् विचित्रार्थसुधां स्रवन्ती ।
या बुद्धिरीड्या विदुषां हृदब्जे,
मुखे च सा मे वशमस्तु नित्यम् ।।१

जिनराजमुखाम्भोजराजहंसी सरस्वती ।
कुन्देन्दुविशदा नित्यं मानसे रमतां मम ।।२

सद्वाग्वृत्तपदन्यासवर्णाऽलङ्कारधारिणी ।
सन्मार्गाङ्गीसदैवाऽस्तु प्रसन्ना नः सरस्वती ।।३

सरस्वत्याः प्रसादेन काव्यं कुर्वन्ति मानवाः ।
तस्मान्निश्चलभावेन पूजनीया सरस्वती ।।४

श्रीसर्वज्ञमुखोत्पन्ना भारती बहुभाषिणी ।
अज्ञानतिमिरं हन्ति विद्याबहुविकासिनी ॥५॥

सतीं श्रुतस्कन्धवने विहारिणी-
मनेकशाखागहने सरस्वतीं ।
गुरुप्रवाहेण जडानुकम्पना
स्तुवेऽभिनन्द्यो वनदेवतामिव ॥६॥

मातेव या शास्ति हितानि पुंसो
रजः क्षिपन्ती दधती सुखानि ।
समस्तशास्त्रार्थविचारदक्षा
सरस्वती सा तनुतां मतिं मे ॥७॥

वीतरागमुखोद्गीर्णामङ्गपूर्वादिविस्तृताम् ।
आराध्यां मुनिभिर्वन्दे ब्राह्मीं प्रज्ञाप्रसिद्धये ॥८॥

जगदानन्दिनीं ताप-हारिणीं भारतीं सतीम् ।
श्रीमतीं चन्द्ररेखाभां नमामि विबुधप्रियाम् ॥९॥

देवेन्द्रादिसुरैर्नताङ्घ्रिकमला ध्याता मुनीन्द्रैः सदा,
नागेन्द्राम्बरभूमिराजनिवहैः संसेविता सर्वदा ।
हंसस्था सुविशालहस्तकमला विद्वज्जनानां मुदा,
वीणापुस्तकशोभिता जनहिता भूयात् सदा शारदा ॥१०॥

नमस्ते शारदादेवी काश्मीरप्रतिवासिनी ।
त्वां प्रार्थयाम्यहं मातः ! विद्यादानं च देहि मे ॥११॥

सरस्वति ! नमस्तुभ्यं, वरदे ! कामरूपिणि !।
विद्यारम्भं करिष्यामि, सिद्धिर्भवतु मे सदा ॥१२॥
वाणीकर्मकृपाणी श्रेणीसंसारजलधिसन्तरणे ।
वेणीजितघनमाला जिनवदनाम्भोजभासुरा जीयात् ॥१३॥
जनयति मुदमन्तर्भव्यपाथोरुहाणां,
　　हरति तिमिरराशिं या प्रभा भानवीव ।
कृतनिखिलपदार्थद्योतना भारतीद्धा,
　　वितरतु धुतदोषा सार्हती भारती वः ॥१४॥
नमामि भारतीं जैनीं सर्वसन्देहनाशिनीम् ।
भानुभामिव भव्यानां मनःपद्मविकासिनीम् ॥१५॥
वाचं वाचंयमीन्द्राणां वक्त्रवारिजवाहनाम् ।
वन्दे नयद्वयायात्त-वाच्य सर्वस्वपद्धतिम् ॥१६॥
यत् सर्वात्महितं न वर्णसहितं न स्पन्दिताष्ठद्वयं ।
नो वांछाकलितं न दोषमलिनं न श्वासरुद्धक्रमं ॥
शान्तामर्षविषैः समं पशुगणैराकर्णितं कर्णिभिः
तन्नः सर्वविदः प्रणष्टविपदः पायादपूर्ववचः ॥१७॥
गम्भीरं मधुरं मनोहरतरं दोषैरपेतं हितम् ।
कण्ठौष्ठादिवचो निमित्तरहितं नो वातरोधोद्गतम् ।
स्पष्टं तत्तदभीष्टवस्तुकथकं निःशेषभाषात्मकम् ।
दूरासन्नसमं श्रुतं निरुपमं जैनं वचः पातु नः ॥१८॥

# श्रीपूज्यपादकृतं शारदास्तोत्रम्

ॐ ह्रीं श्रीं मन्त्ररूपे ! विबुधजननुते ! देवि देवेन्द्रवन्द्ये !
चञ्चच्चन्द्रावदाते ! क्षपितकलिमले ! हारनीहारगौरे !
भीमे ! भीमाट्टहासे ! भवभयहरणे ! भैरवीभीरुधीरे !
ह्रां ह्रीं ह्रूंकारनादे! मम मनसि सदा शारदे ! तिष्ठ देवि! ॥१॥

ह्रा पक्षी बीजगर्ते ! सुरवररमणीचर्चितेऽनेकरूपे !
कोपं वं झंविधेये ये ! धरितवतधरे ! योगिनी योगमार्गे !
हं सं सः स्वर्गजैश्च प्रतिदिननमिते ! प्रस्तुतालापपाठे, !
दैत्येन्द्रैर्ध्यायमानैर्मम मनसि सदा शारदे ! तिष्ठ देवि !॥२॥

दैत्यैर्दैत्यारिनाथैर्नमितपदयुगैर्भक्तिरिष्टैर्विचिन्त्यां,
यक्षैः सिद्धैश्च नम्रैरहमहमिकया देहकान्तिश्च कान्ते !
श्रां ढं ऊं तं अ आ भा गृड्डु गृड्डु मृडुने ! सस्वरेणो ! स्वरेणो-
ल्येवं प्रोह्यिभाने ! मम मनसि सदा शारदे ! तिष्ठ देवि !॥३॥

क्षां क्षीं क्षूं क्षः स्वरूपे ! हन विषमविषं स्थावरं जङ्गमं वा,
संसारे संश्रितानां तव चरणयुगे सर्वकालं नराणां ।

अव्यक्ते ! व्यक्तरूपे ! प्रणुतनरवरे ! ब्रह्मरूपे ! स्वरूपे !
ऐं क्लीं ब्लूं योगिगम्ये ! मम मनसि सदा शारदे ! तिष्ठ देवि ! ॥४॥
सम्पूर्णं ! विज्ञशोभां शशिकरधवलादास्यबिम्बात्प्रसूतैः,
रम्यैः स्वच्छैः स्वकान्तैर्द्विजकरनिकरैश्चन्द्रिकाकारभासैः ।
अस्माकीनं भवार्तं दिनमनुसततं कल्मषं क्षालयन्ती,
श्रां श्रीं श्रूं मन्त्ररूपे मम मनसि सदा शारदे ! तिष्ठ देवि ! ॥५॥
भावे ! पद्मासनस्थे ! जिनमुखनिःसृते ! पद्महस्ते प्रशस्ते !
प्रां प्रीं प्रूं प्रः पवित्रे ! हर हर दुरितं दुष्टजं दुष्टचेष्टां !
वाचां लाभाय भक्त्या त्रिदश युवतिभिः प्रत्यहं पूज्यपादे !
चण्डी चण्डी कराले ! मम मनसि सदा शारदे ! तिष्ठ देवि ! ॥६॥
नम्रीभूतक्षितीशप्रवरमणियुते ! घृष्टपादारविन्दे !
पद्मास्ये ! पद्मनेत्रे ! गजगतिगमने ! हंसयाने ! विमाने !
कीर्तिश्रीबुद्धि चक्रे ! जय विजय जये ! गौरि ! गान्धारयुक्ते !
ध्येये ध्येयः शरण्ये ! मम मनसि सदा शारदे ! तिष्ठ देवि ! ॥७॥
विद्युज्ज्वालाप्रदीप्तां प्रवरमणिमयामक्षमालां कराग्रे !,
रम्यां वृत्तिं धरित्री दिनमनुसततं मन्त्रकं शारदं च ।
नागेन्द्रैरिन्द्रचन्द्रैर्दिविजमुनिजनैः संस्तुताया च देवी,
कल्याणं सा च दिव्यं दिशतु मम सदा निर्मलं ज्ञानरत्नं ॥८॥

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः,
पश्यन्ति सूक्ष्ममतयः सा जयतु सरस्वती देवी ॥९॥

या नाकलोकपतिमानसराजहंसी,
विद्याधरेश्वरविहारविचारदेवी ।
मर्त्याधिपः श्रवणभूषणचारु (रत्न) वल्ली,
सा वः श्रियं वितरताज्जिनवाक् प्रसूतिः ॥१०॥

इति श्रीपादपूज्यकृतं शारदास्तोत्रं समाप्तं ।

प्रज्ञा सा स्मरतीति या तव शिरस्तद्यन्नतं ते पदे ।
जन्मादः सफलं परं भवभिदी यत्राश्रिते ते पदे ॥
माङ्गल्यं च स यो रतस्तव मते गीः सैव या त्वा स्तुते ।
ते ज्ञा ये प्रणता जनाः क्रमयुगे देवाधिदेवस्य ते ॥१॥

सुश्रद्धा मम ते मते स्मृतिरपि त्वय्यर्चनं चापि ते ।
हस्तावञ्जलये कथाश्रुतिरतः कर्णोऽक्षि संप्रेक्षते ॥
सुस्तुत्यां व्यसनं शिरो नतिपरं सेवेदृशी येन ते ।
तेजस्वी सुजनोऽहमेव सुकृती तेनैव तेजःपते ! ॥२॥

जन्मारण्यशिखी स्तवः स्मृतिरपि क्लेशाम्बुधे नौःपदे ।
भक्तानां परमौ निधी प्रतिकृतीः सर्वार्थसिद्धिः परा ॥
वन्दीभूतवतोऽपि नोन्नतिहतिर्नन्तुश्च येषां मुदा ।
दातारो जयिनो भवन्तु वरदा देवेश्वरास्ते सदा ॥३॥

# अष्टोत्तरशतनामस्तोत्रम्

अर्हन् ! जिन ! त्रिजगदीश्वर ! वीतराग !
सर्वज्ञ ! तीर्थङ्कर ! शङ्कर ! केवलाक्ष !
प्रत्यक्षविश्व ! समलाभरण ! स्वयम्भूः !
स्वामिन् ! अजन्ममरण ! त्रिजगच्छरण्य ! ॥१॥

त्रैलोक्यभास्कर ! महेश्वर ! सिद्ध ! बुद्ध !
ब्रह्मानन्त ! पुरुषोत्तम ! विश्वरूप !
निरुपमप्रकाशात्मक ! वशीकृतविश्वविश्व !
ज्योत्स्नाकर ! प्रकटविश्व ! महानिधान ! ॥२॥

विश्वोपलम्भमय ! विश्वविभूतिकोश !
विश्वेश ! विश्वभरणक्षम ! विश्वसेव्य !
विश्वातिशायिमहिमन् ! भगवन्नुपेक्ष !
शृङ्गारबोधधन ! विश्वभरोपयुक्त ! ॥३॥

दूराधिरूढ ! प्रपूरितसर्वकाम !
निष्काम ! निर्मल ! निरामय ! निर्विकार !
निर्मोह ! निःप्रलय ! निर्भर ! निष्कषाय !
निःसीमदृक्प्रसर ! निष्कल ! निष्कलङ्क ! ॥४॥

स्याद्वाद ! सृष्टिकर ! मुक्तिमहारसज्ञ !
संसारपारग ! समग्रगुणैककोश !

दुर्लङ्घ्यशासन ! निरावरण ! निराल !
निर्वाणकारण ! चराचरमाणहद्ध ! ॥५॥

निर्द्वन्द्व ! निःप्रतिघ ! निःक्रिय ! निःप्रपञ्च !
निष्कर्मपास ! निरुपप्लव ! चिद्विलास !
निर्जीर्णकर्ममल ! केवलकालकाल !
कल्याणकारक ! सुदुष्कर ! कर्मकारिन् ! ॥६॥

आश्चर्यकोश ! कृतकृत्य ! चिदेककेतो !
कैवल्यलाञ्छन ! सनातन ! शान्ततत्त्व !
शान्ताधातार ! भवभञ्जन ! शुद्धधामन् !
धाम्नांनिधे ! विहतबन्धन ! सुप्रबुद्ध ! ॥७॥

सिद्धात्मतत्त्व ! गुरुचिद्भर ! चिद्गतीर !
चिद्वीर्य ! दुर्जय ! जयास्पद ! जैत्रतेजः !
भूतार्थसुस्थित ! सुदर्शन ! शुद्धबोध !
संविन्निधान ! समसागर ! शान्तमूर्ते ! ॥८॥

दिव्यैकवाङ्मय ! चिदन्वय ! नित्यपूर्ण !
नित्योदिताविचलितानुभवस्वभाव !
आद्यन्तमुक्त ! सुविविक्त ! महः समस्त !
सत्तावलेह ! पिहितास्रव ! मां पुनीहि ! ॥९॥

इति परमात्मनोऽष्टोत्तरशत नाम स्तोत्रं समाप्तम् ॥

# भगवद्सहस्रनाम सिद्धसेनविरचितम्

ॐ अर्हं ॐ नमोऽर्हते, परमात्मने, परमज्योतिषे, परम-परमेष्ठिने, परमवेधसे, परमयोगिने, परमेश्वराय, तमसः पुरस्तात् सदोदितादित्यवर्णाय, समूलोन्मूलितरागादिसकल-क्लेशाय, ॐ नमो भूर्भुवः स्वस्त्रयीनाथमौलिमन्दारमाला-र्चितक्रमाय, सद्वीरपुरुषार्थयोगिने, निरवद्यविद्याप्रवर्तनैक-वीराय, नमः स्वस्ति स्वधा स्वाहा वषडर्थैकान्तशान्तमूर्तये, भवद्भाविभूतभावावभासिने, कालपाशनाशिने, सत्त्वरजस्त-मोगुणातीताय, अनन्तगुणवाङ्मनसोऽगोचरचरित्राय, पवित्राय, कारुणिकाय, तारणतरणाय, सात्त्विकदैवताय, तात्त्विक-जीविताय, निर्ग्रन्थब्रह्महृदयाय, योगीन्द्रनाथाय, त्रिभुवन-भव्यकुलनित्योत्सवाय, विज्ञानानन्दपरब्रह्मैकान्तसमाधये, हरिहरहिरण्यगर्भादिदेवतापरिकलितस्वरूपाय, सम्यक्ध्येयाय सम्यक्श्रद्धेयाय, सम्यक्शरण्याय, सुसमाहितसम्यक्स्पृहणी-याय, । ॐ नमो अर्हते, भगवते, आदिकराय, तीर्थकराय, स्वयंबुद्धाय, पुरुषवरगन्धहस्तिने, लोकोत्तमाय, लोकनाथाय, लोकप्रद्योतकारिणे लोकप्रदीपाय, अभयदाय, दृष्टिदाय,

मार्गदाय, बोधिदाय, धर्मदाय, जीवनदाय, शरणदाय, धर्मदेशकाय, धर्मनायकाय, धर्मसारथिने, धर्मवरचतुरङ्गचक्रवर्तिने प्रभूतछद्मने, अप्रतिहतसम्यग्दर्शनज्ञानसद्मने । ॐ नमोऽर्हते जिनाय, ज्ञापकाय, तीर्णाय, बुद्धाय, बोधकाय, मुक्ताय, मोचकाय, त्रिकालविदे, पारङ्गताय, कर्माष्टकनिषूदनाय, शम्भवे, जगत्प्रभवे, स्वयम्भुवे, जिनेश्वराय, स्याद्वादिने, सार्वाय, सर्वज्ञाय, सर्वदर्शिने, सर्वतीर्थोपनिषदे, सर्वपाखण्डमोचिने, सर्वयोगरहस्याय, केवलिने, सर्वकलात्मने, देवाधिदेवाय, वीतरागाय, । ॐ नमोऽर्हते, परमाप्ताय, परमकारुणिकाय, सुगताय, तथागताय, महाहंसाय, महाहंसराजाय, महासत्त्वाय, महाशिवाय, महाबोधाय, महामैत्राय, सुनिश्चिताय, विगतद्वन्द्वाय गुणाब्धये लोकनाथाय, जितमारबलाय, । ॐ नमोऽर्हते, सनातनाय, उत्तमश्लोकाय, मुकुन्दाय, गोविन्दाय, विष्णवे, जिष्णवे, अनन्ताय, अच्युताय, श्रीपतये, नमः विश्वरूपाय, हृषीकेशाय, जगन्नाथाय, भूर्भुवः स्वः समुत्तराय, मानञ्जयाय, कालजयाय, नमो ध्रुवाय, अजेयाय, अजराय, अजाय, अचलाय, अव्ययाय, विभवे, अचिन्त्याय, असङ्ख्याय, आदिशिवाय, महाब्रह्मणे, परमशिवाय, एकानेकान्तस्वरूपिणे, भवभावविवर्जिताय, अस्तिनास्तिद्वयातीताय,

पुण्यापापविरहिताय, सुखदुःखविमुक्ताय, व्यक्ताव्यक्त-स्वरूपाय, अनादिमध्यनिधनाय, नमो मुक्तीश्वराय ।
ॐ नमोऽर्हते, निरन्तराय, निर्भयाय, निर्द्वन्द्वाय, निस्त-रङ्गाय, निर्धूमाय, निरामयाय, निष्कलङ्काय, परमदेवाय, सदाशिवाय, महादेवाय, शङ्कराय, महेश्वराय, महाव्रतिने, महायोगिने, पञ्चमुखाय, मृत्युञ्जयाय, अष्टमूर्तये, भूतनाथाय, जगदानन्दाय, जगत्पितामहाय, जगद्देवा-धिदेवाय, जगदीश्वराय, जगदादिकन्दाय, जगद्भा-सिने, जगत्कर्मसाक्षिणे, जगच्चक्षुषे, त्रयीतनवे, अमृतकराय, शान्तिकराय, ज्योतिश्चक्रचक्रिणे, महा-ज्योतिषे, महात्मने, पारेषु प्रतिष्ठिताय, स्वयंकर्त्रे, स्वयंहर्त्रे, स्वयंपालाय, आत्मेश्वराय, नमो विश्वात्मने ।
ॐ नमोऽर्हते, सर्वदेवमयाय, सर्वरहस्यमयाय, सर्वभावा-भावजीवाजीवेश्वराय, अरहस्यरहस्याय, अस्पृहस्पृह-णीयाय, अचिन्त्यचिन्तनीयाय, अकामकामधेनवे, असङ्क-ल्पितकल्पवृक्षाय, अचिन्त्यचिन्तामणये, चतुर्दशरज्ज्वा-त्मकजीवलोकचूडामणये, चतुरशीतिजीवयोनिलक्षप्राण-नाथाय, पुरुषार्थनाथाय, परमार्थनाथाय, अनाथनाथाय जीवनाथाय, देवदानवसिद्धसेनादिनाथाय । ॐ नमोऽर्हते, निरञ्जनाय, अनेककल्याणनिकेतनाय, भवातिकर्तनाय, सुगृहीतनामधेयाय धीरोदात्तधीरोद्धतधीरशान्तधीरल-

लितपुरुषोत्तमपुण्यलोकशतसहस्रलक्षकोटिवन्दितपादारविन्दाय, सर्वगताय। ॐ नमोऽर्हते, सर्वसमर्थाय, सर्वप्रदाय, सर्वहिताय, सर्वाधिनाथाय, कस्मैचनक्षेत्राय, पात्राय, तीर्थाय, पावनाय, पवित्राय, अनुत्तराय, उत्तराय, योगाचार्याय, सम्प्रक्षालनाय, प्रवराय, अग्राय, वाचस्पतये, माङ्गल्याय, सर्वात्मनीयाय, सर्वार्थाय, अमृताय, सदोदितब्रह्मचारिणे, तायिने, दक्षणीयाय, निर्विकाराय, वज्रऋषभनाराचमूर्तये, तत्त्वदर्शिने, पारदर्शिने, निरुपमज्ञानबलवीर्यतेजः शक्त्यैश्वर्यमयाय, आदिपुरुषाय, आदिपरमेश्वराय, आदिमहेशाय, महाज्योतिस्तत्त्वाय, महाधनेश्वराय, महामोहसंहारिणे, महासत्त्वाय, महाज्ञानमहेन्द्राय, महालयाय, महाशान्ताय, महायोगीन्द्राय, अयोगिने, महामहीयसे, महाहंसराजाय, महासिद्धाय, शिवमचलमरुजमनन्तमक्षयाव्याबाधमपुनरावृत्तिमहानन्दमहोदयं सर्वदुःखक्षयं कैवल्यममृतनिर्वाणमक्षरं परमब्रह्मनिःश्रेयसमपुनर्भवं सिद्धिगतिनामधेयं स्थानं सम्प्राप्तवते, चराचरपतये, नमो नमोस्तु श्रीमहावीराय, त्रिजगन्नाथाय। ॐ नमोऽर्हते, केवलिने, विस्फुरत्सुशुक्लध्यानाग्निनिर्दग्धकर्मबीजाय, प्राप्तानन्तचतुष्टयाय, सौम्याय, शान्ताय, दान्ताय, माङ्गल्यवरदाय, अष्टादशदोषरहिताय, मुक्तिमार्गयोगिने, विशालशासनाय,

सर्वलब्धिसम्पन्नाय निर्विकल्पाय, कल्पनातीताय, कला-
कलापकलिताय, स्वाहा । ॐ ह्रीं श्रीं अर्हं नमः ।
लोकोत्तमो निष्प्रतिमस्त्वमेव, त्वं शाश्वतं मंगलमप्यधीश !
त्वमेकमर्हन् ! शरणं प्रपद्ये, सिद्धर्षि सद्धर्ममयस्त्वमेव ॥१॥
त्वं मे माता पिता नेता, देवो धर्मं गुरुः परः ।
प्राणाः स्वर्गोऽपवर्गश्च, सत्त्वं तत्त्वं गतिर्मतिः ॥२॥
जिनो दाता जिनो भोक्ता, जिनः सर्वमिदं जगत् ।
जिनो जयति सर्वत्र, यो जिनः सोऽहमेव च ॥३॥
यद् किञ्चित् कुर्महे देव !, सदा सुकृत दुष्कृतं ।
तन्मे जिनपदस्थस्य, हुं क्षः क्षपयतां जिनः ॥४॥
गुह्यातिगुह्य गोप्तास्त्वं........................ ।
सिद्धिं श्रयति मां येन, त्वत्प्रसादात्त्वयि स्थितं ॥५॥

इति सिद्धसेनविरचितं भगवत्सहस्रनामस्तोत्रं सम्पूर्णं ।

---

# अथसहस्रनाममाहात्म्यम्

इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमंत्रराजोपनिषद्गर्भा-
ष्टमहासिद्धिप्रदं, सर्वपापनिवारणं, सर्वपुण्यकारणं,
सर्वदोषहरं, सर्वगुणाकरं, महाप्रभावं, अनेकसम्यग्दृष्टि-
भद्रकदेवताशतसहस्रसुश्रूषितं, भवान्तरकृतासङ्ख्य-

पुण्यप्राप्त्यां, सम्यग्जपतां, पठतां, गुणयतां, शृण्वतां समनुप्रेक्षमाणानां, भव्यजीवानां, चराचरेऽपि सद्वस्तु तथाऽपि करतले प्राप्यं न भवति ॥ इति ॥ किञ्च इतीमं पूर्वोक्तमिन्द्रस्तवैकादशमंत्रराजोपनिषद्गर्भमित्यादि यावद् भव्यजीवानां भवनपतिव्यन्तरज्योतिष्कवैमानिकवासिनो देवाः सदा प्रसीदन्ति । इतीमं भव्यजीवानां व्याधयो विलीयन्ते । इतीमं भव्यजीवानां पृथिव्यप्तेजोवायुगगनानि भवन्त्यनुकूलानि । इतीमं भव्यजीवानां साधवः सौमनस्येनानुग्रहपरा जायन्ते । इतीमं भव्यजीवानां खलाः क्षीयन्ते । इतीमं भव्यजीवानां जलस्थलगगनचराः क्रूरजन्तवोऽपि मैत्रीमया भवन्ति । इतीमं भव्यजीवानां ऐहिक सर्वापि शुद्धगोत्रकलत्रपुत्रमित्रधनधान्यजीवितयौवनरूपाऽरोग्ययशः पुरस्सराः सर्वजनीनाः सम्पदः परभाग्यशालिन्यः सुखसूक्तिकाश्च सम्मुखीना भवन्ति । किं बहुना । इतीमं भव्यजीवानां यावद्............स्वर्गापवर्गश्रियोऽपि क्रमेण यथेच्छ स्वयंवरेणोत्सवसमुत्सुका भवन्ति ।

इति सिद्धिश्रेयःसमुदयः

यथेन्द्रेण प्रसन्नेन, समादिष्टोऽर्हतां स्तवः ।
तथाऽयं सिद्धसेनेन लिलिखे सम्पदां पदं ॥१॥
इति शक्रस्तवः सहस्रनामापरपर्यायपठितो
महालाभाय भवतु सुपार्श्वजिनप्रसादात् ॥

श्रीमद्विद्वच्छिरोमणि-आशाधर-विरचितं

# जिनसहस्रनामस्तवनम्

प्रभो ! भवाङ्गभोगेषु, निर्विण्णो दुःखभीरुकः ।
एष विज्ञापयामि त्वां, शरण्यं करुणार्णवम् ॥१॥

सुखलालसया मोहाद्, भ्राम्यन् बहिरितस्ततः ।
सुखैकहेतोर्नामाऽपि, तव न ज्ञातवान् पुरा ॥२॥

अद्य मोहग्रहावेश, शैथिल्यात् किञ्चिदुन्मुखः ।
अनन्तगुणमाप्तेभ्यस्त्वां श्रुत्वा स्तोतुमुद्यतः ॥३॥

भक्त्या प्रोत्सार्यमाणोऽपि, दूरं शक्त्या तिरस्कृतः ।
त्वां नामाष्टसहस्रेण, स्तुत्वात्मानं पुनाम्यहम् ॥४॥

जिन सर्वज्ञ यज्ञार्हं, तीर्थकृन्नाथयोगिनाम् ।
निर्वाण-ब्रह्म-बुद्धान्त-कृतां चाष्टोत्तरैः शतैः ॥५॥

तद्यथा—

जिनो जिनेन्द्रो जिनराट्, जिनपृष्ठो जिनोत्तमः ।
जिनाधिपो जिनाधीशोः जिनस्वामी जिनेश्वरः ॥६॥

जिननाथो जिनपतिर्जिनराजो जिनाधिराट् ।
जिनप्रभुर्जिनविभुर्जिनभर्ता जिनाधिभूः ॥७॥

जिननेता जिनेशानो, जिनेनो जिननायकः ।
जिनेड् जिनपरिवृढो जिनदेवो जिनेशिता ॥८॥

जिनाधिराजो जिनपो, जिनेशो जिनशासिता ।
जिनाधिनाथोऽपि जिना-धिपतिर्जिनपालकः ॥९॥

जिनचन्द्रो जिनादित्यो, जिनार्को जिनकुञ्जरः ।
जिनेन्दुर्जिनधौरेयो, जिनधुर्यो जिनोत्तरः ॥१०॥

जिनवर्यो जिनवरो, जिनसिंहो जिनोद्वहः ।
जिनर्षभो जिनवृषो, जिनरत्नं जिनोरसम् ॥११॥

जिनेशो जिनशार्दूलो, जिनाग्र्यं जिनपुङ्गवः ।
जिनहंसो जिनोत्तंसो, जिननागो जिनाग्रणीः ॥१२॥

जिनप्रवेकश्च जिन-ग्रामणीर्जिनसत्तमः ।
जिनप्रवर्हः परम-जिनो जिनपुरोगमः ॥१३॥

जिनश्रेष्ठो जिनज्येष्ठो, जिनमुख्यो जिनाग्रिमः ।
श्रीजिनश्चोत्तमजिनो, जिनवृन्दारकोऽरिजित् ॥१४॥

निर्विघ्नो विरजाः शुद्धो, निस्तमस्को निरञ्जनः ।
घातिकर्मान्तकः कर्ममर्मावित् कर्महानघः ॥१५॥

वीतरागोऽक्षुदद्वेषो; निर्मोहो निर्मदोऽगदः ।
वितृष्णो निर्ममोऽसङ्गो, निर्भयो वीतविस्मयः ॥१६॥

अस्वप्नो निःश्रमोऽजन्मा, निःस्वेदो निर्जरोऽमरः ।
अरत्यतीतो निश्चिन्तो, निर्विषादस्त्रिषष्टिजित् ॥१७॥

॥ इति जिनशतम् ॥ १ ॥

सर्वज्ञ सर्ववित् सर्व-दर्शी सर्वावलोकनः ।
अनन्तविक्रमोऽनन्त-वीर्योऽनन्तसुखात्मकः ॥१८॥
अनन्तसौख्यो विश्वज्ञो, विश्वदृश्वाऽखिलार्थदृक् ।
न्यक्षदृग्विश्वतश्चक्षुर्विश्वचक्षुरशेषवित् ॥१९॥

आनन्दः परमानन्दः सदानन्दः सदोदयः ।
नित्यानन्दो महानन्दः, परानन्दः परोदयः ॥२०॥
परमोजः परं तेजः, परं धाम परं महः ।
प्रत्यग्ज्योतिः परं ज्योतिः, परं ब्रह्म परं रहः ॥२१॥

प्रत्यगात्मा प्रबुद्धात्मा, महात्मात्ममहोदयः ।
परमात्मा प्रशान्तात्मा, परात्मात्मनिकेतनः ॥२२॥
परमेष्ठी महिष्ठात्मा, श्रेष्ठात्मा स्वात्मनिष्ठितः ।
ब्रह्मनिष्ठो महानिष्ठो निरूढात्मा दृढात्मदृक् ॥२३॥
एकविद्यो महाविद्यो, महाब्रह्मपदेश्वरः ।
पञ्चब्रह्ममयः सार्वः, सर्वविद्येश्वरः सुभूः ॥२४॥

अनन्तधीरनन्तात्माऽनन्तशक्तिरनन्तदृक् ।
अनन्तानन्तधीशक्ति-रनन्तचिदनन्तमुत् ॥२५॥
सदाप्रकाशः सर्वार्थ-साक्षात्कारी समग्रधीः ।
कर्मसाक्षी जगच्चक्षुरलक्ष्यात्माऽचलस्थितिः ॥२६॥

निराबाधोऽप्रतर्क्यात्मा, धर्मचक्री विदांवरः ।
भूतात्मा सहजज्योतिर्विश्वज्योतिरतीन्द्रियः ॥२७॥

केवली केवलालोको, लोकालोकविलोकनः ।
विविक्तः केवलोऽव्यक्तः, शरण्योऽचिन्त्यवैभवः ॥२८॥

विश्वभृद्विश्वरूपात्मा, विश्वात्मा विश्वतोमुखः ।
विश्वव्यापी स्वयंज्योति,रचिन्त्यात्माऽमितप्रभः ॥२९॥

महौदार्यो महाबोधि, र्महालाभो महोदयः ।
महोपभोगः सुगति, र्महाभोगो महाबलः ॥३०॥

॥ इति सर्वज्ञशतम् ॥ २ ॥

यज्ञार्हो भगवानर्हन्-महार्हो मघवार्चितः ।
भूतार्थयज्ञपुरुषो, भूतार्थक्रतुपूरुषः ॥३१॥

पूज्यो भट्टारकस्तत्र, भवानत्रभवान् महान् ।
महामहार्हस्तत्रायु, स्ततो दीर्घायुरर्घ्यवाक् ॥३२॥

आराध्यः परमाराध्यः पञ्चकल्याणपूजितः ।
दृग्विशुद्धिगणोदग्रो, वसुधारार्चितास्पदः ॥३३॥

सुस्वप्नदर्शी दिव्यौजाः, शचीसेवितमातृकः ।
स्याद्रत्नगर्भः श्रीपूत-गर्भो गर्भोत्सवोच्छ्रितः ॥३४॥

दिव्योपचारोपचितः, पद्मभूर्निष्कलः स्वजः ।
सर्वीयजन्मा पुण्याङ्गो, भास्वानुद्भूतदैवतः ॥३५॥

विश्वविज्ञातसम्भूति,र्विश्वदेवागमाद्भुतः ।
शचीसृष्टप्रतिच्छन्दः, सहस्राक्षदृगुत्सवः ॥३६॥

नृत्यदैरावतासीनः, सर्वशक्रनमस्कृतः ।
हर्षाकुलामरखगश्चारणर्षिमतोत्सवः ॥३७॥
व्योम विष्णुपदारक्षा, स्नानपीठायिताद्रिराट् ।
तीर्थेशंमन्यदुग्धाब्धिः, स्नानाम्बुस्नातवासवः ॥३८॥
गन्धाम्बुपूतत्रैलोक्यो, वज्रसूचीशुचिश्रवाः ।
कृतार्थितशचीहस्तः, शक्रोद्घुष्टेष्टनामकः ॥३९॥
शक्रारब्धानन्दनृत्यः, शचीविस्मापिताम्बिकः ।
इन्द्रनृत्यन्तपितृको, रैदपूर्णमनोरथः ॥४०॥
आज्ञार्थीन्द्रकृतासेवो, देवर्षीष्टशिवोद्यमः ।
दीक्षाक्षणक्षुब्धजगद्, भूर्भुवःस्वःपतीडितः ॥४१॥
कुबेरनिर्मितास्थानः, श्रीयुग्योगीश्वरार्चितः ।
ब्रह्मेड्यो ब्रह्मविद्वेद्यो, याज्यो यज्ञपतिः क्रतुः ॥४२॥
यज्ञाङ्गममृतं यज्ञो, हविः स्तुत्यः स्तुतीश्वरः ।
भावो महामहपति, र्महायज्ञोऽग्रयाजकः ॥४३॥
दयायागो जगत्पूज्यः, पूजार्हो जगदर्चितः ।
देवाधिदेवः शक्रार्च्यो देवदेवो जगद्गुरुः ॥४४॥
संहूतदेवसङ्घार्च्यः, पद्मयानो जयध्वजी ।
भामण्डली चतुःषष्टि, चामरो देवदुन्दुभिः ॥४५॥
वागस्पृष्टासनश्छत्र-त्रयराट् पुष्पवृष्टिभाक् ।
दिव्याशोको मानमर्दी, सङ्गीतार्होऽष्टमङ्गलः ॥४६॥

॥ इति यज्ञार्हच्छतम् ॥ ३ ॥

तीर्थंकृत्तीर्थसृट् तीर्थं, करस्तीर्थंकरः सुदृक् ।
तीर्थकर्ता तीर्थभर्ता, तीर्थेशस्तीर्थनायकः ॥४७॥

धर्मतीर्थंकरस्तीर्थ-प्रणेता तीर्थकारकः ।
तीर्थप्रवर्तकस्तीर्थ-वेधास्तीर्थविधायकः ॥४८॥

सत्यतीर्थकरस्तीर्थ-सेव्यस्तैर्थिकतारकः ।
सत्यवाक्याधिपः सत्य-शासनोऽप्रतिशासनः ॥४९॥

स्याद्वादी दिव्यगीर्दिव्य, ध्वनिरव्याहतार्थवाक् ।
पुण्यवागर्थ्यवागर्ध, मागधीयोक्तिरिद्धवाक् ॥५०॥

अनेकान्तदिगेकान्त, ध्वान्तभिद् दुर्णयान्तकृत् ।
सार्थवागप्रयत्नोक्तिः, प्रतितीर्थमदघ्नवाक् ॥५१॥

स्यात्कारध्वजवागीहा, पेतवागचलोष्ठवाक् ।
अपौरुषेयवाक्छास्ता, रुद्धवाक् सप्तभङ्गिवाक् ॥५२॥

अवर्णगीः सर्वभाषा-मयगीर्व्यक्तवर्णगीः ।
अमोघवागक्रमवा-गवाच्यानन्तवागवाक् ॥५३॥

अद्वैतगीः सूनृतगीः, सत्यानुभयगीः सुगीः ।
योजनव्यापिगीः क्षीर, गौरगीस्तर्थकृत्वगीः ॥५४॥

भव्यैकश्रव्यगुः सद्गुश्चित्रगुः परमार्थगुः ।
प्रशान्तगुः प्राश्निकगुः, सुगुर्नियतकालगुः ॥५५॥

सुश्रुतिः सुश्रुतो याज्य, श्रुतिः सुश्रुन्महाश्रुतिः ।
धर्मश्रुतिः श्रुतिपतिः, श्रुत्युद्धर्ता ध्रुवश्रुतिः ॥५६॥
निर्वाणमार्गदिग्मार्ग, देशकः सर्वमार्गदिक् ।
सारस्वतपथस्तीर्थ, परमोत्तमतीर्थकृत् ॥५७॥
देष्टा वाग्मीश्वरो धर्म-शासको धर्मदेशकः ।
वागीश्वरस्त्रयीनाथस्, त्रिभङ्गीशो गिराम्पतिः ॥५८॥
सिद्धाज्ञः सिद्धवागाज्ञा, सिद्धः सिद्धैकशासनः ।
जगत्प्रसिद्धसिद्धान्तः, सिद्धमन्त्रः सुसिद्धवाक् ॥५९॥
शुचिश्रवा निरुक्तोक्तिस्, तन्त्रकृन्न्यायशास्त्रकृत् ।
महिष्ठवाङ्महानादः, कवीन्द्रो दुन्दुभिस्वनः ॥६०॥

॥ इति तीर्थकृच्छतम् ॥ ४ ॥

नाथः पतिः परिवृढः, स्वामी भर्ता विभुः प्रभुः ।
ईश्वरोऽधीश्वरोऽधीशो, ऽधीशानोऽधीशितेशिता ॥६१॥
ईशोऽधिपतिरीशान, इन इन्द्रोऽधिपोऽधिभूः ।
महेश्वरो महेशानो, महेशः परमेशिता ॥६२॥
अधिदेवो महादेवो, देवस्त्रिभुवनेश्वरः ।
विश्वेशो विश्वभूतेशो, विश्वेड् विश्वेश्वरोऽधिराट् ॥६३॥
लोकेश्वरो लोकपतिर्, लोकनाथो जगत्पतिः ।
त्रैलोक्यनाथो लोकेशो, जगन्नाथो जगत्प्रभुः ॥६४॥

पिता परः परतरो, जेता जिष्णुरनीश्वरः ।
कर्ता प्रभूष्णुर्भ्राजिष्णुः, प्रभविष्णुः स्वयम्प्रभुः ॥६५॥
लोकजिद्विश्वजिद्विश्व, विजेता विश्वजित्वरः ।
जगज्जेता जगज्जैत्रो, जगज्जिष्णुर्जगज्जयी ॥६६॥
अग्रणीर्ग्रामणीर्नेता, भूर्भुवःस्वरधीश्वरः ।
धर्मनायक ऋद्धीशो, भूतनाथश्च भूतभृत् ॥६७॥
गतिः पाता वृषो वर्यो, मन्त्रकृच्छुभलक्षणः ।
लोकाध्यक्षो दुराधर्षो, भव्यबन्धुर्निरुत्सुकः ॥६८॥
धीरो जगद्धितोऽजय्यस्, त्रिजगत्परमेश्वरः ।
विश्वाशी सर्वलोकेशो, विभवो भुवनेश्वरः ॥६९॥
त्रिजगद्वल्लभस्तुङ्गस्, त्रिजगन्मङ्गलोदयः ।
धर्मचक्रायुधः सद्यो, जातस्त्रैलोक्यमङ्गलः ॥७०॥
वरदोऽप्रतिघोऽच्छेद्यो, दृढीयानभयङ्करः ।
महाभागो निरौपम्यो, धर्मसाम्राज्यनायकः ॥७१॥

॥ इति नाथशतम् ॥ ५ ॥

योगी प्रव्यक्तनिर्वेदः, साम्यारोहणतत्परः ।
सामायिकी सामयिको, निःप्रमादोऽप्रतिक्रमः ॥७२॥
यमः प्रधाननियमः स्वभ्यस्तपरमासनः ।
प्राणायामचणः सिद्ध-प्रत्याहारो जितेन्द्रियः ॥७३॥

धारणाधीश्वरो धर्म, ध्याननिष्ठः समाधिराट् ।
स्फुरत्समरसीभाव, एकीकरणनायकः ॥७४॥
निर्ग्रन्थनाथो योगीन्द्रः, ऋषिः साधुर्यतिर्मुनिः ।
महर्षिः साधुधौरेयो, यतिनाथो मुनीश्वरः ॥७५॥
महामुनिर्महामौनी, महाध्यानी महाव्रती ।
महाक्षमो महाशीलो, महाशान्तो महादमः ॥७६॥
निर्लेपो निर्भ्रमस्वान्तो, धर्माध्यक्षो दयाध्वजः ।
ब्रह्मयोनिः स्वयम्बुद्धो, ब्रह्मज्ञो ब्रह्मतत्त्ववित् ॥७७॥
पूतात्मा स्नातको दान्तो, भदन्तो वीतमत्सरः ।
धर्मवृक्षायुधोऽक्षोभ्यः, प्रपूतात्माऽमृतोद्भवः ॥७८॥
मन्त्रमूर्तिः स्वसौम्यात्मा, स्वतन्त्रो ब्रह्मसम्भवः ।
सुप्रसन्नो गुणाम्भोधिः, पुण्यापुण्यनिरोधकः ॥७९॥
सुसंवृत्तः सुगुप्तात्मा, सिद्धात्मा निरुपप्लवः ।
महोदर्को महोपायो, जगदेकपितामहः ॥८०॥
महाकारुणिको गुण्यो, महाक्लेशाङ्कुशः शुचिः ॥
अरिञ्जयः सदायोगः, सदाभोगः सदाधृतिः ॥८१॥
परमौदासिताऽनाश्वान्, सत्याशीः शान्तनायकः ।
अपूर्ववैद्यो योगज्ञो, धर्ममूर्तिरधर्मधक् ॥८२॥
ब्रह्मेट् महाब्रह्मपतिः, कृतकृत्यः कृतक्रतुः ।
गुणाकरो गुणोच्छेदी, निर्निमेषो निराश्रयः ॥८३॥

सूरिः सुनयतत्त्वज्ञो, महामैत्रीमय शमी ।
प्रक्षीणबन्धो निर्द्वन्द्वः, परमर्षिरनन्तगः ॥८४॥

॥ इति योगिशतम् ॥ ९ ॥

निर्वाणः सागरः प्राज्ञो, महासाधुरुदाहृतः ।
विमलाभोऽथ शुद्धाभः, श्रीधरो दत्त इत्यपि ॥८५॥

अमलाभोऽप्युद्धरोऽग्निश्च संयमश्च शिवस्तथा ।
पुष्पाञ्जलिः शिवगण, उत्साहो ज्ञानसञ्ज्ञकः ॥८६॥

परमेश्वर इत्युक्तो, विमलेशो यशोधरः ।
कृष्णो ज्ञानमतिः शुद्ध-मतिः श्रीमद्रशान्तयुक् ॥८७॥

वृषभस्तद्वदजितः, सम्भवश्चाभिनन्दनः ।
मुनिभिः सुमतिः पद्म-प्रभः प्रोक्तः सुपार्श्वकः ॥८८॥

चन्द्रप्रभः पुष्पदन्तः, शीतलः श्रेय-आह्वयः ।
वासुपूज्यश्च विमलोऽनन्तजिद्धर्म इत्यपि ॥८९॥

शान्तिः कुन्थुररो मल्लिः, सुव्रतो नमिरप्यतः ।
नेमिः पार्श्वो वर्धमानो, महावीरः सुवीरकः ॥९०॥

सन्मतिश्चाकथि मह-तिमहावीरो इत्यथ ।
महापद्मः सूरदेवः, सुप्रभश्चस्वयम्प्रभः ॥९१॥

सर्वायुधो जयदेवो, भवेदुदयदेवकः ।
प्रभादेव उदंकश्च, प्रश्नकीर्तिर्जयाभिधः ॥९२॥

पूर्णबुद्धिर्निःकषायो, विशेयो विमलप्रभः ।
बहलो निर्मलश्चित्र-गुप्तः समाधिगुप्तकः ॥९३॥

स्वयम्भूश्चापि कन्दर्पो, जयनाथ इतीरितः ।
श्रीविमलो दिव्यवादो, ऽनन्तवीरोऽप्युदीरितः ॥९४॥

पुरुदेवोऽथ सुविधिः, प्रज्ञापारमितोऽव्ययः ।
पुराणपुरुषो धर्म-सारथिः शिवकीर्त्तनः ॥९५॥

विश्वकर्माऽक्षरोऽछद्मा, विश्वभूर्विश्वनायकः ।
दिगम्बरो निरातङ्को, निरारेको भवान्तकः ॥९६॥

दृढव्रतो नयोत्तुङ्गो, निःकलङ्कोऽकलाधरः ।
सर्वक्लेशापहोऽक्षय्यः, क्षान्तः श्रीवृक्षलक्षणः ॥९७॥

॥ इति निर्वाणशतम् ॥ ७ ॥

ब्रह्मा चतुर्मुखो धाता, विधाता कमलासनः ।
अब्जभूरात्मभूः स्रष्टा, सुरज्येष्ठः प्रजापतिः ॥९८॥

हिरण्यगर्भो वेदज्ञो, वेदाङ्गो वेदपारगः ।
अजो मनुः शतानन्दो, हंसयानस्त्रयीमयः ॥९९॥

विष्णुस्त्रिविक्रमः सौरिः, श्रीपतिः पुरुषोत्तमः ।
वैकुण्ठः पुण्डरीकाक्षो, हृषीकेशो हरिः स्वभूः ॥१००॥

विश्वम्भरोऽसुरध्वंसी, माधवो बलिबन्धनः ।
अधोक्षजो मधुद्वेषी, केशवो विष्टरश्रवाः ॥१०१॥

श्रीवत्सलाञ्छनः श्रीमानच्युतो नरकान्तकः।
विष्वक्सेनश्चक्रपाणिः, पद्मनाभो जनार्दनः ॥१०२॥
श्रीकण्ठः शङ्करः शम्भुः, कपाली वृषकेतनः।
मृत्युञ्जयो विरूपाक्षो, वामदेवस्त्रिलोचनः ॥१०३॥
उमापतिः पशुपतिः, स्मरारिस्त्रिपुरान्तकः।
अर्धनारीश्वरो रुद्रो, भवो भर्गः सदाशिवः ॥१०४॥
जगत्कर्ताऽन्धकारातिरनादिनिधनो हरः।
महासेनस्तारकजिद्, गणनाथो विनायकः ॥१०५॥
विरोचनो वियद्रत्नं, द्वादशात्मा विभावसुः।
द्विजाराध्यो बृहद्भानुश्चित्रभानुस्तनूनपात् ॥१०६॥
द्विजराजः सुधाशोचिरौषधीशः कलानिधिः।
नक्षत्रनाथः शुभ्रांशुः, सोमः कुमुदबान्धवः ॥१०७॥
लेखर्षभोऽनिलः पुण्य, जनः पुण्यजनेश्वरः।
धर्मराजो भोगिराजः, प्रचेता भूमिनन्दनः ॥१०८॥
सिंहिकातनयश्छाया, नन्दनो बृहतां पतिः।
पूर्वदेवोपदेष्टा च, द्विजराजसमुद्भवः ॥१०९॥

॥ इति ब्रह्मशतम् ॥ ८ ॥

बुद्धो दशबलः शाक्यः, षडभिज्ञस्तथागतः।
समन्तभद्रः सुगतः, श्रीघनो भूतकोटिदिक् ॥११०॥
सिद्धार्थो मारजिच्छास्ता, क्षणिकैकसुलक्षणः।
बोधिसत्त्वो निर्विकल्प,दर्शनोऽद्वयवाद्यपि ॥८९९॥

महाकृपालुर्नैरात्म्य,वादी सन्तानशासकः ।
सामान्यलक्षणचणः,पञ्चस्कन्धमयात्मदृक् ॥११२॥
भूतार्थभावनासिद्ध,श्चतुर्भूमिकशासनः ।
चतुरार्यसत्यवक्ता, निराश्रयचिदन्वयः ॥११३॥
योगो वैशेषिकस्तुच्छा, भावभित् षट्पदार्थदृक् ।
नैयायिकः षोडशार्थ,वादी पञ्चार्थवर्णकः ॥११४॥
ज्ञानान्तराध्यक्षबोधः, समवायवशार्थभित् ।
भुक्तैकसाध्यकर्मान्तो, निर्विशेषगुणामृतः ॥११५॥
साङ्ख्यः समीक्ष्यः कपिलः, पञ्चविंशतितत्त्ववित् ।
व्यक्ताव्यक्तज्ञविज्ञानी, ज्ञानचैतन्यभेददृक् ॥११६॥
अस्वसंविदितज्ञान, वादी सत्कार्यवादसात् ।
त्रिप्रमाणोऽक्षप्रमाणः, स्याद्वाहङ्कारिकाक्षदिक् ॥११७॥
क्षेत्रज्ञ आत्मा पुरुषो, नरो ना चेतनः पुमान् ।
अकर्ता निर्गुणोऽमूर्तो, भोक्ता सर्वगतोऽक्रियः ॥११८॥
द्रष्टा तटस्थः कूटस्थोः, ज्ञाता निर्बन्धनोऽभवः ।
बहिर्विकारो निर्मोक्षः, प्रधानं बहुधानकम् ॥११९॥
प्रकृतिः ख्यातिरारूढ, प्रकृतिः प्रकृतिप्रियः ।
प्रधानभोज्योऽप्रकृति, र्विरम्यो विकृतिः कृती ॥१२०॥
मीमांसकोऽस्तसर्वज्ञः, श्रुतिपूतः सदोत्सवः ।
परोक्षज्ञानवादीष्ट, पावकः सिद्धकर्मकः ॥१२१॥

चार्वाको भौतिकज्ञानो,भूताभिव्यक्तचेतनः ।
प्रत्यक्षैकप्रमाणोऽस्त, परलोको गुरुश्रुतिः ॥१२२॥
पुरन्दरविद्धकर्णो, वेदान्ती संविदद्वयो ।
शब्दाद्वैती स्फोटवादी, पाखण्डघ्नो नयौघयुक् ॥१२३॥

॥ इति बुद्धशतम् ॥ ९ ॥

अन्तकृत् पारकृत् तीर, प्राप्तः पारेतमः स्थितः ।
त्रिदण्डी दण्डितारातिं, र्ज्ञानकर्मसमुच्चयी ॥१२४॥
संहृतध्वनिरुत्सन्न,योगः सुप्तार्णवोपमः ।
योगस्नेहापहो योग, किट्टिनिर्लेपनोद्यतः ॥१२५॥
स्थितस्थूलवपुर्योगो, गीर्मनोयोगकार्श्यकः ।
सूक्ष्मवाक् चित्तयोगस्थः, सूक्ष्मीकृतवपुःक्रियः ॥१२६॥
सूक्ष्मकायक्रियास्थायी, सूक्ष्मवाक्चित्तयोगहा ।
एकदण्डी च परमहंसः, परमसम्वरः ॥१२७॥
नैःकर्म्यसिद्धः परम, निर्जरः प्रज्वलत्प्रभः ।
मोघकर्मा त्रुटत्कर्म, पाशः शैलेश्यलङ्कृतः ॥१२८॥
एकाकाररसास्वादो, विश्वाकाररसाकुलः ।
अजीवन्नमृतोऽजाग्र,दसुप्तः शून्यतामयः ॥१२९॥
प्रेयानयोगी चतुर, शीतिलक्षगुणोऽगुणः ।
निष्पीतानन्तपर्यायो, ऽविद्यासंस्कारनाशकः ॥१३०॥
वृद्धो निर्वचनीयोऽणु, रणीयाननणुप्रियः ।
प्रेष्ठः स्थेयान् स्थिरोऽनिष्ठः, श्रेष्ठो ज्येष्ठः सुनिष्ठितः १३१

भूतार्थशूरो भूतार्थ, दूरः परमनिर्गुणः ।
व्यवहारसुषुप्तोऽति, जागरूकोऽतिसुस्थितः ॥१३२॥
उदितोदितमाहात्म्यो, निरुपाधिरकृत्रिमः ।
अमेयमहिमात्यन्त, शुद्धः सिद्धिस्वयंवरः ॥१३३॥
सिद्धानुजः सिद्धपुरी,पान्थः सिद्धगणातिथिः ।
सिद्धसङ्गोन्मुखः सिद्धा,लिङ्ग्यः सिद्धोपगूहकः ॥१३४॥
पुष्टोऽष्टादशसहस्र, शीलाश्वः पुण्यसम्बलः ।
वृत्ताप्तयुग्यः परम, शुक्ललेश्योऽपचारकृत् ॥१३५॥
क्षेपिष्ठोऽन्त्यक्षणसखा, पञ्चलघ्वक्षरस्थितिः ।
द्वासप्ततिप्रकृत्यासी, त्रयोदशकलिप्रणुत् ॥१३६॥
अवेदोऽयाजकोऽयज्यो, ऽयाज्योऽनग्निपरिग्रहः ।
अनग्निहोत्री परम, निःस्पृहोऽत्यन्तनिर्दयः ॥१३७॥
अशिष्योऽशासकोऽदीक्ष्यो, ऽदीक्षकोऽदीक्षितोऽक्षयः ।
अगम्योऽगमकोऽरम्यो, ऽरमको ज्ञाननिर्भरः ॥१३८॥

॥ इत्यन्तकृच्छतम् ॥ १० ॥

महायोगीश्वरो द्रव्य,सिद्धोऽदेहोऽपुनर्भवः ।
ज्ञानैकचिज्जीवघनः, सिद्धो लोकाग्रगामुकः ॥१३९॥

॥ इत्यन्ताष्टकम् ॥ १ ॥

इदमष्टोत्तरं नाम्नां, सहस्रं भक्तितोऽर्हताम् ।
योऽनन्तानामधीतेऽसौ, मुक्त्यन्तां भुक्तिमश्नुते ॥१४०॥

# बृहत्सुप्रभातस्तोत्रम्

विद्याधरामरनरोरगयातुधान !
सिद्धासुराधिपतिसंस्तुतपादपद्म !
हेमद्युते ! वृषभनाथ ! युगादिदेव !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१॥

प्रोत्फुल्लचारु कुसुमोच्चय हेमवर्ण !
पापापनोदिकिरणांकरसाभिरूढ !
रागादिदोषरहिताऽजित चारुमूर्ते !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥२॥

प्रोद्दामदर्पमकरध्वज कुष्णवर्ण !
तापोपशान्ति निपुणोन्नतवारिवाह !
चामीकराभहृत कल्मष सम्भवेश !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥३॥

सद्धर्ममार्ग गहनानुगतार्थसार !
वाणीविशेषरचनाप्रहतान्धकार !
देवाभिनन्दनसुवर्णविभाभिराम !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥४॥

मज्जद् भवाम्बुनिधिमध्य समस्त जन्तु,
हस्तावलम्ब ! सुमते ! निहतारिवर्ग !
विद्युच्छटाभ ! विषयेन्धनवह्निरूप !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥५॥

पद्मप्रभाभिहृतपद्मदलायताक्ष !
पद्मानन ! प्रकटपादसुपद्मलक्ष्म !
पद्मप्रभापटलपाटलदेहदीप्ते !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥६॥

दुष्टारिकर्मकठिनोमलग्रन्थिबद्ध !
सद्भेदनैकनिरतामरराजनूत !
क्षीराङ्गरागरुचिराङ्ग ! विभो ! सुपार्श्व !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥७॥

चापल्यहीनकृतचित्तवितानयोगि !
चिन्ताधिगम्य विमलाखिलवाङ्मूर्ते !
चन्द्रप्रभाभिविमलेन्दुकलावदात !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥८॥

रागान्धदेवकृतशासननाशनैक !
ध्यानाग्निदग्धदुरितोत्तमोवितान !
प्रालेयशैलशिखरप्रभपुष्पदन्त !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥९॥

निर्वाणसौख्यकरदुर्लभवस्तुभूत !
रत्नत्रयाभिरतमानवकामधेनो !
हेमप्रभाभिघनशीतलशीतलांशो !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१०॥

हेमाब्जलाभ ! भयवर्जित ! सौम्यमूर्ते !
श्रेयश्च शर्ममयशान्तविकारभाव !
लोकाग्रसारपदवीस्थिर संस्थितात्मन् !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥११॥

सन्ध्योपरागरुचिराङ्ग ! सहस्रभानो !
तेजोऽधिकाखिल जगत् प्रतियन्त्रमान !
दुर्वारवैरिबलमर्दन ! मासपूज्य !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१२॥

गन्धर्वयक्षखचरोरगदैत्यनाथ !
सम्पूजिताङ्घ्रियुगलोरुमहाप्रकाश !
ध्वस्तारिवर्ग ! विमलामलचारुरूप ।
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१३॥

स्वर्गापवर्गसुखसङ्गमसंविधान !
शुद्ध !प्रबुद्ध ! सदनन्त ! मुनीन्द्रचन्द्र !
राजीवकेशरपरागरुचेऽवदात !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१४॥

धर्मप्रसिद्धसकलागमवस्तुमूल !
यत्नोपलभ्य ! नवभानुसमानदीप्ते !
मात्सर्यहीन ! नरकान्तक ! कामशत्रो !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१५॥

शान्त ! प्रशान्त ! सकलाहितशान्तिनाथ !
देवाधिराजनुतपाद युगारविन्द !
तप्तानलाभ ! भवनिर्मथनैकभाव !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१६॥

कुन्थो ! कुतीर्थकरदेवमतङ्गजौघ !
विद्रावणाभिरतिकेसरिशक्तिसार !
सन्तप्तचारु तपनीयसमानदीप्ते !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१७॥

देवाधिनाथ ! मनुजेश्वर ! नागराज !
सन्दोहशुभ्रतरसंविहितापत्र !
हेमप्रभाभ ! रतिनायकदर्पहारिन् !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१८॥

मात्सर्यमानमदमोहजराविराम !
जन्मामयारिपरिवर्जितचित्तवृत्ते !
जाम्बूनदाभ ! भुवनेश्वर ! मल्लिनाथ !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥१९॥

क्षीणारिवर्ग ! मुनिसुव्रत ! सुव्रतेश !
संसारसागरसमुत्तरणैकसेतो !
भिन्नेन्द्रनील बहलोल्लसिताङ्गराग !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥२०॥

कारुण्यसार ! वरधर्मरथ त्रिलोक ! ।
चेतोभिलष्यफलपुष्पसुकल्पवृक्ष ! ॥
मायाविहीन ! नमिनाथ ! सुवर्णवर्ण ! ।
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥२१॥

दुर्भेदकर्मदलनोन्नतरिष्टनेमि ।
नाथावतंस कुसुमाभ सुभव्यमूर्ते ! ॥
नष्टारिवर्ग ! यदुवंशनभोमृगाङ्क ! ।
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥२२॥

प्राग्दुष्टकष्ट कमठासुरदर्पदाह ! ।
दाहोपघातकर ! निर्वृत ! पार्श्वनाथ ! ॥
चारुप्रियङ्गुसमवर्णविराजिताङ्ग ! ।
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥२३॥

सर्वार्थसाधक ! समुद्रगभीर ! धीर ! ।
चामीकरस्फुरदनिन्द्यितकायकान्ते ! ॥
चिन्तामणे ! भुवनभूषण ! वर्द्धमान !
श्रीमज्जिनेन्द्र ! विमलं मम सुप्रभातम् ॥२४॥

विद्युत्प्रभाचकलिकामणिकं स्वरूपम् ।
कण्ठेन शुद्धगुणसंग्रथितं क्रमेण ॥
ये धारयन्ति मनुजा जिननाथभक्त्या ।
निर्वाणपादपफलं खलु ते लभन्ते ॥२५॥

# लघुसुप्रभातस्तोत्रम्

( श्रीवाग्भट्टाचार्यविरचित ) नेमिनिर्वाणात्तृतीयसर्गात उद्धृतं

[1]सिद्धिप्रयातमतिदीर्घतरैस्तपोभिः[2]
संस्मृत्य मन्त्रमिव यं सहसा जनोऽयम् ।
विश्लिष्यते [3]कलुषदोषविषेण देवः,
स श्रीजिनो जनयतान्मम सुप्रभातम् ॥ १ ॥

१ प्राप्त २ द्वादशविधतपश्चरणैः पक्षे मन्त्रसाधन कथितैस्तपोभिः

३ कलुषं पापं दोषा रागद्वेषादयः कलुषं च दोषाश्च कलुषदोषं समाहार द्वन्द्वत्वाद् एकवचनं तदेव विषं तेन । पक्षे कलुषं चित्तखेदः दोषा वात-पित्तादय। कलुषेण उपलक्षिता दोषा यस्मात् विषात् तत्कलुषं च दोषं च तदेव विषं तेन ।

छत्रत्रयं विशदशारदचन्द्रचारु,
यस्य व्यनक्ति[×] भुवनत्रितयप्रभुत्वम् ।
[४]सर्वप्रभावविभवप्रभवप्रभावान्,
स श्रीजिनो जनयतान्मम [५]सुप्रभातम् ॥ २ ॥

× प्रकटयति ४ समस्त माहात्म्य विभूत्युद्भवभामण्डलयुक्त।

५ सुशोभनं प्रभातं ।

भामण्डलेन वदनेन च भूरिधाम्ना,
यः [1]शोभमानविमलाकृतिरेति [2]लक्ष्मीम् ।
आस[3]न्नभानुशशिनः [4]कनकाचलस्य,
स श्रीजिनो जनयतान्मम सुप्रभातम् ॥ ३ ॥

१ एति गच्छति प्राप्नोतीत्यर्थः २ शोभां ३ निकटसूर्यचन्द्रस्य ४ मेरोः

यं वीक्ष्य विस्मयविधायिवपुःस्वरूप-,
[1]मत्यन्तविस्मृतशिलीमुखमोक्षकर्मा[2] ।
कामं [3]कराकलितकार्मुक एव तस्थौ[4],
स श्रीजिनो जनयतान्मम सुप्रभातम् ॥ ४ ॥

१ बाणस्य २ कर्ममोचनक्रिया यस्य स तथोक्तः ३ हस्तधृतचापः ४ संस्थितः ।

यस्या [1]ङ्घ्रिपद्मयुगसन्ततसन्निधाना-
दासीदशेषि इति कीर्तिपदं कुतोऽपि ।
आलम्बनं [2]निरयमापततां जनानां,
स श्रीजिनो जनयतान्मम सुप्रभातम् ॥ ५ ॥

१ यच्चरणकमलयुगलनिरन्तरसमीपात् २ नरक ।

[1]भास्वत्प्रदीपनिभधर्मकथोपदेश-,
दीपेन यस्य दलिते[2] तमसाप्रसङ्गे ।
पश्यन्ति मुक्तिपदवीं मुनयः सुखेन,
स श्रीजिनो जनयतान्मम सुप्रभातम् ॥ ६ ॥

१ सूर्यप्रदीपसमानपुण्यवार्ता कथनप्रकाशेन २ अज्ञानानां पक्षे अन्धकाराणां सम्पर्के ।

यः [1]कुपदेशपतितं जन[2]मन्धमेव-,
[3]मभ्युद्धरत्यलघुवाग्गुणवैभवेन ।
निष्कारणैककरुणाकरतां[4] दधानः,
स श्रीजिनो जनयतान्मम सुप्रभातम् ॥ ७ ॥

१ कुत्सितोपदेशपतित पक्षे कूपस्य देशः प्रदेशः मध्यविभागः तत्र पतितं ।
२ सम्यग्दृष्टिरहित मिथ्यात्वसहितमित्यर्थः पक्षे नेत्ररहितं । ३ दीर्घ वचन गुण प्रभावेन पक्षे वागेव गुणः दोरक वाग्गुणः अलघुश्चासौ वाग्गुणश्च तस्य वैभवेन । ४ करुणां करोतीति करुणाकरस्तस्य भावः करुणाकरता ताम् । अथवा करुणायाः आकरः उत्पत्ति स्थानं तस्य भावः करुणाकरता तां पक्षे करुणा एव करः हस्तस्तस्य भावः करुणाकरता ताम् ।

# सुप्रभाताष्टकम् ।

निःशेषावरणद्वयस्थितिनिशाप्रान्तेऽन्तरायक्षयाद्,
द्योते मोहकृते गते च सहसा निद्राभरे दूरतः ।
सम्यग्ज्ञानदृगक्षियुग्ममभितो विस्फारितं यत्र तत्,
लब्धं यैरिह सुप्रभातमचलं तेभ्यो जिनेभ्यो नमः ॥१॥

यत्सच्चक्रसुखप्रदं यदमलं ज्ञानप्रभाभासुरं,
लोकालोकपदप्रकाशनविधिप्रौढं प्रकृष्टं सकृत् ।
उद्भूते सति यत्र जीवितमिव प्राप्तं परं प्राणिभिः,
त्रैलोक्याधिपतेर्जिनस्य सततं तत्सुप्रभातं स्तुवे ॥ २ ॥

एकान्तोद्धतवादिकौशिकशतैर्नष्टं भयादाकुलैः,
जातं यत्र विशुद्धखेचरनुतिव्याहारकोलाहलम् ।
यत्सद्धर्मविधिप्रवर्धनकरं तत्सुप्रभातं परं,
मन्येऽर्हत्परमेष्ठिनो निरुपमं संसारसन्तापहृत् ॥ ३ ॥

सानन्दं सुरसुन्दरीभिरभितः शक्रैर्यदा गीयते,
प्रातः प्रातरधीश्वरं यदतुलं वैतालिकैः पठ्यते ।
यच्चाश्रावि नभश्चरैश्च फणिभिः कन्याजनाद् गायतः,
तद्वन्दे जिनसुप्रभातमखिलं त्रैलोक्यहर्षप्रदम् ॥ ४ ॥

उद्योते सति यत्र नश्यति तरां लोकेऽघचौरोऽचिरं,
दोषेशोऽन्तरतीव यत्र मलिनो मन्दप्रभो जायते ।

यज्ञानीतितमस्ततेर्विघटनाज्जाता दिशो निर्मला,
वन्द्यं नन्दतु शाश्वतं जिनपतेस्तत्सुप्रभातं परम् ॥ ५ ॥

मार्गं यत्प्रकटीकरोति हरते दोषानुषङ्गस्थितिं,
लोकानां विदधाति दृष्टिमचिरा-दर्थावलोकक्षमाम् ।
कामासक्तधियामपि कृशयति प्रीतिं प्रियायामिति,
प्रातस्तुल्यतयाऽधिकोऽपि रविणापूर्वः स्वगतोऽर्हन्नाद् ।६।

यद्भानोरपि गोचरं न गतवान् चित्ते स्थितं तत्तमो,
भव्यानां दलयत्तथा कुवलये कुर्याद्विकाशश्रियम् ।
तेजः सौख्यहतेरकर्तृ यदिदं नक्तञ्चराणामपि,
क्षेमं वो विदधातु जैनमसमं श्रीसुप्रभातं सदा ॥ ७ ॥

भव्याम्भोरुहनन्दिकेवलरविः प्राप्नोति यत्रोदयं,
दुष्कर्मोदयनिद्रया परिहृतं जागर्ति सर्वं जगत् ।
नित्यं यैः परिपठ्यते जिनपतेरेतत्प्रभाताष्टकम्,
तेषामाशु विनाशमेति दुरितं धर्मः सुखं वर्धते ॥ ८ ॥

## दर्शनपाठः

दर्शनं जिनपतेः शुभावहं, सर्वपापशमनं गुणास्पदं ।
स्वर्गसाधनमुशन्ति साधवो, मोक्षकारणमतः परं च किं ? ॥१॥

दर्शनं जिनरवेः प्रतापवत्, चित्तपद्मपरमप्रकाशकम् ।
दुष्कृतैकतिमिरापहं शुभं, विघ्नवारिपरिशोषकं सदा ॥ २ ॥

दर्शनं जिननिशापतेः परं, जन्मदाहशमनं प्रशस्यते ।
पुण्यनिर्मलसुधाप्रवर्षणं, वर्धनं सुखपयोनिधेः सतः ॥ ३ ॥
दर्शनं जिनसुकल्पवृक्षकः, कल्पितं हि जगतां प्रदृश्यते ।
सर्वलोकपरितापनाशनं, पल्फलीति फलतो महीतले ॥ ४ ॥
दर्शनं जिनसुकामगौरलं, कामितं भवति यत्प्रसादतः ।
दोग्धि दुग्धमपि चित्तकाम्यया, शुद्धमेव मन इत्युदाहृतं ॥५॥
दर्शनं जिनपयोनिधेर्भृशं, सौख्यमौक्तिकसमूहदायकं ।
सद्धनं गुणगभीरमुत्तमं, ज्ञानवारिविपुलप्रवाहकम् ॥ ६ ॥
अद्याभवत्सफलता नयनद्वयस्य,देव ! त्वदीयचरणाम्बुजवीक्षणेन
अद्यत्रिलोकतिलक ! प्रतिभासते मे,संसारवारिधिरयं चुलुकप्रमाणम् ७
किसलयितमनल्पं त्वद्विलोकाभिलाषात्,
कुसुमितमतिसान्द्रं त्वत्समीपप्रयाणात् ।
मम फलितममन्दं त्वन्मुखेन्दोरिदानीम्,
नयनपथमवाप्ताद् देव ! पुण्यद्रुमेण ॥ ८ ॥
शर्वरीषु शशिना प्रयोजनं, भास्करेण दिवसे किमीश्वर !
त्वन्मुखेन्दुदलिते तमस्तते, भूतलेऽत्र तकयोस्तु का स्तुतिः ॥९॥
अमितगुणगणानां त्वद्गतानां प्रमाणं,
भवति समधिगन्तुं यस्य कस्याऽपि वाञ्छा ।
प्रथममपि स तावद् व्योमकल्यङ्कलानी-,
त्यनघ ! सुगम ! सङ्ख्याभ्यासमङ्गीकरोतु ॥१०॥

देव ! त्वदङ्घ्रिनखमण्डल दर्पणेऽस्मिन् ,
अर्घ्ये निसर्गरुचिरे चिरदृष्टदृष्टिः ।
श्रीकीर्तिकान्तिधृति-सङ्गमकारणानि,
भव्यो न कानि लभते शुभमङ्गलानि ॥ ११ ॥

त्वद्दर्शनं यदि ममास्ति दिने दिनेऽस्मिन् ,
देव ! प्रशस्तफलदायि सदा प्रसन्नं ।
कल्पद्रुमार्णवसुरगृहमन्त्रविद्या-
चिन्तामणिप्रभृतिभिर्नहि कार्यमस्ति ॥ १२ ॥

शरीरिकायस्थितिसङ्गदर्शिनं, निरञ्जनं निर्दुरितं निरामयं ।
अमोघविद्यं निरवद्ययोगिनं, शरण्यतां यामि तमद्य शान्तये ।१३।

समस्तवस्तुप्रतिभासमूर्तये, जगत्त्रयानन्दनिकेतकीर्तये ।
जिनाय सर्वेप्सितकामधेनवे, समस्तमोध्वंसविघातभानवे ॥१४॥

मोहध्वान्तविदारणं विशदविश्वोद्भासिदीप्तिश्रियम्,
सन्मार्गप्रतिभासकं विबुधसन्दोहामृतापादकम् ।
श्रीपादं जिनचन्द्रशान्तिशरणं सद्भक्तिमानेमि ते,
भूयस्तापहरस्य देव ! भवतो भूयात्पुनर्दर्शनं ॥ १५ ॥

## दर्शनपाठः पद्मनन्दिविरचितः

त्रिभुवनगुरो ! जिनेश्वर ! परमानन्दैककारण ! कुरुष्व ।
मयि किङ्करेऽत्र करुणा यथा तथा जायते मुक्तिः ॥ १ ॥

निर्विण्णोऽहं नितरामर्हन् ! बहुदुःखया भवस्थित्या ।
अपुनर्भवाय भवहर ! कुरु करुणामत्र मयि दीने ॥ २ ॥

उद्धर मां पतितमतो विषमाद् भवकूपतः कृपां कृत्वा ।
अर्हन्नलमुद्धरणे त्वमसीति पुनः पुनः वच्मि ॥ ३ ॥

त्वं कारुणिकः स्वामिन् ! त्वमेव शरणं जिनेश ! तेनाहं ।
मोहरिपुदलितमानः फूत्करणं तव पुरः कुर्वे ॥ ४ ॥

ग्रामपतेरपि करुणा परेण केनाप्युपद्रुते पुंसि ।
जगतां प्रभो ! न किं तव जिन ! मयि खलकर्मभिः प्रहते ॥५॥

अपहर मम जन्म दयां कृत्वाचेत्येकवचसि वक्तव्ये ।
तेनातिदग्ध इति मे, देव ! बभूव प्रलापित्वम् ॥ ६ ॥

तव जिनवर ! चरणाब्जयुगं, करुणामृतसङ्गशीतलं यावत् ।
संसारतापतप्तः, करोमि हृदि तावदेव सुखी ॥ ७ ॥

जगदेकशरण ! भगवन् ! नौमि श्रीपद्मनन्दितगुणौघ ।
किं बहुना ? कुरु करुणामत्र जने शरणमापन्ने ॥ ८ ॥

## दर्शनपाठः

दृष्टे त्वयि जिनाधीश ! भवाम्भोधिमतारिषम् ।
आप्तमभ्युदयं सर्वं निःश्रेयसमशिश्रयम् ॥ १ ॥

दृष्टे त्वयि जगद्वन्द्य ! दृष्टो दुःखाम्बुधेस्तटः ।
दृष्टश्चाभ्युदयोपायो दृष्टः पन्थाश्च निर्वृतेः ॥ २ ॥

दृष्टे त्वयि जगन्नाथ! दृष्टाशेषजगत्त्रय!
धन्योऽस्मि पुण्यवानस्मि पूतोऽस्मि महितोऽस्म्यहम् ॥३॥

दृष्टे त्वयि जगत्त्रात! जन्ममृत्युजरापह!
जन्म मे सफलं सद्यः सफले मम चक्षुषी ॥ ४ ॥

दृष्टे त्वयि महौदार्य! दृष्टः कल्पमहीरुहः।
दृष्टा कामदुघा धेनुर्दृष्टश्चिन्तामणिः स्फुटम् ॥ ५ ॥

दृष्टे त्वयि महिष्ठोक्ते! दृष्टिस्त्रैलोक्यदुर्लभा।
स्पष्टीभवति मे देव! दृष्टैः किं कल्पितैः परैः ॥ ६ ॥

दृष्टे त्वयि परंज्योतिर्मिथ्यात्वध्वान्तसन्ततिः।
प्रध्वंसं प्रतिपन्नैव दुःखसन्तानकारणम् ॥ ७ ॥

दृष्टे त्वयि जगन्मित्र! जातो मे पुण्यशासन!
जन्मजन्मकृताशेषघोरपापक्षयोऽधुना ॥ ८ ॥

दृष्टे त्वयि निराबाध! दुष्टा दुर्गतिराक्षसी।
न द्रक्ष्यति मुखं जातु मदीयं सद्गतिप्रद! ॥ ९ ॥

दृष्टे त्वयि प्रभो! तिर्यग्गतिकारागृहादहम्।
निर्गतः पुनरावृत्त्या निसर्गाद् युगदुःखतः ॥ १० ॥

दृष्टे त्वयि भवाशेष! मानुष्यादिभवार्तयः।
न स्युर्मे दैन्यचिन्ताद्यास्तमांसीवार्कदर्शिनः ॥ ११ ॥

दृष्टे त्वयि महादेव! कुदेवभवदुर्दशा।
मया सहानवस्थानविरोधं प्रतिपत्स्यते ॥ १२ ॥

दृष्टे त्वयि जिन ! प्राप्तं यन्त्रधारागृहं मया ।
संसारग्रीष्मघर्मांशुतप्तेनातितरां चिरम् ॥ १३ ॥

दृष्टे त्वयि महोपाय ! दृष्टः कारुणिको भिषक् ।
चिरं भवमहाव्याधिबाधितेन मयाऽधुना ॥ १४ ॥

दृष्टे त्वयि जगत्पूज्य ! प्राप्तं राज्यमिदं मया ।
आजवञ्जवदारिद्र्यदह्यमानेन सन्ततम् ॥ १५ ॥

दृष्टे त्वयि महाविद्य ! सद्वेद्यं सद्विपाककम् ।
शुभायुर्नामगोत्राणि सञ्चितान्येव साम्प्रतम् ॥ १६ ॥

दृष्टे त्वयि जगज्ज्येष्ठ ! शिष्टाभीष्टफलप्रद !
दृष्टार्थसिद्धिरेवाद्य दृष्टा साक्षादनेकधा ॥ १७ ॥

दृष्टे त्वयि महादानं दत्तं कल्पमहाद्रुम !
स्वर्भोगकर्मभूभातिविविधाभ्युदयश्रियः ॥ १८ ॥

दृष्टे त्वयि महाब्रह्मन् ! ननुभावपराक्रमैः ।
न हि मे दुर्लभः सार्व ! सार्वभौमादिसम्भवः ॥ १९ ॥

दृष्टे त्वयि त्रिलोकीश ! भुवनत्रयजामराः ।
सोढ्या एव मम भ्रान्तेः का कथा खचराधिपाः ॥२०॥

दृष्टे त्वयि च्युतानन्त ! नित्यानन्दपदप्रद !
इन्द्राहमिन्द्रसम्पत्ति यद्गमन्ये न नश्वरीम् ॥ २१ ॥

दृष्टे त्वयि गुणाम्भोधे ! गुणानां महतां गणः ।
शीलानां निचयः सद्यो मयाऽऽसादि दुरासदः ॥२२॥

दृष्टे त्वयि मुनिस्तुत्य ! मुनीनां विविधर्द्धयः ।
तदप्यचिन्त्यमाहात्म्यं सम्पन्नं हि मे प्रभो ! ॥२३॥
दृष्टे त्वयि पुमर्थस्य परां काष्ठामधिष्ठित !
नैःश्रेयसं सदा सौख्यं शस्तं हस्ते कृतं मया ॥ २४ ॥
यो भव्यो भगवन् ! पश्येत् सर्वदा भक्तिनिर्भरः ।
तस्य यद् दुर्लभं सौख्यं नाभून्नास्ति न भावितम् ॥२५॥
ततस्त्वमेव लोकाना मनिमित्तैकबान्धवः ।
त्वमेव सर्वलोकैक हितधर्मोपदेशकः ॥ २६ ॥
त्वामेव मोक्षमार्गस्य नेतारं कर्मभूभृताम् ।
भेत्तारं विश्वतत्त्वानां ज्ञातारं मुनयो विदुः ॥ २७ ॥
त्वया योगाग्निना घाति-गहनं भस्मसात्कृतम् ।
त्वयाप्तं विश्वविश्वैक सारानन्तचतुष्टयम् ॥ २८ ॥
नमस्तुभ्यं चतुस्त्रिंशत्प्रवरातिशयास्पद !
नमस्तुभ्यं महाप्राति-हार्याष्टकपरिष्कृत ! ॥ २९ ॥
नापरस्त्वदृते देवो नापरोऽस्ति महेश्वरः ।
नापरस्त्वदृते ब्रह्मा नापरः पुरुषोत्तमः ॥ ३० ॥
त्वयैव सत्यतत्त्वोप-देशः स्यात्पदलाञ्छितः ।
तवैव मतमार्याणां स्वर्मोक्षपादनक्षमम् ॥ ३१ ॥
त्वय्येवानन्यसामान्य-पञ्चकल्याणसम्पदः ।
त्वय्येवानन्यसम्भाव्य-नव केवललब्धयः ॥ ३२ ॥

ज्ञापिताशेषवेदार्थक्षपितारातिशासन !
सज्ज्ञान ! ज्ञाननेत्राणामज्ञानं हर मे हर ! ।। ३३ ।।

जयाखिलजगज्ज्योतिः स्वरूपानन्दमन्दिर !
जय त्रैलोक्यराज्याधिपतित्वमहिमास्पद ! ।।३४।।

जय विश्वमयत्वादिगुणनामोपलक्षित !
जय स्वबोधमुकुरप्रतिबिम्बितभूत्रय ! ।। ३५ ।।

जय सप्तास्यधर्मोपदर्शिभामण्डलाञ्चित !
जय सर्वजगद्दर्शिदिव्यवाङ्मयदर्पण ! ।। ३६ ।।

जय लोकत्रयाराध्य ! जय लोकैकमङ्गल !
जय लोकशरण्यार्हन् ! जय लोकोत्तम ! प्रभो ! ।।३७।।

जयानन्तगुणाधार ! जय वाचामगोचर !
जय भक्तजनस्तुत्य ! जय भक्तवरप्रद ।। ३८ ।।

यस्त्वां पश्यति विश्वलोकतिलक ! श्रीमज्जिनेन्द्रप्रभो !
भक्त्या भव्यवरः स एव सुकृती प्राज्ञः कृतार्थः कृती ।
विद्याविक्रमकीर्तिपुण्यनिलयो भोगोपभोगानसौ,
भुक्त्वा मुक्तिमुपैति सप्तपरमस्थानक्रमेण ध्रुवम् ।।३९।।

देवाद्वितीयवरसद्गुणरत्नराशे !
देवासुराधिपतिपूज्य ! शुभैकलभ्यम् ।
त्वद्दिव्यपादकमलं जिन ! पश्यतो मे,
त्वय्येव भक्तिरचला भवतु प्रभूता ।। ४० ।।

# दर्शनपाठः

दृष्टं श्रीमदिदं जिनेन्द्रसदनं स्याद्वादविद्यारस-
स्वादाह्लादसुधाम्बुधिप्लवलसद्भव्यौघक्लृप्तोत्सवम् ।
अत्रासाद्य सपद्यवद्यभिदुरां चित्तप्रसत्तिं परां,
संभक्तुं प्रभवोऽस्मि सद्दृशमलं मुक्तिश्रियः शम्फलीम् ॥१॥
उत्पादव्ययनित्यतात्म सदिति न्यक्षेपिवाग्वेदना-
दभ्यासप्रतिबन्धकक्षयसुखप्रग्राहितानुग्रहात् ।
यः सांसिद्धिकबोधमाप्य परमं पश्यन् समग्रं समं,
हस्तस्थाऽमलकोपमं प्रदिशति स्याद्वादमव्यात् स माम् ॥२॥
अर्हद्देव ! नमो नमः समरसीभावाऽनुभावात्स्फुरत्-
चिच्छक्ति प्रचयोच्छ्रित ! जय जय प्रोद्बुद्धबोधेक्षण ! ।
दृग्दानेन मयि प्रसीद भगवन् ! वर्द्धस्व मुक्त्यङ्गना-
भ्रूभङ्गोत्सव ! नन्द नन्द वरद ! स्वान्तं पुनीतान्मम ॥३॥
दृष्टः स त्वमशेषसत्त्वकरुणाकूपार ! सारस्वत-
श्रीपारङ्गमबुद्धयस्त्रिजगतां यं त्राणमेकं विदुः ।
तन्नूनं सुदिनोऽहमद्य परमा हस्ते रमाद्यैव मे,
प्राप्तोऽस्म्यद्य भवार्णवान्तमनघं सानाथ्यमद्यैव मे ॥४॥
उच्चैः स्फूर्जद्बीजयोगभिदुरा घातिक्षितीध्रानुरून्,
भित्त्वानन्तमहिम्नि धाम्नि भमिव व्योम्न्येकमालोकयन् ।
लोकालोकमृषीन्द्रचक्रिमहितस्तीर्थं चतुस्त्रिंशता,
कुर्वाणोऽतिशयैः सतामसिगतिः सत्प्रातिहार्याष्टकैः ॥५॥

देव ! श्रीजिन ! राजराजसदृशाः केचित्त्वयीमे ज्वलज्-
ज्योतिष्पुञ्जमदमिष्टितो यदि हठाद्भोग्याः श्रिया तेन किम् ।
यज्ज्ञात्वा पुनरुद्भिदेलिमचिरा, नन्दामृतस्रोतसि,
श्रद्धाः त्वयि न स्फुरन्ति हिरुक्तत् तत्कस्य वाग्गोचरः ॥६॥

शब्दब्रह्ममयूखमालिनो जगत्कर्मप्रभाशालिनि,
प्रस्थास्नुः पुरुषायुषो भवविपदुर्दैन्यच्छिदं त्वां प्रति ।
श्रीमत्सिद्धरसेन्द्र ! मोहशिखरिग्रस्तेऽत्र दोषोदयात्,
सीदेयं यदि तर्हि तात ! तनुतात् स्वे नाम्नि वाचालताम् ॥७॥

निघ्नानोऽपि समूलघातमसकृद् योगास्त्रपातैर्द्विषा-
मापद्व्यक्तमुपास्य च श्रमफलालाभात् स्वयं याचिनी ।
मुक्तं भ्राम्यति पुण्यदूतद्रुपभे शस्त्रं यथोद्कूचितं,
मुक्तास्त्रेष्वपि तेषु मुञ्चसि विभो ! कः क्षत्रधर्मस्तव ॥८॥

पुण्योद्रेकविपक्त्रिमं निरुपमं भावत्कमेतद्वपुः,
पश्यद्भिर्गणशो युनक्ति सुकृतं यद्भाक्तिकैस्तत्क्षमम् ।
सन्तानानतिवर्चनाज्जिनपते ! यत्त्वेतदेवेति तै-
र्दृष्टस्त्वं सुकृतान्यपि क्षपयते चित्रीयतेऽतीव तत् ॥९॥

यः श्रायःपथिकैर्महर्षिभिरपि स्तुत्यः कथञ्चित्प्रभो !
शास्तस्यैव तव स्तवे मुखरयन् गल्भेय नाहं कथम् ।
भित्त्वा कियदेष काममभवद्भक्तिर्भ्रकुंसायते,
तल्लोकोत्तममङ्गलोऽसि शरणं स्वार्हन् ! प्रपन्नोऽञ्जसा ॥१०॥

# पञ्चपरमेष्ठिस्तवनम्

घातिप्रक्षयजाक्षयोर्जिति महा, धी सौख्यदृक् छक्तयः ।
कल्याणानि महन्ति पञ्च परम, श्रीप्रातिहार्याष्टकम् ।।
प्राप्ता ये भुवनत्रयै रतिशयैः, युक्ताश्चतुस्त्रिंशता ।
तानर्हाम्यमर्हतस्त्रिजगती, साम्राज्यलक्ष्मीपतीन् ।। १ ।।

बाह्याभ्यन्तरहेतुजातसुदृशः पूर्वैश्रुतैरादिमा-
च्छुक्लध्यानयुगाद्विजित्य दुरितं लब्ध्वा सयोगिश्रियम् ।
प्राप्यायोगिपदं परेण सकलं निर्जित्य कर्मोत्करम्
शुक्लध्यानयुगेन सिद्धसुगुणान्सिद्धान्समाराधये ।।२।।

कुमततिमिरसूर्यान् सारगम्भीरधैर्यान् ।
परहितनिजकार्यान् पञ्चभेदोद्धचर्यान् ।।
विनयनवधिवीर्यान् पूजयाम्यादृतार्यान् ।
मुनिजनपरिवार्यान् श्रीमदाचार्यवर्यान् ।। ३ ।।

दुःखावर्तसहस्रदुस्तरमहा, संसारघोराम्बुधि-
क्षिप्रप्रोत्तरणार्थसार्थजिनवाक्यामोपप्रोतप्रदान् ।
नित्यानन्दनिवासनिश्चलचिदात्मात्मानिशाभ्यासतः
स्वोऽभ्यासीभवदक्षयामृतपदान् श्रीपाठकार्यान्यजे ।। ४ ।।

त्यक्त्वा संगमशेषमक्षयपदोत्कण्ठास्तपोदुष्करम् ।
कुर्वन्तः प्रतिसंहृतेन्द्रियमरुत्स्वान्तः स्फुरच्चेतनाः ।।
ध्यानं धर्म्यमथापि शुक्लमपि ये कुर्वन्ति सर्वर्द्धयः ।
सर्वान्यानिह सर्वसंयमगुणास्तान्सर्वसाधून्यजे ।। ५ ।।

# अर्हत्स्तुतिः

जय जय जिनराज ! ध्वस्तदुर्मोहराज !
प्रहतमदनराज ! प्रह्वतदेवराज !
रुचिरतरविराज ! स्तुत्यशक्रादिराज !
प्रचुरसुगुणराजन् ! नच्युताधीशराज ! ॥ १ ॥

जय जय जिनधीर ! प्रप्लुतजन्माब्धिपार !
प्रथितविभवसार ! प्रौढतीर्थावतार !
प्रहृतहृतकमार ! प्रोद्गतानन्दपूर !
प्रहसितशतशूर ! प्रप्रकृष्टांशुभार ! ॥ २ ॥

जय जय जिनमित्र ! ध्वान्तविध्वंसमित्र !
स्वतिशयगुणगात्र ! ज्ञानविस्फूर्तिपात्र !
परमपदपवित्र ! प्रोल्लसद्देवयात्र !
प्रवरशरण ! चात्र प्राणिनामप्यमुत्र ॥ ३ ॥

जय जय जिनजैत्र ! क्ष्मात्रयारामचैत्र !
त्रिदशविधृतवेत्र ! श्वेतचित्रातपत्र !
निरतिशयचरित्र ! श्रीमदर्थोक्तिसूत्र !
स्वदुरघतरुदात्र ! श्रायसश्रीकलत्र ! ॥ ४ ॥

जय जय जिनतात ! भ्रातरत्यन्तपूत !
स्थिरतरसुखदातः ! कर्मसङ्घातघात !
कुमतजलदवात ! ध्येयजातप्रभात !
प्रवचनरथसूत ! ख्यातदेवाभिनूत ! ॥ ५ ॥

जय जय जिनचन्द्र ! छिन्नदुर्मोहतन्द्र !
प्रणतसुरनरेन्द्र ! स्वात्मलक्ष्मिन् ! मुनीन्द्र !
स्वतिशयगुणरुन्द्र ! प्रीणितप्राणिमन्द्र !
प्रवचनसरिदिन्द्र ! स्फीटभासान्द्रचन्द्र ! ॥६॥

जय जय जिनसेव्य ! प्राससुप्रीतभव्य !
त्रिभुवनमहितव्य ! स्वात्मसम्भावितव्य !
स्मृतपथनिहितव्य ! श्रेयसे भावितव्य !
वरदनमसितव्य ! प्रत्यहं कीर्तितव्य ! ॥ ७ ॥

जय जय जिननाथ ! ज्ञातसम्यक्सनाथ !
प्रतिहतरतिनाथ ! प्रास्तमोहाघनाथ !
नतसुरनरनाथ ! श्रीदलोकाधिनाथ !
श्रुतिकजदिननाथ ! श्रीवधूप्राणनाथ ! ॥ ८ ॥

नमदनिमिषखण्ड ! खण्डितानङ्गकाण्ड !
हसितलसिततुण्ड ! ध्यानधीराग्निकुण्ड !
सुगुणमणिकरण्ड ! जन्मवार्धौतरण्ड !
जिनमतचिदखण्ड ! श्राधसानन्दपिण्ड ! ॥ ९ ॥

जिनरूपं जिनलक्षणं जिनपदद्वन्द्वं जिनास्याम्बुजं,
जिननाम जिनमन्दिरं जिनकथालापं जिनोक्तागमं ।
जिनबोधं जिनदर्शनं जिनमहावीर्यं जिनश्रीसुखं,
जिनधर्मं जिनशासनं जिनगुणस्तोत्रं जगन्मङ्गलं ॥१०॥

इत्यर्हत्स्तुतिः ।

## अर्हत्स्तुतिः

कृतार्चनस्ततः स्तोतुं प्रारेभेऽसौ महामतिः ।
अर्थ्याभिः स्तुतिभिः साक्षात्कृत्य स्तुत्यं जिनेश्वरम् ॥१॥

नमो जिनेशिने तुभ्यं अनभ्यस्तदुराधये ।
त्वामद्याराधयामीश ! कर्मशत्रुबिभित्सया ॥ २ ॥

अनन्तास्त्वद्गुणाः स्तोतुं अशक्या गणधरैरपि ।
भक्त्या तु प्रस्तुवे स्तोत्रं भक्तिः श्रेयोऽनुबन्धिनी ॥३॥

त्वद्भक्तः सुखमभ्येति लक्ष्मीस्त्वद्भक्तमश्नुते ।
त्वद्भक्तिर्मुक्तये पुंसां मुक्तये या स्थवीयसी ॥ ४ ॥

अतो भजन्ति भव्यास्त्वां मनोवाक्कायशुद्धिभिः ।
फलार्थिभिर्भवान् सेव्यो व्यक्तं कल्पतरूयते ॥ ५ ॥

त्वया प्रवर्षता धर्मं वृष्टिं दुष्कर्मघर्मतः ।
प्रोदन्यद्भव्यसारङ्गसंप्रीता नवघनायितम् ॥ ६ ॥

त्वया प्रदर्शितं मार्गं आसेवन्ते हितैषिणः ।
भास्वता द्योतितं मार्गमिव कार्यार्थिनो जनाः ॥ ७ ॥

संसारोच्छेदने बीजं त्वया तत्त्वं निदर्शितम् ।
आत्रिकामुत्रिकार्थानां यतः सिद्धिरिहाङ्गिनाम् ॥ ८ ॥

लक्ष्मीसर्वस्वमुज्झित्वा साम्राज्यं प्राज्यवैभवम् ।
त्वया चित्रमुदूढासौ मुक्तिश्रीः स्पृहयालुना ॥ ९ ॥

दयावल्लीपरिष्वक्तो महोदर्को महोन्नतिः ।
प्रार्थितार्थान् प्रपुष्णाति भवान् कल्पद्रुमो यथा ॥१०॥
त्वया कर्ममहाशत्रून् उच्चैरुच्छेत्तुमिच्छता ।
धर्मचक्रं तपोधारं पाणौकृतमसम्भ्रमम् ॥ ११ ॥
न बद्धो भ्रकुटिन्यासो न दष्टौष्ठं मुखाम्बुजम् ।
न भिन्नसौष्ठवं स्थानं व्यरव्यरिजये त्वया ॥ १२ ॥
दयालुनापि दुःसाध्य मोहशत्रुजिगीषया ।
तपःकुठारे कठिने त्वया व्यापारितः करः ॥ १३॥
त्वया संसारदुर्वल्ली रूढाऽज्ञानजलोक्षणैः ।
नानादुःखफला चित्रं वर्द्धितापि न वर्द्धते ॥ १४ ॥
प्रसीदति भवत्पाद-पद्मे पद्मा प्रसीदति ।
विमुखे याति वैमुख्यं भवन्माध्यस्थमीदृशम् ॥ १५ ॥
प्रातिहार्यमयीं भूतिं त्वं दधानोऽप्यनन्यगाम् ।
वीतरागो महांश्चासि जगत्येतज्जिनाद्भुतम् ॥ १६ ॥
तवायं शिशिरच्छायो भात्यशोकतरुर्महान् ।
शोकमाश्रितभव्यानां विदूरमपहस्तयन् ॥ १७ ॥
पुष्पवृष्टिं दिवो देवाः किरन्ति त्वां जिनाभितः ।
परितो मेरुमुत्फुल्ला यथा कल्पमहीरुहाः ॥ १८ ॥
दिव्यभाषा तवाशेष भाषाभेदानुकारिणी ।
विकरोति मनोध्वान्तं अवाचामपि देहिनां ॥ १९ ॥

प्रकीर्णकयुगं भाति त्वां जिनोभयतो धुतम् ।
पतन्निर्झरसंवादि शशाङ्ककरनिर्मलम् ॥ २० ॥
चामीकरविनिर्माणं हरिभिर्धृतमासनम् ।
गिरीन्द्रशिखरस्पर्द्धि राजते जिनराज ! ते ॥ २१ ॥
ज्योतिर्मण्डलमुत्सर्पत् तवालङ्कुरुते तनुम् ।
मार्तण्डमण्डलद्वेषि विधुन्वज्जगतां तमः ॥ २२ ॥
तवोद्घोषयतीवोच्चैः जगतामेकभर्तृताम् ।
दुन्दुभिस्तनितं मन्द्रम् उबरत्यपि योधुचाम् ॥ २३ ॥
तवाविष्कुरुते देव ! प्राभवं भुवनातिगम् ।
विधुबिम्बप्रतिस्पर्द्धि छत्रत्रितयमुच्छ्रितं ॥ २४ ॥
विभ्राजते जिनैतत्ते प्रातिहार्यकदम्बकम् ।
त्रिजगत्सारसर्वस्वमिवैकत्र समुच्चितम् ॥ २५ ॥
नोपरोद्धुमलं देव ! तव वैराग्यसम्पदम् ।
सुरैर्विरचितो भक्त्या प्रातिहार्यपरिच्छदः ॥ २६ ॥
करिकेसरिदावाहिनिषादविषमाध्वगः ।
रोगा बन्धाश्च शाम्यन्ति त्वत्पदानुस्मृतेर्जिन ! ॥२७॥
करटभ्रष्टदुर्दाममदाम्बुकृतदुर्दिनम् ।
गजमाधातुकं मर्त्या जयन्ति त्वदनुस्मृतेः ॥ २८ ॥
करीन्द्रकुम्भनिर्भेदकठोरनखरो हरिः ।
क्रमेऽपि पतितं जन्तुं न हन्ति त्वत्पदस्मृतेः ॥ २९ ॥

नोपद्रवति दीप्तार्चिरप्यर्चिष्मान् समुत्थितः ।
त्वत्पदस्मृतिशीताम्बुधाराप्रशमितोदयः ॥ ३० ॥
फणी कृतफणो रोषात् उद्गिरन् गरमुल्वणम् ।
त्वन्नामागदसंस्मृत्या सद्यो भवति निर्विषः ॥ ३१ ॥
वने प्रचण्डलुण्टाक कोदण्डरव भीषणे ।
सार्थाः सार्थाधिपाः स्वैरं प्रयान्ति त्वत्पदानुगाः ॥३२॥
अपि चण्डानिलाकाण्ड जृम्भणाघूर्णितार्णसम् ।
तरन्त्यर्णवमुद्वेलं हेलया त्वत्क्रमाश्रिताः ॥ ३३ ॥
अप्यस्थानकृतोत्थान तीव्रव्रणरुजो जनाः ।
सद्यो भवन्त्यनातङ्काः स्मृतत्वत्पदभेषजाः ॥ ३४ ॥
कर्मबन्धविनिर्मुक्तं त्वामनुस्मृत्य मानवः ।
दृढबन्धनबद्धोऽपि भवत्याशु विशृङ्खलः ॥ ३५ ॥
इतिविघ्नितविघ्नौघं भक्तिनिघ्नेन चेतसा ।
पर्युपासे जिनेन्द्र ! त्वां विघ्नवर्गोपशान्तये ॥ ३६ ॥
त्वमेको जगतां ज्योतिः त्वमेको जगतां पतिः ।
त्वमेको जगतां बन्धुः त्वमेको जगतां गुरुः ॥ ३७ ॥
त्वमादिः सर्वविद्यानां त्वमादिः सर्वयोगिनाम् ।
त्वमादिर्धर्मतीर्थस्य त्वमादिर्गुरुरङ्गिनाम् ॥ ३८ ॥
त्वं सार्वः सर्वविद्येशः सर्वलोकाग्रलोकथाः ।
स्तुतिवादस्तवैतावान् अलमास्तां सविस्तरः ॥ ३९ ॥

— वसन्ततिलकम् —

त्वां देवमित्थमभिवन्द्य कृतप्रणामो,
नान्यत्फलं परिमितं परिमार्गयामि ।
त्वय्येव भक्तिमचलां जिन ! मे दिश त्वं,
सा सर्वमभ्युदयमुक्तिफलं प्रसूते ॥ ४० ॥

## — भोगनिन्दा —

संसारे स्त्रीसमासङ्गाद् अङ्गिनां सुखसङ्गमः ।
तदभावे कुतस्तेषां सुखमित्यत्र चर्च्यते ॥ १ ॥

निर्द्वन्द्ववृत्तितामाप्ताः शमुशन्तीह देहिनाम् ।
तत्कुतस्त्यं सरागाणां द्वन्द्वोपहतचेतसाम् ॥ २ ॥

स्त्रीभोगो न सुखं चेतः संमोहाद् गात्रसादनात् ।
तृष्णानुबन्धात् सन्तापरूपत्वाच्च यथा ज्वरः ॥३॥

मदनज्वरसन्तप्तः तत्प्रतीकारवाञ्छया ।
स्त्रीरूपं सेवते आन्तः यथा कट्वपि भेषजम् ॥४॥

मनोज्ञविषयासेवा तृष्णायै न वितृप्तये ।
तृष्णार्चिषा च सन्तप्तः कथं नाम सुखी जनः ॥५॥

रुजां यत्रोपघाताय तदौषधमनौषधम् ।
यत्रोदन्याविनाशाय नाञ्जसा तज्जलं जलम् ॥६॥

न विहन्त्यापदं यच्च नार्थिनस्तद्धनं धनम् ।
तथा तृष्णाच्छिदे यन्न न तद्विषयजं सुखम् ॥७॥

रुजामेष प्रतीकारो यत्स्त्रीसम्भोगजं सुखम् ।
निर्व्याधिः स्वास्थ्यमापन्नः कुरुते किन्नु भेषजम् ॥८॥
परं स्वास्थ्यं सुखं नैतद् विषयेष्वनुरागिणाम् ।
ते हि पूर्वं तदात्वे च पर्यन्ते च विदाहिनः ॥९॥
मनोनिर्वृतिमेवेह सुखं वाञ्छन्ति कोविदाः ।
तत्कुतो विषयान्धानां नित्यमायस्तचेतसाम् ॥१०॥
विषयानुभवे सौख्यं यत्पराधीनमङ्गिनाम् ।
साबाधं सान्तरं बन्ध-कारणं दुःखमेव तत् ॥११॥
आपातमात्ररसिका विषया विषदारुणाः ।
तदुद्भवं सुखं नृणां कण्डुकण्डूयनोपमम् ॥१२॥
दग्धव्रणे यथा सान्द्रचन्दनद्रवचर्चनम् ।
किञ्चिदाश्वासजननं तथा विषयजं सुखम् ॥१३॥
दुष्टव्रणे यथा क्षारशस्त्रपाताद्युपक्रमः ।
प्रतीकारो रुजां जन्तोः तथा विषयसेवनम् ॥१४॥
प्रियाङ्गनाङ्गसंसर्गाद् यदिह सुखमङ्गिनाम् ।
ननु पक्षिमृगादीनां तिरश्चामस्तु तत्सुखम् ॥१५॥
शुनीमिन्द्रमहे पूतिव्रणीभूतकुयोनिकाम् ।
अवशं सेवमानः श्वा सुखी चेत् स्त्रीजुषां सुखम् ॥१६॥
निम्बद्रुमे यथोत्पन्नः कीटकस्तद्रसोपभुक् ।
मधुरं तद्रसं वेत्ति तथा विषयिणोऽप्यमी ॥१७॥

सम्भोगजनिताखेदं श्लाघमानः सुखास्थया ।
तत्रैव रतिमायान्ति भवावस्करकीटकाः ॥१८॥
विषयानुभवात् पुंसां रतिमात्रं प्रजायते ।
रतिश्चेत् सुखमायातं नन्वमेध्यादनेऽपि तत् ॥१९॥
यथामी रतिमासाद्य विषयाननुभुञ्जते ।
तथा श्वशूकरकुलं तद्वत्यैवास्थमेधकम् ॥२०॥
गूथकृमेर्यथा गूथ-रससेवा परं सुखम् ।
तथैव विषयानीप्सोः सुखं जन्तोर्विगर्हितम् ॥२१॥
विषयाननुभुञ्जानः स्त्रीप्रधानान् सवेपथुः ।
श्वसन् प्रस्विन्नसर्वाङ्गः सुखी चेदसुखीह कः ॥२२॥
आयाममात्रमश्राज्ञः सुखमित्यभिमन्यते ।
विषयाशाविमूढात्मा श्वेवास्थि दशनैर्दशन् ॥२३॥
ततः स्वाभाविकं कर्म क्षयात्तत्प्रशमादपि ।
यदाह्लादनमेतत् स्यात् सुखं नान्यं व्यपाश्रयम् ॥२४॥
परिवारर्द्धिसामग्र्या सुखं स्यात् कल्पवासिनाम् ।
तदभावेऽहमिन्द्राणां कुतस्त्यमिति चेत् सुखम् ॥२५॥
परिवारर्द्धिरत्रैव किं सुखं किमु तद्वताम् ।
तत्सेवा सुखमित्येवम् अत्र स्याद् द्वितयी गतिः॥२६॥
सान्तः पुरो धनर्द्धीव परिवारो ज्वरी नृपः ।
सुखी स्याद्यदि सन्मात्राद् विषयात् सुखमीप्सितम्॥२७

तत्सेवासुखमित्यत्र दत्तमेवोत्तरं पुरा ।
तत्सेवी तीव्रमायस्तः कथं वा सुखभाग् भवेत् ॥२८॥
पश्यैते विषयाः स्वप्नभोगाभा विप्रलम्भकाः ।
अस्थायुकाः कुतस्तेभ्यः सुखमार्त्तधियां नृणाम् ॥२९॥
विषयानर्जयन्नेव तावद् दुःखं महद् भवेत् ।
तद्रक्षाचिन्तने भूयो भवेदत्यन्तमार्त्तधीः ॥३०॥
तद्वियोगे पुनर्दुःखम् अपारं परिवर्तते ।
पूर्वानुभूतविषयान् स्मृत्वा स्मृत्वावसीदतः ॥३१॥
अनाशितम्भवानेतान् विषयान् धिगपथ्यायिनः ।
येषामासेवनं जन्तोः न सन्तापोपशान्तये ॥ ३२ ॥
वह्निरिवेन्धनैः सिन्धोः स्रोतोभिरिव सारितैः ।
न जातु विषयैर्जन्तोः उपभुक्तैर्वितृष्णता ॥३३॥
क्षारमम्बु यथा पीत्वा तृष्यत्यतितरां नरः ।
तथा विषयसम्भोगैः परं सन्तर्षमृच्छति ॥३४॥
अहो विषयिणां व्यापत्कुचेन्द्रियवशात्मनाम् ।
विषयामिषगृध्नूनाम् अचिन्त्यं दुःखमापुषाम् ॥३५॥
वने वनगजास्तुङ्गा यूथपाः प्रोन्मदिष्णवः ।
अवपातेषु सीदन्ति करिणीस्पर्शमोहिताः ॥३६॥
सरन् सरसि सम्फुल्लकह्लारस्वादुवारिणि ।
मत्स्यो वडिशमांसार्थी जीवनाशं प्रणश्यति ॥३७॥

मधुव्रतो मदामोदम् आजिघ्रन् मददन्तिनाम् ।
मृत्युमाह्वयते गुञ्जन् कर्णतालाभिताडनैः ॥३८॥
पतङ्गः पवनालोलदीपार्चिषि पतन् मुहुः ।
मृत्युमिच्छत्यनिच्छोऽपि मषिसाद्भूतविग्रहः ॥३९॥
यथेष्टगतिका पुष्टा मृदुस्वादुतृणाङ्कुरैः ।
गीतासङ्गान्मृतिं यान्ति मृगयोर्मृगपोषिनः ॥४०॥
इत्येकशोऽपि विषये बह्वपायो निषेवितः ।
किं पुनर्विषयाः पुंसां सामस्त्येन निषेविताः ॥४१॥
हृतोऽयं विषयैर्जन्तुः स्रोतोभिः सरितामिव ।
श्वभ्रे पतित्वा गम्भीरे दुःखावर्तेषु सीदति ॥४२॥
विषयैर्विप्रलब्धोऽयम् अधीरतिधनायति ।
धनायाभासितो जन्तुः क्लेशानाप्नोति दुस्सहान् ॥४३॥
क्लिष्टोऽसौ मुहुरार्तः स्याद् इष्टालाभे शुचं गतः ।
तस्य लाभेऽप्यसन्तुष्टो दुःखमेवानुधावति ॥४४॥
ततस्तद्रागतद्द्वेषदूषितात्मा जडाशयः ।
कर्म बध्नाति दुर्मोचं येनामुत्रावसीदति ॥४५॥
कर्मणानेन दौस्थित्यं दुर्गतावसुसंश्रितः ।
दुःखाभिकाममवाप्नोति महतीमतिगर्हिताम् ॥४६॥
विषयानीहते दुःखी तत्प्राप्तावतिगृद्धिमान् ।
ततोऽतिदुरनुष्ठानैः कर्म बध्नात्यशर्मदम् ॥४७॥

इति भूयोऽपि तेनैव चक्रेण परिभ्रमन् ।
संसारापारदुर्वार्द्धौ पतत्यत्यन्तदुस्तरे ॥४८॥

तस्माद् विषयजामेनां मत्वानर्थपरम्पराम् ।
विषयेषु रतिस्त्याज्या तीव्रदुःखानुबन्धिषु ॥४९॥

कारीषाग्नीष्टकापाकतार्णाग्निसदृशा मताः ।
त्रयोऽमी वेदसन्तापाः तद्वान्जन्तुः कथं सुखी ॥५०॥

## चतुर्विंशतितीर्थङ्कराणां स्तुतिः

शुद्धया सर्वजिनेश्वरान् शिवप्रियान् संशर्मलीनान् स्तुवे,
लेखाधीशसमर्चितान् मुनिवरैः सम्बन्धनीयान् सदा ।
वीरान्तान् वृषभादिकान् शिवप्रदान् भव्यौघसन्तारकान्,
अंतस्थाघविहानये हतमलान् संसाररत्नाकरात् ॥ १ ॥

नाभेयं जिननायकं मुनिपतिमिक्ष्वाकुवंशोद्भवं,
चेडेऽहं मरुदेविजं शिवपदं सद्भर्मदेहप्रभं ।
आद्यं श्रीपुरुषोत्तमं वरवृषचिह्नान्वितं सुन्दरं,
सद्भक्त्या शिवसिद्धये शरशत कोदण्डदेहोन्नतं ॥ २ ॥

संस्तोष्येऽजितमेव दुःखरहितं संसारपारप्रदं,
श्रीमन्तं विजयासुतं जिनपतिं दन्तावलाङ्कं मुदा ।
सज्जाम्बूनदवत्प्रभं युगशतं सार्द्धं च चापोन्नतं,
श्रीराजाजितशत्रुजं हतभयमीक्ष्वाकुवंशोत्थितं ॥ ३ ॥

वन्देऽहं भववर्जितं जिनवरं श्रीसम्भवं शम्भवं,
श्रीमद्दृढदेति नाम तनुजं श्री श्रीसुषेणोद्भवं ।
गाङ्गेयप्रभसत्प्रभं शतचतुश्चापोन्नतं निर्मलं,
वाज्यङ्कं भवदुःखराशिमथकमिक्ष्वाकुवंशोद्भवं ।। ४ ।।

सन्नन्दादिकरं जिनोत्तममहं चामीकरसत्प्रभं,
कौशाङ्कं वरसंवराधिपभवं सिद्धार्थिकानन्दनं ।
संशुद्ध्या अभिनन्दनं गुणशतं सार्द्धं च चापोन्नतं,
मोक्षाप्त्यै भवसिन्धुपारकमथो संनौमि पूज्यं सुरैः ।। ५ ।।

श्रीमन्तं सुमतिं जिनेश्वरमहं सद्बुद्धिदं पावनं,
मेघाभनृपजं मुनीन्द्रमहितं श्रीमङ्गलापुत्रकं ।
हेमाभं प्रणमाम्यहं शिवप्रदं सच्चक्रवाङ्काङ्कितं,
सन्नृणां भवपारदं शतत्रयं कोदण्डदेहोन्नतं ।। ६ ।।

जैनेन्द्रं जितकर्मरोषनिचयं पद्मप्रभं शर्मदं,
सत्पद्मासनदायकं वरप्रतिष्ठभूपजं निर्मलं ।
सत्पद्माङ्कधरं सुरक्तमणिभं श्री श्रीसुसीमासुतं,
सार्द्धं द्विशत चापदेहकलितं वन्दे सदा भावतः ।। ७ ।।

स्वस्य पार्श्वप्रदं मनोक्षशमकं श्रीधर्मसंवर्द्धकं,
नीलाभं शिवमार्गदं वरमहासेनाख्यभूपोद्भवं ।
सन्नाम्ना च सुपार्श्वकं वरधरा सूनुं सुस्वस्त्यङ्कितं,
ईडेऽहं जिननायकं करशतसत्कार्मुकोर्ध्वं विभुं ।। ८ ।।

संसाराम्बुधिपारदं जिनपतिं चन्द्रप्रभं मोक्षदं,
सुग्रीवाभिधभूपजं गणपतिं सल्लक्षणानन्दनं।
शुभ्रांशुच्छविराजितं वरशिवयोषारतं निर्मलं,
वन्दे चापशतैक चार्द्धप्रमकं वर्ष्मं मृगाङ्काङ्कितं ॥ ९ ॥

सद्गौराभिधदीप्तिदेहसुभगं श्रीपुष्पदन्तं जिनं,
संसेव्ये दृढभूपजं शतधनुर्देहोन्नतं शर्मदं।
त्रातारं शरणार्थिनां च प्रथुरोमाकेतुयुक्तं वरं,
श्रीरामातनयं विशुद्धपदकं चेक्ष्वाकुवंशोद्भवं ॥ १० ॥

रुक्माभं विमलाख्यभूपतनुजं नन्दासुतं नन्ददं,
श्रीवृक्षाङ्कधरं जिनेश्वरमहं श्रीशीतलं तारकं।
भव्यानां भवसिन्धुदुःखनिचयात् कर्मार्तिसंहारकं,
संवन्दे नवतिशरासनप्रमं सद्विग्रहं निर्मदं ॥ ११ ॥

खड्गाङ्कं वरहाटकोपमतनुं श्रेयांसनाथं जिनं,
विष्णुदेविसुनन्दनं कृतनृपभूपोद्भवं सच्छ्रिये।
लेखाधीशगणैः सदैवमहितं चाशीतिचापोन्नतं,
स्तौमि प्रार्थितशर्मदं वरमुदा सन्मङ्गलार्थं सदा ॥ १२ ॥

श्रीराजा वसुपूज्यजं भवहरं सत्पद्मरागप्रभं,
पूज्यं सन्मुनिपुङ्गवैर्जिनवरं श्रीवासुपूज्यं विभुं।
कर्मारातिहरं जयासुतमहं शाहाङ्कितं संस्तुवे,
मोक्षार्थी वरचापसप्ततिप्रमं देहोन्नतं सर्वदा ॥ १३ ॥

भूदारध्वजराजितं वर सुरभ्यापुत्रमीडे जिनं,
श्रीराजाग्निसेनजं शिवप्रदं सज्ज्ञानरूपद्युतिं ।
दोषाष्टादशवर्जितं च विमलं सत्षष्टिचापोन्नतं,
वैमल्यार्थकरं सदैव विमलं तत्सिद्धये कामदं ॥ १४ ॥

भास्वद्भूपसमुद्भवं वरजयश्यामासुतं पावनं,
पापाचारनिवर्हणार्थमनघ-स्थानाय वेडे जिनं ।
पञ्चाशद्वरकार्मुकोपमतनुं भर्मद्युतिं शर्मदं,
चानन्तं गुणमन्दिरं हरिनुतं सेधाङ्कितं सुन्दरं ॥ १५ ॥

राजा भानुभवं जिनोत्तममहं श्रीसुव्रतानन्दनं,
वज्राङ्कं तपनीयभं शुभप्रदं श्रीधर्मनाथं सदा ।
सद्धर्माय भजे समर्थपददं त्रैलोक्यभूपार्चितं,
पञ्चाब्धिधनुराजितं हतमलं दुष्पापहान्यै मुदा ॥ १६ ॥

सच्चामीकरवर्ष्मदीप्तिसुभगं श्रीशान्तिनाथं प्रभुं,
श्रीराजाविश्वसेनदेहप्रभवं स्तुत्यं सदा कौरवैः ।
ऐरादेविसुतं भवाब्धिमथकं चातायुचिह्नान्वितं,
खाब्धिचापतनुं सुरेश्वरव्रजैर्वन्द्यं समीडे विभुं ॥ १७ ॥

संसारातपवर्जितं जिनवरं श्रीकुन्थुनाथं प्रभुं,
मद्धर्मच्छविराजितं भयहरं लक्ष्मीमतिनन्दनं ।
श्रीराजाशुभदर्शनोद्भवमहं वन्दे स्तभाङ्कं मुदा,
पञ्चाग्निप्रमकार्मुकोपमतनुं सत्कौरवाणां मणिं ॥ १८ ॥

सद्हेमाभमहं जिनेश्वरमथो पाठीनलक्ष्माङ्कितं,
मित्रादेविसुतं सुकुम्भनृपजं भव्योत्तमैः संस्तुतं ।
श्रीमत्कौरववंशजं शिवप्रदं त्रिंशच्च चापोन्नतं,
लेखाधीशगणैः सदैव महितं वैचारनाथं मुदा ॥ १९ ॥

कुम्भाङ्कं जिननायकं सुरवरैः श्रीभारतीनन्दनं,
वन्द्यं श्रीविजयोद्भवं भवहरं कार्तस्वराभं शुभं ।
मोक्षावासकरं सदैव सुखदं श्रीमल्लिनाथं भजे,
संसारोदधितारदं शरकरसच्चापवर्ष्मोन्नितं ॥ २० ॥

श्रीमदञ्जनभूधरोपमप्रभं सद्व्रचंद शर्मदं,
श्रीमन्तं मुनिसुव्रतं जिनपतिं कूर्माङ्कमीडे विभुं ।
पद्मादेविसुतं सुमित्रनृपजं भव्याब्जसूर्योपमं,
श्रीयादवकुलमण्डनं नभकरसच्चापदेहोन्नतं ॥ २१ ॥

श्रीवप्रातनयं सुधारणनृपदेहोद्भवं निर्मलं,
कृत्वाद्यारिहरं नमामि शिरसा दुर्भावविध्वंसकं ।
जैनेन्द्रं नमिनायकं शतच्छदचिह्नं जरावर्जितं,
सत्यं चेन्दुशरासनोच्छ्रिततनुं सत्स्वर्णवर्ष्मच्छविं ॥ २२ ॥

श्रीमद्यादववंशमण्डनमणिं श्रीनेमिचन्द्रं प्रभुं,
सद्भक्त्या वरकम्बुलक्ष्मकलितं सत्श्याममूर्तिं स्तुवे ।
शैवादेविसुतं सुसिन्धुविजयभूपोद्भवं निस्तुषं,
मालाकार्मुकदेहमाननिशदं वन्द्यं च देवोत्तमैः ॥ २३ ॥

चाश्वसेननरेन्द्रदेहप्रभवं श्रीपार्श्वनाथं प्रभुं,
इयश्मगर्भद्युतिं जिनेश्वरमहं सद्उग्रवंशोद्भवं ।
नागेन्द्रादिसुरेन्द्रवारमहितं काकोदराङ्कं मुदा,
वामादेविसुतं भजे नवकरसन्मानदेहाङ्कितं ॥ २४ ॥

श्रीमन्तं भवपारदं जिनपतिं श्रीवर्द्धमानं स्तुवे,
सिद्धार्थनृपजं सुरेन्द्रमहितं श्रीनाथवंशोद्भवं ।
पश्चात्स्याङ्कमहं विशुद्धमनसा सप्तैव हस्तोन्नतं,
संतप्तकनकोज्ज्वलं मुनिनुतं ज्येष्टास्वसानंदनं ॥ २५ ॥

नानाशर्मप्रदाः निलिम्पपतिभिश्चान्यैश्च योगीश्वरैः,
स्तुत्याः सद्गुणराजिताः शिवप्रियाः सद्वर्णमाना जिनाः ।
चेमे श्रीवृषभादिकाः भयहराः पापौघनिर्नाशकाः,
भव्यानां भवपारदाः शिवकरं यच्छन्तु नो मङ्गलं ॥ २६ ॥

श्रीजैनेन्द्रगुणौघपुष्पनिचिताः सद्भक्तिसूत्रार्पिता,
यः कण्ठे वरभक्तितः शिवप्रदा सद्ग्रन्थिता निर्मलाः ।
माला दुर्भवतापहा सुमतिना श्रीनेमिचन्द्रेण वै,
धारयत्येव शिवे मुनीन्द्रमहिते संस्थापयिष्यत्यहो ॥ २७ ॥

## श्रीवीरनन्दिप्रणीतचतुर्विंशतिस्तवनम्

श्रियः प्रियः सङ्गतविश्वरूपः, सुदर्शनश्छिन्नपरावलेपः ।
दद्यादनंतः प्रणतामरेन्द्रो, रमां ममाद्यः परमां जिनेंद्रः ॥१॥

जयत्यनन्ताप्रतिमप्रबोध-प्रद्योतविद्योतितविश्वतत्त्वः ।
प्रत्यस्तकर्मोरुतमःप्रतानः, प्रोद्बुद्धभव्याब्जवनोऽजितेनः ॥२॥

श्रीसम्भवं भजत सञ्चितपुण्यराशे,र्युर्येन भीकरतरस्य भवाम्बुराशेः
लीलासमुत्तरणकारणयानपात्रं, प्रोक्तं गुणोत्करनिरास्रवणं चरित्रं३

वन्दे मुदा श्रीशजिनाभिनन्दनं, शश्वत्पदानम्रमुखाभिनंदनम् ।
तपः स्फुरद्वह्निनिमग्नमन्मथं, विनेयसन्दर्शितमुक्तिसत्पथम्॥४॥

सद्वृत्तिः सुमतिः पतिस्त्रिजगतां नेता विमुक्तेः सृते–
र्यस्यात्यद्भुतचित्तशक्तिहुतभुग्ज्वालाकलापैरलम् ।
तन्मार्गानुगमार्गबन्धनमहासङ्घातिनिर्बंधनः,
प्लुष्टो दुष्टपरीषहोद्भटभटः सोऽयं जिनः पातु नः ॥ ५ ॥

पद्मप्रभं कोकनदोदरप्रभं पद्माविनोदायतनं सनातनम् ।
सर्वात्मनीनोरुदयं महोदयं जिनेश्वरं नौमि विशुद्धधीश्वरम्॥६॥

श्रीमांस्त्रिलोक्या कृतपादसेवो यः सर्वसत्त्वामृतदिव्यरावः ।
स्तादिष्टदः सोऽनुपमप्रभावः सुपार्श्वदेवो भवकक्षदावः ॥७॥

यत्कांतकांतिः कुमुदं वितन्वती तनोत्यलं तत्कमलोत्सवं नवः ।
निरस्तदोषाऽभ्युदयाक्षयश्रियं क्रियात्स चन्द्रप्रभदेववल्लभः ॥८॥

श्रियं त्रिलोकीपतिपुष्पदन्तः पुष्यादनंतः प्रियमुक्तिकांतः ।
दुरंतमिथ्यात्वतमस्तमोरिर्जिनो मनोजद्विरदद्विपारिः ॥९॥

यद्वाक्यामृतमाजवंजवदवोत्तापात्मनामात्मनां,
नानैनश्चिततापलोपनपरं श्रीशीतलः शीतलम् ।

यस्याङ्कस्य मरीचिमण्डलमिलानंदेन्दिरामंदिरम्,
पायात्पार्वणशीतरश्मिरुचिरः सोऽयं जिनाधीश्वरः ॥ १० ॥

श्रेयोनाथ ! सरस्वतीश्वरतया रत्नाकरत्वेन तु,
गाम्भीर्येण गुणेन निर्जितवता वार्द्धिर्यतोऽस्तु त्वया ।
किं वन्द्या जलधेः सदा प्रमुदितत्रैलोक्यसंसेव्यता,
लक्ष्मीश्चाक्षयसङ्गमाऽस्ति परमा मूर्तिर्मनोहारिता ॥ ११ ॥

छत्रत्रयं यस्य जगत्त्रयस्य, स्वामित्वसङ्कीर्तिपरं रराज ।
सन्मङ्गलं वः स जिनोऽस्तु देवः, श्रीवासुपूज्यो भुवनत्रयेड्यः ॥१२॥

श्रियं ममैनस्तिमिरक्षयोज्ज्वलां सन्मार्गगः श्रीविमलः क्रियात्सदा
जिनो निशानंतवरैर्गुणोत्करैर्विराजमानो जनताब्जभास्करः॥१३॥

श्रीमान्नः परमां रमां निरुपमां दद्यादनंतो जिनो,
विज्ञानातिशयेन येन दुरितात्मानौ विभिन्नौ कृतौ ।
सम्पूर्णां प्रतिपक्षहीनममितं प्राप्तं सदावस्थितं,
शर्मानक्षजमक्षयं स्वतिशयं शुद्धात्मजातं नुतम् ॥ १४ ॥

सद्वंशजः पेशलविश्वशीलः श्लिष्टो गुणैपुष्टतरैर्विशिष्टैः ।
दुरन्तदुःकर्महरः कृतार्थो धर्मो जिनः स्ताद्विजयश्रिये नः ॥१५॥

प्रणतभुवननाथो धर्मतीर्थाधिनाथः,
प्रहतदुरितवर्गः प्रोक्तसन्मुक्तिमार्गः ।
प्रशमितजनतार्चिः शुद्धदृग्ज्ञानमूर्तिः,
प्रवरकनककांतिः श्रेयसे वोऽस्तु शांतिः ॥१६॥

चक्रं विक्रममानमर्दनमुरुज्या प्राज्यराज्यं, च यः,
कुंथुर्ग्रंथविरागतातिशयतस्त्यक्त्वाहमक्षपातथे ।
तत्प्राप्तौ तु परं क्षमादिकमरं तद्धर्मचक्रं दधद्,
वन्द्योऽभूद्भुवनत्रयस्य तदिदं चित्रं चरित्रं मुनेः ॥ १७ ॥

श्रीमान् जिनः सम्भृतधर्मचक्रः श्रेयैर्युतः सारगुणैरवक्रः ।
मनोरथाप्त्यै हृतचक्रिचक्रो भूयादरः पालितधर्मचक्रः ॥१८॥

ज्ञानं यदीयं विगतोपमानं सर्वं यदन्तः परमाणुखर्वम् ।
पायात्स सर्वावृतिजादपायान्नाथस्त्रिलोक्या वरमल्लिनाथः॥१९॥

नमोऽस्तु तस्मै मुनिसुव्रताय साक्षात्कृत[illegible]न्तो यः ।
व्रतानि सर्वैकहितानि यस्य सन्ति क्रमप्रह्वजगत्त्रयस्य॥२०॥

नमिर्वरश्रीप्रणयैकभूमिर्जिनः स नः पातु दयानिधानः ।
अलं गलत्यर्जितकर्मजालं यस्येक्षणान्मङ्क्षु महोदयस्य॥२१॥

प्रोन्निर्यत्करनीलरत्नरुचिरो दाराङ्कचेतो हरः,
पूर्णोदीर्णसदाश्रयान्तरमहाभोगास्पदाशोत्करः ।
गम्भीराप्तसमस्तदोषमधुरध्वानोघदानन्दनः,
सर्वोर्वीसुखसम्पदेऽस्त्वमृतदो नेमिर्घनः पावनः ॥ २२ ॥

श्रियः पदं सर्वविदः पदाम्बुजं नमन्निलिम्पालिमिलिन्दमन्दिरं ।
सन्मानसोल्लासिनखांशुकेसरं पार्श्वस्य नः स्ताद्वरदं जिनेशिनः२३

लक्ष्मीं वीरजिनेश्वरः पदनतानन्तामराधीश्वरः,
पद्मासद्मपदाम्बुजः परमचिल्लीलाचतुर्वक्त्रजः ।

त्रिधानिर्दयाचलोऽमितबलः शान्ताखिलैनोमलो,
दध्यान्त्रिजगन्नतिं गुणमणिव्रातोज्ज्वलालङ्कृतिम् ॥ २४ ॥

## श्रीआदिनाथस्तोत्रम्

अनादिनिधने नाथ ! संसारे दुःखसागरे ।
चञ्चले विषमे भीमे, अगाधे पारवर्जिते ॥ १ ॥

जन्ममृत्युजरातोये, तृष्णामकरसङ्कुले ।
अज्ञानासिकताकीर्णे, मायादोषतरङ्गके ॥ २ ॥

क्रोधमानमयावर्ते, लोभत्वबड़वानले ।
कामरागसिते फेने, रतिशोकभयानके ॥ ३ ॥

महामोहश्हन्मीने, चिन्तावातेन क्षोभिते ।
दुर्गत्यानामवेलायां वृद्धिं याति, सविस्तरं ॥ ४ ॥

एवम्भूते महाभीमे, संसारे दुःखसङ्कटे ।
भ्रमणं च मया चक्रे, प्राप्तं दुःखं निरन्तरं ॥५॥

नारकाणां महादुखं, तिर्यञ्चां च महद्भयं ।
देवानां मानसं दुःखं, मनुष्याणां वियोगजं ॥६॥

एतैश्च विविधाकारैः, दुःखजालैः पुनः पुनः ।
आवृतोऽहं जगत्स्वामिन् ! यस्मिंस्तस्मिन्भवान्तरे॥७॥

काममोहवशीभूतैः, पुत्रदारैस्तु कारणैः ।
कृतानि बहुपापानि, अज्ञानतमसावृतैः ॥ ८ ॥

प्राणानिपातिताः पूर्वं, मृषावचनभाषितं ।
हृतानि परद्रव्याणि, परदाराः सुसेविता ॥९॥
मद्यमांसमधुभक्षैः, बह्वारम्भपरिग्रहैः ।
लुब्धबुद्ध्या मया नाथ ! कृतं पापं सुदारुणं ॥१०॥
तेन पापेन सम्वेष्ट्य, बहुशः बहुजन्मनि ।
प्राप्तं दुखं मया नाथ, ! अधुना शरणं गतः॥११॥
संसारदुःखसंत्रस्त, आगतोऽस्मि महामुने !
नान्यच्छरणमस्तीति, मया ज्ञातं सुनिश्चितं ॥१२॥
त्वं त्राता भवभीरूणां, प्राणिनां दुःखभागिनां ।
दाता स्वर्गापवर्गस्य, त्वमेकः परमो गुरुः ॥१३॥
दयासत्यादिसंयुक्तं, सुधर्मं परमं शुभं ।
कथितं सिंहनादेन, त्वमेकः परमोदयः ॥१४॥
त्वं मे भगवन् ! स्वामी त्वं माता त्वं पितामहः ।
त्वं च बन्धुरबन्धूनां, त्वमेकः पुरुषोत्तमः ॥१५॥
ब्रह्मस्थाने स्थितो यस्मात्, स ब्रह्मा परिगीयते ।
विष्णुत्वं च त्वया प्राप्तं, व्याप्तं ज्ञानार्करश्मिभिः ॥१६
रुद्रस्त्वं रौद्रकर्माणि, हत्वा ध्यानवह्निना ।
दिव्यैश्वर्यसमायुक्तं, ईश्वरस्त्वमुपागतः ॥१७॥
दाता सुखं च भूतानां, शङ्करत्वं प्रतिष्ठितः ।
महाव्रतोपदेशेन, महादेवोपगम्यते ॥ १८ ॥

प्रजानां हितदेशत्वात्, त्वं च देव ! प्रजापतिः ।
महामोहाभिभूतानां, बोधने बुद्धतां गतः ॥१९॥
त्रैलोक्यलोचने ज्ञानं, त्वं च स्वामिन् ! त्रिलोचनः ।
हिरण्यगर्भतां प्राप्तः, वसुधारा प्रपातनैः ॥ २० ॥
चतुर्दिक्षु महाभाषा, सर्वभूतानुगामिनी ।
प्रवर्तिता यतस्तेन, चतुरास्यो विधीयते ॥ २१ ॥
श्रिया परमया युक्तः, श्रीधरत्वमुपागतः ।
अनन्तैः संस्तुतो देवैः पुरुदेवो मतो जनैः ॥२२॥
महापूजां यतः प्राप्तो, अर्हतो नामतः प्रभो ! ।
महामोहरिपुञ्जेता, तेन त्वं जिनतां गतः ॥२३॥
नमस्ते दोषनिर्मुक्त, लोकानां हितदेशकः ।
समाधिं बोधिलाभं च वरं देहि मम प्रभो ! ॥२४॥

इति श्रीआदिनाथस्तोत्रम्

## श्रीऋषभाष्टकस्तोत्रम्

गृहीतं जीवानां परमहितबुद्धयैव जननं,
प्रजारक्षोपायारसमितशुभा येन कथिताः ।
तमोहारी ज्ञानी रविशशिनिभो यश्च जगतः,
स शान्तिं सर्वेभ्यो दिशतु वृषभः कर्मविजयी ॥१॥
सती भार्या पृथ्वी जलधिजलचीरा प्रणयिनी,
उभे त्यक्ते येन प्रशमरसलब्ध्यैव विभुना ।

कृतश्चात्मा पूर्णो विपुलमतिना योगबलिना,
स शान्तिं सर्वेभ्यो दिशतु वृषभः कर्मविजयी ॥२॥

तपस्यां केचित्तु स्वसुतसुरलोकार्थमनिशं,
स्फुटं कुर्वन्ति त्वं भवततिविनाशाय कृतवान् ।
यदीया वाग्गङ्गा सुरमनुजमान्या प्रथमतः,
स शान्तिं सर्वेभ्यो दिशतु वृषभः कर्मविजयी ॥३॥

स्वयम्भूर्ब्रह्मासि प्रशमरसशान्तेश्च भवनं,
मुखोद्भूता वाणी श्रवणसुभगा नित्यसुखदा ।
चरित्रं यस्याहो सकलहितरूपं विजयते,
स शान्तिं सर्वेभ्यो दिशतु वृषभः कर्मविजयी ॥४॥

महातुङ्गो दानी क इह भुवने देवसदृशः,
वरं त्वं निर्ग्रन्थस्तदपि भजनं तेऽस्ति सफलम् ।
अनीराद्‌द्रेर्हि प्रभवति नदी पूर्णसलिला,
स शान्तिं सर्वेभ्यो दिशतु वृषभः कर्मविजयी ॥५॥

न रोचन्ते तद्वद्विबुधमनसे चन्द्रकिरणाः,
तथा मुक्तामाला न च भवति तेषां हृदि मुदे ।
यथा भातीदं ते शमजलभृतं तत्त्वकथनं,
स शान्तिं सर्वेभ्यो दिशतु वृषभः कर्मविजयी ॥६॥

निजा दोषा दग्धाः प्रबलतपसा येन सकलाः,
चतुर्लक्ष्मीस्वामी समरिपुसखः शान्तिशिवदः ।

प्रियः कान्तो मुक्तेरघिगुणबलाद् यश्च बलवान् ,
स शान्तिं सर्वेभ्यो दिशतु वृषभः कर्मविजयी ॥७॥

त्वया मुक्तेः पन्थाः कुशलमतिभव्याय कथितः,
कृता पूर्णा वर्षा विमलजिनधर्मस्य भवता ।
अतोऽस्माभिः सर्वे वयमिह भवन्तं प्रमुदिताः,
स शान्तिं सर्वेभ्यो दिशतु वृषभः कर्मविजयी ॥८॥

दयाब्धेर्जयचन्द्रस्य प्रेरणां प्राप्य भक्तितः ।
कृतं गोविन्दरायेण महरौनीनिवासिना ॥ ९ ॥

## पुरुदेवाष्टकम्

पुरा यज्जन्माङ्गप्रचितसुकृतख्यातिकुशलान् ।
सुलोके सुस्वप्नानुपसि जननी षोडशकलान् ॥
ववर्षः श्रीनाभेः सदसि धनदो रत्ननिचयं ।
श्रियै जायेताऽसौ प्रथमजिनदेवः पुरुपतिः ॥ १ ॥

सुरद्रूणां लोपे महनतरशोकाब्धिपतित--
प्रजानामालम्बप्लव इव बभौ यस्य धिषणा ॥
समुन्मीलज्ज्ञानत्रिक विचकिल स्वान्तकमलः ।
श्रियै जायेतासौ प्रथमजिनदेवः पुरुपतिः ॥ २ ॥

नटन्त्या नीलाया झटिति निधनं प्रेक्ष्य बलवद् ।
विरागाविर्भावोऽजनि मनसि यस्य द्रुततरम् ॥

परित्यक्तं राज्यं निखिलभवमोहाद् विरहितः ।
श्रियै जायेताऽसौ प्रथमजिनदेवः पुरुपतिः ॥ ३ ॥

वटच्छायाच्छन्नं निरवधिधरैवासनमभून् ।
मरुत्पानं कृत्वा प्रणिधिनिरतो वातरशनः ॥
अपद्रोहं तस्थुः खगमृगगणा यं च परितः ।
श्रियै जायेताऽसौ प्रथमजिनदेवः पुरुपतिः ॥ ४ ॥

अभड्क्त्वा यं नैव व्रजति कृतपुण्योऽपि कुशलं ।
कठोरः पाशोऽयं भवति बलवान् कर्मजनितः ॥
इतीवाब्दं वर्षं क्षुधित इव बभ्राम भुवनं ।
श्रियै जायेताऽसौ प्रथमजिनदेवः पुरुपतिः ॥ ५ ॥

अहो ! बोधिप्राप्त प्रभुरिति विभाव्यात्मनि हरिः ।
द्रुतं नन्तुं यस्मै स्वयमुपससारानतशिराः ॥
बभाषे यः क्षेमं समवसरणे दिव्यगिरया ।
श्रियै जायेताऽसौ प्रथमजिनदेवः पुरुपतिः ॥ ६ ॥

हुतं कर्मारण्यं भवकरसपत्नाश्च विजिताः ।
परिष्वक्ता गाढं स्थिरसुखद निर्वाणमहिला ॥
त्रिकालच्छन्दानां युगलपदलोकोऽप्यधिगतः ।
श्रियै जायेताऽसौ प्रथमजिनदेवः पुरुपतिः ॥ ७ ॥

प्रभो ! स्वामिन् ! नाथ ! त्रिभुवनपते ! मुक्तिकमला ।
परिष्वङ्गश्लाघ्य ! स्वसमय ! निजात्मैकरसिक ! ॥

सहस्राज्ज्वाज्ज्वच्छन्दः स्तुतिशिखरिणी यस्य विमला ।
श्रियै जायेताऽसौ प्रथमजिनदेवः पुरुपतिः ॥ ८ ॥

विद्यानन्देन मुनिना निर्मितोऽयं पुरुस्तवः ।
पठतां भव्यसत्त्वानां भूयात् सर्वसुखावहः ॥ ९ ॥

इति पुरुदेवाष्टकम्

## शान्तिस्तवनम्

चिद्रूपभावमनवद्यमिदं त्वदीयं,
ध्यायन्ति ये सदुपधिव्यतिहारमुक्तं ।
नित्यं निरञ्जनमनादिमनन्तरूपं,
तेषां महांसि भुवनत्रितये लसन्ति ॥ १ ॥

ध्येयस्त्वमेव भवपञ्चतया प्रसार !
निर्नाशकारणविधौ निपुणत्वयोगात् ।
आत्मप्रकाशकृतलोक तदन्यभाव,
पर्यायविस्फुरणकृत् परमोऽसि योगी ॥ २ ॥

त्वन्नाममन्त्रधनमुज्ज्वलजन्मजातं,
दुष्कर्मदावमभिशम्य शुभाङ्कुराणि ।
व्यापादयत्यतुलभक्तिसमृद्धिभाञ्जि,
स्वामिन् ! यतोऽसि शुभदः शुभकृत्यमेव ॥ ३ ॥

त्वत्पादतामरसकोषनिवासमास्ते,
चित्तद्विरेफसुकृती मम यावदीश !

[illegible],
स्थानं मयि क्षणमपि प्रतियाति कश्चित् ।। ४ ।।

त्वन्नाममन्त्रमनिशं रसनाग्रवर्ति,
यस्यास्ति मोहमदघूर्णननाशहेतुः ।
प्रत्यूहराजिलगणोद्भवकालकूट !
भीतिर्हि तस्य किमु सन्निधिमेति देव! ।। ५ ।।

तस्मात्त्वमेव शरणं तरणं भवाब्धौ,
शान्तिप्रदः सकलदोषनिवारणेन ।
जागर्ति शुद्धमनसा स्मरतो यतो मे,
शान्तिचयं करतले रभसाभ्युपैति ।। ६ ।।

इति शान्तिस्तवनम्

## चतुर्विंशतितीर्थङ्करस्तवनम्

यः प्राक् सोऽव्यात् ।। १ ।।
जिनोऽजितः पुनातु नः ।। २ ।।
शम्भव शङ्कर, शं कुरु शाश्वतम् ।। ३ ।।
मनोऽभिनन्दनो जिनः, पुनातु नः सनातनः ।। ४ ।।
कुमतशतभ्रमणजितं, सुमतिजिनं नमत सदा ।। ५ ।।
पद्मप्रभमुखपद्मप्रभतनु, पद्मप्रभजिन पद्मां प्रवितर ।।६।।
अथ सुपार्श्वजिनः प्रथितनित्यसुखं,
प्रथयतात् प्रबलं मन्मथदूरभितः ।। ७ ।।

परमचन्द्रनाथसच्चरणपङ्कजद्वयं ।
स्मरतघस्मरस्मय, स्मरशरासनापहं ॥ ८ ॥

पुष्पबाणमदमर्दने, पुष्पदन्तसमदीधितौ ।
पुष्पदन्तपदपङ्कजे पुष्पलिड् भवतु मन्मनः ॥ ९ ॥

जातिजरातङ्कातुरखेदात् कौतुकभीतिप्रीतिविषादात् ।
पातकपाकात् जातनिदाघं शीतलनाथः पातु बुधौघं॥१०॥

श्रेयः पथद्योतकमेकरूपं, श्रेयस्करं शाश्वतबोधसौख्यं ।
श्रेयः समृध्यर्थमहं नमामि, श्रेयांसमर्हन्तमनाद्यनन्तम् ॥११

जिनो वासुपूज्यो मनीषिप्रपूज्यः,
स्वनिर्दोष निर्वेष नित्यप्रकाशः ।
तनोतु सुवेषाभिलाषोत्सुकानां-
मनोदोषनिः शेषनिष्पेष्यवेषः ॥ १२ ॥

पत्युस्ते विमलजिनेन्द्र ! विष्टपानां,
नित्यश्रीसदनममं पदारविन्दम् ।
प्रीत्याहं प्रतिदिनमानतोऽस्मि-
साक्षात्प्रत्यक्षीकृतसकलार्थसिद्ध्यै ॥ १३ ॥

चिन्ताविषादमदखेदजराकृतान्त,
सन्तापदूरमभवं भुवनैककान्तं ।
चिन्तामणिं दिविजभूतमनाद्यनन्तं,
शान्तं निरन्तरमहं प्रणमाम्यनन्तं ॥ १४ ॥

द्युतिजितदिननाथः सर्वविद्यासनाथः,
प्रविहतरतिनाथः श्रीवधूप्राणनाथः ।
शतमखमुखनाथः साङ्गपूर्वाङ्गनाथः,
कृतहितगणनाथः पातु मां धर्मनाथः ॥ १५ ॥

शान्तिजिनमहं नमामि, शान्तमन्तकान्तकं,
कान्तिविजितसोमसूर्यलक्षकोटिदीधितम् ।
शान्तिकरमनन्तबोधवीर्यसौख्यमक्षयं,
भ्रान्तिरहितभव्यसेव्यपादपङ्कजद्वयं ॥ १६ ॥

ग्रन्थग्रन्थिग्लपनरहितं धीमतां यस्य रूपं,
पन्थाः साक्षाज्जगति विदुषां श्रेयसो यस्य धर्मः ।
मन्थाद्रीन्द्रः श्रुतशतसुधावारिधेर्यस्य तर्कः,
कुन्थुः पायाज्जिनपतिरयं सर्वगीर्वाणवन्द्यः ॥ १७ ॥

देवदुन्दुभिपुष्पवृष्टिसितातपत्रसुचामरैः ।
भाविशेषमृगेन्द्रपीठसुनादपिण्डिमभूरुहैः ॥
यो विभाति निरञ्जनो निरुपाधिबोधसुधानिधिः ।
सोऽवतात् परमेश्वरोऽरजिनेश्वरो जगदीश्वरः ॥१८॥

कामक्रोधकलङ्ककर्मकपटक्रीडाकृतान्तक्षयः ।
क्षामक्षेत्रकषायकुञ्जरघटासञ्चारपञ्चाननः ॥
हेमक्ष्माधररम्य पाण्डुकशिलाजन्माभिषेकोल्लस–,
च्छ्रीमान् मल्लिजिनेश्वरो दिशतु नः श्रेयःपदं शाश्वतम्१९

इक्षुशरासनाऽचलविलासपरिक्षयपाकशासनो ।
वीक्षसुबोधवीर्यसुखवारिधिवर्द्धनशीतदीधितिः ॥
मोक्षमनस्विनीनिविडपीनपयोधरकुम्भपल्लवो ।
रक्षतु रक्षिताऽखिलमुनिप्रकरो मुनिसुव्रतेश्वरः ॥२०॥

नमिजिनकर्मदूर निजतत्त्वनिराहतपूर्वभाक्पते ! ।
शमिधनशर्मसार यजनस्व विराजितसर्वदृक्पते ! ॥
दमिधन धर्मधीर विजयस्व धराजितसर्ववाक्पते ! ।
नमिजिन नम्राचारसुजनस्वमराधित सर्ववाक्पते ! ॥२१॥

प्रमदाभ्यः पातकेभ्यः पवनशिखिजलक्ष्माम्बराक्रमिकेभ्यः
समरेभ्यः शात्रवेभ्यः स्वपरकृतरुजादुःखशास्त्राहतिभ्यः
कुमतिभ्यो कण्टकेभ्यः कुपितनरसुरक्रूरसत्त्वाननेभ्यः
कुमतेभ्यो भीतजीवानवतु शिवसुखश्रीपतिर्नेमिनाथः ॥२२॥

योगसौगतेन्द्रसांख्यभाट्टबौद्धगोचरं भवोपसर्गवर्जितम् ।
नागराजपद्मिनीधृतातपत्रचामरादिशोभमानवैभवम् ।
योगियोगगम्यशुद्धसिद्धचिन्मयप्रमाणसाधुसाधितम् ।
रागरोषदोषदूर ! पार्श्वनाथमहं नमामि शाश्वतश्रियै ॥२३॥

कुमतकुञ्जरमृगाधिपं कुमुदचन्द्र संस्तुतसमग्रशासनम् ।
स्वमतवार्द्धिविधुमाघनन्दिमुनिनाथवन्दितलसत्पदाम्बुजम् ॥
नमदशेषनरनागनाकरमणारविन्दचयकोटिदीधितिम् ।
शमदमादिपतिवर्द्धमानजिनपं नमाम्यहमनारतश्रियै ॥२४॥

नमो नम्रजनानन्द, स्यन्दिने माघनन्दिने ।
जगत्प्रसिद्धसिद्धान्तवेदिने चित्प्रमोदिने ॥ २५ ॥

इति चतुर्विंशतितीर्थङ्करस्तवनं समाप्तम् ॥

# शान्तिनाथस्तोत्रम्

त्रैलोक्याधिपतित्वसूचनपरं लोकेश्वरैरुद्धृतं,
यस्योपर्युपरीन्दुमण्डलनिभं छत्रत्रयं राजते ।
अश्रान्तोद्गतकेवलोज्ज्वलरुचा निर्भर्त्सितार्कप्रभं,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथःसदा॥१॥

देवः सर्वविदेव एष परमो नान्यस्त्रिलोकीपतिः,
सन्त्यस्यैव समस्ततत्त्वविषया वाचः सतां सम्मताः ।
एतद् घोषयतीव यस्य विबुधैरास्फालितो दुन्दुभिः,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथः सदा॥२॥

दिव्यस्त्रीमुखपङ्कजैकमुकुरप्रोल्लासिनानामणि–
स्फारीभूतविचित्ररश्मिरचितानम्रामरेन्द्रायुधैः ।
सच्चित्रीकृतवातवर्त्मनि लसत् सिंहासने यः स्थितः,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथःसदा॥३॥

गन्धाकृष्टमधुव्रतव्रजरुतैर्व्यापारिता कुर्वती,
स्तोत्राणीव दिवः सुरैः सुमनसां वृष्टिर्यदग्रेऽभवत् ।
सेवायातसमस्तविष्टपपतिस्तुत्याश्रयस्पर्धया,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथःसदा॥४॥

खद्योतौ किमुतानलस्य कणिके शुभ्राभ्रलेशावथ,
सूर्याचन्द्रमसाविति प्रगुणितौ लोकाक्षियुग्मैः सुरैः ।
तर्क्येते हि यदग्रतोऽतिविशदं तद्यस्य भामण्डलं,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथः सदा ॥५॥

यस्याशोकतरुर्विनिद्रसुमनोगुच्छप्रसक्तैः क्वणद्,
भृङ्गैर्भक्तियुतैः प्रभोरहरहर्गायन्निवास्ते यशः ।
शुभ्रं साभिनयो मरुच्चलल्लतापर्यन्तपाणिश्रिया,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथः सदा ॥६॥

विस्तीर्णाखिलवस्तुतत्त्वकथनापारप्रवाहोज्ज्वला,
निःशेषार्थिनिषेविताऽतिशिशिरा शैलादिवोच्चकैः ।
प्रोद्भूता हि सरस्वती सुरनुता विश्वं पुनाना यतः,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथः सदा ॥७॥

लीलोद्वेल्लितबाहुकङ्कणरणत्कारप्रहृष्टैः सुरैः,
चञ्चच्चन्द्रमरीचिसञ्चयसमाकारैश्चलच्चामरैः ।
नित्यं यः परिवीज्यते त्रिजगतां नाथस्तथाऽप्यस्पृहः,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथः सदा ॥८॥

निःशेषश्रुतबोधवृद्धमतिभिः प्राज्यैरुदारैरपि,
स्तोत्रैर्यस्य गुणार्णवस्य हरिभिः पारो न सम्प्राप्यते ।
भव्याम्भोरुहनन्दिकेवलरविर्भक्त्या मयाऽपि स्तुतः,
सोऽस्मान् पातु निरञ्जनो जिनपतिः श्रीशान्तिनाथः सदा ॥९॥

# श्रीपार्श्वनाथस्तोत्रम्

यच्छुद्धबोधजलधिं समुपास्य भास्वद् ,
रत्नत्रयं शिवसुखाय समाससाद ।
लोके विलोकितसमस्तपदार्थसार्थं,
श्रीपार्श्वनाथमनघं तमहं नमामि ॥ १ ॥

उत्पत्तिभिर्न जलधिशशिकौस्तुभाद्या,
नो बान्धवा मुररिपोर्वसतिर्न वक्षः ।
यस्याः करे न कमलकमलामुदं सा,
पार्श्व प्रभो ! विशदबोधमयी विदध्यात् ॥ २ ॥

येनात्मनात्मनि निवेश्य मुनिःप्रकम्प-,
मालोकितं दृगवबोधमयं स्वरूपं ।
व्यामोहविभ्रमभिदे लिमशक्तिधाम,
पार्श्वप्रभुः प्रभवताद्भवतापशान्त्यै ॥ ३ ॥

अस्त्रं विनाऽपि मदनाऽरिमपाचकार,
यः शीलशैलशिखरासनसंस्थितान्तः ।
अव्यात् स दिव्यजनताजनितोरुधर्म,
सन्नर्महर्म्यमपहस्तितकर्मधर्मः ॥ ४ ॥

यस्याश्च विंशति शति रसना प्रसिद्धाः,
तस्याऽपि शक्तिरसती भुजगेश्वरस्य ।

यत्संस्तवे विबुधसंस्तुतपादपद्मं,
तं संस्तुवन्कथमहं न हि हास्यधामा ॥ ५ ॥

वैयात्यमेत्य जिननाथ ! तथापि किञ्चित्,
शक्तिच्युतोऽपि तव भक्तिभरैः करिष्ये ।
किं वा न शैलशिखरोच्चगृहाग्रभागं,
निश्रेणिकाभिरधिरोहति वामनोऽपि ॥ ६ ॥

यस्ते गुणौघगणनां गुणरत्नराशेः,
सम्यक् चिकीर्षति हृषीकविघातकस्य ।
पाथोनिधेः स पयसां कलशैः प्रमाण–
मभ्यस्तु प्रतिदिनं प्रयतान्तरङ्ग ॥ ७ ॥

शान्तं पुराणपुरुषं परमार्थसार–
मानन्दमेदुरमनन्तसुखं विरागम् ।
चिद्रूपमुज्झितसमस्तजगत्प्रपञ्चं,
त्वां नौमि नित्यमजरं प्रसरत्प्रतापम् ॥ ८ ॥

संसारपारग ! महेश्वर ! विश्वरूप ! ।
विश्वप्रकाश ! पुरुषोत्तम ! सिद्ध ! बुद्ध !
ब्रह्मन्ननन्त ! महिमन् ! भगवन् ! जिनार्क !
मां रक्ष रक्ष शरणागतरक्षदक्ष ! ॥ ९ ॥

निःकाम ! निःक्रिय ! निरामय ! निःकलङ्क !
निर्द्वन्द्व ! निर्मल ! निरञ्जन ! निर्विकार !

निर्मोह ! निष्कल ! निरावरणस्वभाव !
निर्वाणकारण ! दयां कुरु देवदेव ! ॥ १० ॥

वन्दारुसुन्दरसुरेन्द्रशिरःकिरीट,
माणिक्यरश्मिचयविच्छुरिताङ्घ्रियुग्मे ।
सत्त्वोपकारिणि जगत् त्रितयैकनाथे,
सज्ज्ञानशालिनि निवेदिततत्त्वसार्थे ॥ ११ ॥

चित्तं प्रसीदति न यस्य भवत्यधीशे,
नृत्वेऽपि किं स जडधीर्द्विपदः पशुर्न ।
देवाधिदेव ! विमुखास्त्वयि धर्मतीर्थे,
स्वर्गश्रियो जडधियो विमुखा न किं ते ॥ १२ ॥

लोको यथाऽत्रहितमानसवृत्तिरेष,
चित्ते विचिन्तयति राज्यकलत्रपुत्रम्,
त्वत्पादपद्मयुगलं विमलं तथा चेत्,
किं स्यान्न मुक्तिरमणीरमणोऽतिवेगात् ॥ १३ ॥

रूपं जगन्नयननन्दनमन्तरङ्गं,
नीरागमाऽऽस्यमभितः प्रमदोत्तरङ्गं ।
लोकोपकारिवचनं चरणं च शुद्धं,
किं तेन तद्यदिह विस्मयकृन्न देव ! ॥ १४ ॥

याऽगोचरा शशधरस्य च सप्तसप्ते-,
र्निर्मुक्तदृष्टिरसमा प्रशमैकधाम ।

ध्वान्ताऽऽवलिर्जनमनः शयने शयाना,
सा शुद्धबोधमहसा भवता निरस्ता ॥ १५ ॥

मिश्रोदये समुपयासि न कालिमानं,
सच्चक्रमत्र नयसे न वियोगिभावं ।
दोषाकरत्वमुररीकुरुषे न यच्च,
तत्कोऽप्यसि क्षितितले त्वमपूर्वचन्द्रः ॥१६॥

निःश्रीकृतं कुवलयं नयसे न देव !
शोभाच्युतं च न कलानिधिमातनोषि ।
तापं करोति जगतो न कदाचिदत्र,
तत्कोऽप्यसि त्रिभुवने त्वमशीतरश्मिः ॥१७॥
स्थैर्येण देवगिरिणा सदृशस्त्वमीश, !
सूर्येण भूरिमहसा शशिना च कान्त्या ।
देवोपमानमिति यत्तदयुक्तमुक्तं,
तुल्यः किमम्बुनिधिना जलबिन्दुरेकः ॥ १८ ॥
संसारसागरमपारमशेषजन्तून् ,

तस्या पिपासुरचिराज्जिननाथ ! पार–,
मावम्बतां तव नरोत्कितरी मनुष्यः ॥ १९ ॥
धन्यास्त एव गुणिनो भुवने त एव ,
नामाऽपि ये त्रिभुवनेश्वर ! ते स्मरन्ति ।

ध्यायन्ति ये पुनरशेषहृषीकसौख्यं,
मुक्त्याभवन्तमजरं किमु वच्मि तेषाम् ॥ २० ॥

नृत्यद्भिराशुगवशात् सरलैश्च शाखा-,
हस्तैर्मृदङ्गनिनदैः श्रुतिसौख्यकृद्भिः ।
भव्यानयं चलद्रुमो भवतः पुरस्थः,
पूजाकृते जिन ! समाह्वयतीव लोकान् ॥ २२ ॥

वल्गज्जलाऽनलकरालमृगारिचौर,
मातङ्गमारिभुजगाऽमयबन्धनोत्थम् ।
सर्वं भयं यदि विनाशमुपैति देव, !
युष्मत्पदस्मरणतोऽत्र किमद्भुतं तत् ॥ २२ ॥

स्वस्त्यस्तु देव ! भवते विजितस्मराय,
स्वस्त्यस्तु देव ! भवते वरशासनाय ।
स्वस्त्यस्तु देव ! भवते भवनाशनाय,
स्वस्त्यस्तु देव ! भवते परमेश्वराय ॥ २३ ॥

तुभ्यं नमः शमसुखाऽमृतसागराय,
तुभ्यं नमो भुवननीरजभास्कराय ।
तुभ्यं नमो निहतमोहमहाग्रहाय,
तुभ्यं नमो विमलकेवलविग्रहाय ॥ २४ ॥

वन्दारुत्रिदशेन्द्रसुन्दरशिरः कोटीरहीरप्रभा,
भास्वत्पादपयोजमुज्ज्वलसत्कैवल्यलक्ष्मीगृहम् ।

श्रीमद्रावणपत्तनाधिपममुं श्रीपार्श्वनाथं जिनं,
भक्त्या संस्तुतवाननिन्द्यचरितःश्रीपद्मनन्दी मुनिः ।२५।

इति श्री पद्मनन्द्याचार्यविरचितपार्श्वनाथस्तोत्रम् सम्पूर्णं ।

## श्रीचिन्तामणिपार्श्वनाथस्तोत्रम्

किं कर्पूरमयं सुधारसमयं किं चन्द्ररोचिर्मयं,
किं लावण्यमयं महामणिमयं कारुण्यकेलीमयं ।
विश्वानन्दमयं महोदयमयं शोभामयं चिन्मयं,
शुक्लध्यानमयं वपुर्जिनपतेर्भूयाद् भवालम्बनम् ।। १ ।।
पातालं कलयन् धरां धवलयन् आकाशमापूरयन् ,
दिक्चक्रं क्रमयन् सुरासुरनरश्रेणिं च विस्मापयन् ।
ब्रह्माण्डं सुखयन् जलानि जलधेः फेनच्छलाल्लोलयन् ,
श्रीचिन्तामणिपार्श्वसम्भवयशो हंसश्चिरं राजते ।।२।।
पुण्यानां विपणिस्तमो दिनमणिः कामेभकुम्भे सृणिः,
मोक्षे निःसरणिः सुरद्रुसरणिः ज्योतिःप्रकाशारणिः ।
दाने देवमणिर्नतोत्तमजनश्रेणी कृपासारिणिः,
विश्वानन्दसुधाधृतिर्भवभिदे श्रीपार्श्वचिन्तामणिः ।।३।।
श्रीचिन्तामणिपार्श्वविश्वजनता सञ्जीवनस्त्वं मया,
दृष्टस्तात ! ततश्रियः समभवन्नाशक्रमा चक्रिणाम् ।
मुक्तिः क्रीडति हस्तयोर्बहुविधं सिद्धं मनोवाञ्छितं,
दुर्दैवं दुरितं च दुर्दिनभयं कष्टं प्रणष्टं मम ।। ४ ।।

यस्य प्रौढतमः प्रतापतपनः प्रोद्दामधामाजगज्,
जङ्घालः कलिकालकेलिदलनो मोहान्धविध्वंसकः ।
नित्योद्योतपदं समस्तकमलाकेलिगृहं राजते,
स श्रीपार्श्वजिनो जगद्धितकरश्चिन्तामणिः पातु माम् ॥५॥

विश्वव्यापितमो हिनस्ति तरणिर्बालोऽपि कल्पाङ्कुरो,
दारिद्र्याणि गजावलिं हरिशिशुः काष्ठानि वह्नेः कणः ।
पीयूषस्य लवोऽपि रोगनिवहं यद्वत्तथा ते विभोः,
मूर्त्तिः स्फूर्तिमती सती त्रिजगतां कष्टानि हर्तुं क्षमा ॥६॥

श्रीचिन्तामणिमन्त्रमोङ्कृतियुतं ह्रीङ्कारसाराश्रितम्,
श्रीमर्हन्नमिऊणपासकलितं त्रैलोक्यवश्यावहम् ।
द्वेधाभूतविषापहं विषहरं श्रेयः प्रभावाश्रयम्,
सोल्लासं वसहाङ्कितं जिनफुलिङ्गानन्दनं देहिनाम् ॥ ७ ॥

ह्रीं श्रींकारवरं नमोऽक्षरपरं ध्यायन्ति ये योगिनो,
हृत्पद्मे विनिवेश्य पार्श्वमधिपं चिन्तामणीसंज्ञकम् ।
भाले वामभुजे च नाभिकरयोर्भूयो भुजे दक्षिणे,
पश्चादष्टदलेषु ते शिवपदं द्वित्रैर्भवैर्यान्त्यहो ॥ ८ ॥

नो रोगा नैव शोका न कलहकलना नारिमारिप्रचारा,
नैवान्ध्यं नासमाधिर्न च दरदुरिते दुष्टदारिद्र्यता नो ।
नो शाकिन्यो ग्रहा नो न हरिकरिगणा व्यालवेतालजाला,
जायन्ते पार्श्वचिन्तामणिनतिवशतः प्राणिनां भक्तिभाजाम् ॥९॥

गीर्वाणद्रुमकामधेनुमणयस्तस्याङ्गणे रङ्गिणो,
देवा दानवमानवाः सविनयं तस्मै हितध्यायिनः ।
लक्ष्मीस्तस्य वशा वशेव गुणिनां ब्रह्माण्डसंस्थायिनी,
श्रीचिन्तामणिपार्श्वनाथमनिशं संस्तोति यो ध्यायति॥१०॥

इति जिनपतिपार्श्वः पार्श्वपार्श्वाख्ययक्षः,
प्रदलितदुरितौघः प्रीणितः प्राणिसङ्घः ।
त्रिभुवनजनवाञ्छा दानचिन्तामणीकः,
शिवपदतरुबीजं बोधिबीजं ददातु ॥ ११ ॥

## श्रीपार्श्वजिनस्तोत्रम्

( शृङ्खलायमकालङ्कृतम् )

त्रोटक छन्द

अमरेश्वरकीर्तितकीर्तिभरं, भरतेश्वरकारितबिम्बवरम् ।
वरवाणिजलोद्धृतपापमलं, मलवर्जितदेहमहाधवलम् ॥ १ ॥

बलगर्वितमोहमहारिहरं, हरकण्ठविनीलशरीररुचम् ।
रुचिराकृतिहारितविनमत, मतमानसमूहसमर्च्यमहम् ॥२॥

महनीयपदं हतमानमदं, मदनप्रभयङ्करपञ्चमुखम् ।
मुखदर्पणरोपितपूर्णविधुं, विधुरीकृतलोभभुजङ्गगरम् ॥३॥

करपल्लवतोलितकोकनदं, नरदेवमहामदनाशकरम् ।
कृपणासुमतां कृतसौख्यगणं, गणनोज्झितसद्गुणधामपरं॥४॥

परतीर्थिकसुञ्चितमूढपदं, पदरोपणहर्षितभोगधरम् ।
धरणेन्द्रफणौघनिरुद्धजलं, जलजाहितकोमलश्रीचरणम् ॥५॥
रणरागनिवारितदुर्यवनं, वनकुञ्जरगर्जितभीमभुवम् ।
भुवनत्रयचारुविकासकरं, अघपूरितदैत्यविलोल्यहरम् ॥६॥
हरशुम्भितमौलिविलासध्रुवं, ध्रुवशक्रसमर्चितस्तोत्रमहम् ।
महपार्श्वजिनेश्वरमोदरतं, नरक्षोभितपापविशुद्धकरम् ॥७॥
वरमोक्षसुखास्पदप्राप्तिकर, वरसम्पदमत्रसुयोगसुखम् ।
सुखमष्टककाव्यमहामतिदं, त्रिदशं भज पार्श्वजिनेश्वरम् ॥८॥

## श्रीपार्श्वनाथस्तोत्रम्

त्वज्जन्माभिषवोत्सवे सुरगिरौ श्वोच्छ्वासनिःश्वासजैः ।
स्वर्गीशान्मुशमानयस्त्वमनिलैरान्दोललीलां मुहुः ॥
किं कुर्याच्चव तादृशोऽयममरस्त्वत् क्षान्तिलब्धोदयः ।
पाठीनो जलधेरिवेत्यभिनुतः पार्श्वो जिनः पातु नः ॥१॥
निष्कम्पं तव शुक्लतामुपगतं बोध पयोधिर्महा–
वातोद्भूततनुर्विनीलसलिलः प्राप्नोति दूरान्तम् ।
ध्यानं ते बत वाचलस्य मरुतां श्वासानिलाद्वामरात्,
क्षोभः कः कथमित्यभीष्टुतिपतिः पार्श्वप्रभुः पातु नः ॥२॥
तीर्थेशाः सदृशो गुणैरनणुभिः सर्वेऽपि धैर्यादिभिः ।
सन्त्यप्येवमधीश ! विश्वविदितास्ते ते गुणाः प्रीणनाः ॥

तत्सर्वं कमठात्तथा हि महतां शत्रोः कृतापक्रियात् ।
ख्यातिर्या महतां न जातचिदसौ मित्रात्कृतोपक्रियात् ॥३॥

दूरस्थामरविक्रियस्य भवतो, बाधा न शान्तात्मनो ।
न क्रोधो न भयञ्च तेन न बुधैः, सोढेति संस्तूयसे ॥
माहात्म्यप्रशमौ तु विस्मयकरौ, तौ तेन तीर्थेशिनः ।
स्तोतव्यं किमिति स्तुतो भवतु नः, पार्श्वोभवोच्छित्तये ॥४॥

पश्यैतौ कृतवेदिनौ हि धरणौ, धर्म्यौचितीढाङ्कतौ ।
तावेवोपकृतिर्न ते त्रिभुवनक्षेमैकभूमेस्ततः ॥
भूभृत्पातनिषेधनं ननु कृतं चेत्प्राक्तनोपद्रवाः ।
कैर्नासन्निति सारसंस्तुतिकृतः पार्श्वो जिनः पातु नः ॥५॥

भेदोऽद्रेः फणिमण्डपः फणिवधू, छत्रं क्षतिर्घातिनां ।
कैवल्याप्तिरधातु देहमहिमा, हानिर्भवस्यामरी ॥
भीतिस्तीर्थकृदुद्गमोऽपगमनं, विघ्नस्य चासन्समं ।
भर्तुर्यस्य स सन्ततान्तकभयं, हन्तूग्रवंशाग्रणीः ॥ ६ ॥

किं ध्यानात्फणिनः फणीन्द्रयुवतेः क्षान्तेर्महेन्द्रात्स्वतः ।
तन्त्रामन्त्रविजृम्भणाद् बत रिपो, भीतेरयस्योदयात् ॥
कालाद्घातिहतेरिदं शममभू, द्दिव्यर्घ्यहस्तैः सुरै–
राशङ्क्यामरविघ्नविच्युतिरघं, हन्यात्स धीराग्रणीः ॥ ७ ॥

श्रुत्वा यस्य वचोऽमृतं श्रुतिसुखं, हृद्यं हितं हेतुमत् ।
मिथ्यात्वं दिविजोऽवमीद्विषमिव, व्याविद्धवैरोद्धुरम् ॥

यं स्तौति स्म च तादृशोऽप्युपनत, श्रेयः स पार्श्वो विभु–
र्विनीय दुरितस्थूलानलविदग्धाशस्यस्य सिद्धोहतात् ॥ ८ ॥
जातः प्राड्मरुभूतिरन्विभपतिर्देवः सहस्रारजो ।
विद्येशोऽच्युतकल्पजः क्षितिभृतां श्रीवज्रनाभिः पतिः ।
देवो मध्यममध्यमे नृपगुणैरानन्दनामाऽऽनते ।
देवेन्द्रो हतघातिसंहतिर-वत्वस्मान्म पार्श्वेश्वरः ॥ ९ ॥

इति श्रीपार्श्वनाथस्तोत्रम्

## श्रीगौतमस्तोत्रम्

श्रीइन्द्रभूतिं वसुभूतिपुत्रं, पृथ्वीभवं गौतमगोत्ररत्नं ।
स्तुवन्ति देवाः सुरमानवेन्द्राः, स गौतमो यच्छतु वाञ्छितं मे॥१
श्रीवर्धमानात् समवाप्य दीक्षां, मुहूर्तमात्रेण कृतानि येन ।
अङ्गानि पूर्वाणि चतुर्दशानि, स गौतमो यच्छतु वाञ्छितं मे॥२॥
श्रीवीरनाथेन पुरा प्रणीतं, मन्त्रं महानन्दसुखाय यस्य ।
ध्यायन्त्यमी सूरिवराः समग्राः, स गौतमो यच्छतु वाञ्छितं मे॥३
यस्याभिधानं मुनयोऽपि सर्वे, गृह्णन्ति भिक्षां भ्रमणस्य काले ।
मिष्टान्नपानादिभिः पूर्णकामाः, स गौतमो यच्छतु वाञ्छितं मे॥४
अष्टापदाद्रौ गगने स्वशक्त्या, ययौ जिनानां पदवन्दनाय ।
निशम्य तीर्थातिशयं सुरेभ्यः, स गौतमो यच्छतु वाञ्छितं मे॥५
त्रिपञ्चसङ्ख्याशततापसानां तपः कृशानामपुनर्भवाय ।
अक्षीणलब्ध्या परमान्नदाता स गौतमो यच्छतु वाञ्छितं मे॥६॥

शिवं गते भर्तरि वीरनाथे युगप्रधानत्वमिहैव मत्वा
पट्टाभिषेको विहितः सुरेन्द्रैः स गौतमो यच्छतु वाञ्छितं मे॥७॥

श्रीगौतमस्याष्टकमादरेण प्रबोधकाले मुनिपुङ्गवा ये।
पठन्ति ते सूरिपदं च देवा-नन्दं लभन्ते नितरां क्रमेण ॥८॥

## श्रीमहावीरस्तोत्रम्

जननजलधिसेतुर्दुःखविध्वंसहेतुः,
निहतमकरकेतुर्मारितनक्रकेतुः।
यमजननसमस्तोऽनिष्टनिषेधधातुः,
जगति जयति चन्द्रो वर्धमानो जिनेन्द्रः ॥१॥

शमदमयमधर्ता असारसंसारहर्ता,
सकलभुवनभर्ता भूरिकल्याणकर्ता।
परमपदसुधर्ता सर्वसन्देहहर्ता,
जगति जयति चन्द्रो वर्धमानो जिनेन्द्रः ॥२॥

कुगतिपथविजेता मोक्षमार्गस्य नेता,
सकलप्रकृतिहन्ता शुद्धतत्त्वस्यज्ञाता।
अधोगतिपरिहन्ता मोक्षमार्गेरमन्ता,
जगति जयति चन्द्रो वर्धमानो जिनेन्द्रः ॥३॥

सजलजलदनादो निर्जिताशेषवादः,
नरपतिनुतपादो वस्तुतत्त्वं जगाद।

सुरपमहितपादः क्रोधदावाग्निकन्दः,
जगति जयति चन्द्रो वर्धमानो जिनेन्द्रः ॥४॥
प्रबलबलविशालो मुक्तिकान्तारसालः,
विमलगुणविशालो नीतिकल्लोलमालः ।
अतुलसुखनिवासो भूरिसन्तापकालः,
जगति जयति चन्द्रो वर्धमानो जिनेन्द्रः ॥५॥
विषयविषविनाशो भूरिभाषानिवासः,
हृतभवभयपाशः दीप्तिसम्पूरिताशः ।
शमसुखविनिवासो कीर्तिवल्लीनिवासः,
जगति जयति चन्द्रो वर्धमानो जिनेन्द्रः ॥६॥
मदनमदविदारी चारुचारित्रधारी,
नरकगतिनिवारी मोक्षमार्गविहारी ।
नृसुरगमनकारी केवलज्ञानधारी,
जगति जयति चन्द्रो वर्धमानो जिनेन्द्रः ॥७॥
वचनसहनधीरः पापधूलिसमीरः,
कनकनिकरगौरः क्रूरकर्मारिशूरः ।
कलुषदहननीरः पातितानङ्गवीरः,
जगति जयति चन्द्रो वर्धमानो जिनेन्द्रः ॥८॥

## वीरस्तवनम्

अभानुभेद्यं तिमिरं नराणां, संसारसंज्ञं सहसा निगृह्णन् ।
अस्माकमाविष्कृतमुक्तिवर्त्मा, श्रीवर्धमानः शिवमातनोतु ॥१॥

आयतदिव्यशरीरं शिवसौख्यकरं सुदृग्भिराशास्यम् ।
रतिरागहीनमीडेऽपूर्वं श्रीवर्द्धमानकन्दर्पम् ॥ २ ॥

संसारदावानलमेघनीरं सम्मोहधूलीहरणे समीरः ।
मायारसादारणसारसीरं नमामि वीरं गिरिराजधीरम् ॥३॥

यो भूतभव्यभवदर्थयथार्थवेदी,
देवासुरेन्द्रमुकुटार्चितपादपद्मः ।
विद्यानदीप्रभवपर्वत एक एव,
तं क्षीणकल्मषगणं प्रणमामि वीरम् ॥४॥

जरी जरत्या स्मरणीश्मीश्वरं,
स्वयंवरी भूतमनश्वरश्रियः ।
निरामयं वीतमयं भवच्छिदं,
नमामि वीरं नृसुरासुरैः स्तुतम् ॥ ५ ॥

स्वहस्तरेखासदृशं जगन्ति,
विश्वानि विद्वानपि वीर्यमूर्तिः ।
अश्रान्तमूर्तिर्भगवान्स वीरः,
पुष्णातु नः सर्वसमीहितानि ॥ ६ ॥

यदाननेन्दोर्विबुधैकसेव्या दिव्यागमव्याजसुधास्रवन्ती ।
भव्यप्रवेकान्सुखसात्करोति पायादसौ वीरजिनेश्वरो नः ॥७॥

श्रियं परां प्राप्तमनन्तबोधं मुनीन्द्रदेवेन्द्रनरेन्द्रवन्द्यं ।
निरस्तकन्दर्पगजेन्द्रदर्पं नमाम्यहं वीरजिनं पवित्रं ॥ ८ ॥

अनेकान्तमयं यस्य मतं मतिमतां मतं ।
सन्मतिः सन्मतिं कुर्यात् सन्मतिर्यो जिनेश्वरः ॥९॥
परसमयतिमिरतरणिं भवसागरवारितरणवरतरणिं ।
रागपरागसमीरं, वन्दे देवं महावीरम् ॥ १० ॥
भगवन् ! भवरोगेण भीतोऽहं पीडितः सदा ।
त्वय्यकारणवैद्येऽपि सहथा किं तस्य कारणा ॥११॥
त्वं सार्वः सर्वविद्देव ! सर्वकर्मणि कर्मठः ।
भव्यश्चाहं कुतो वा मे भवरोगो न शाम्यति ॥१२॥
निर्मोह ! मोहदावेन देहजीर्णोरुकानने ।
दह्यमानतया शश्वन्मुह्यन्तं रक्ष रक्ष माम् ॥१३॥
संसारविषवृक्षस्य, सर्वापत्फलदायिनः ।
अङ्कुरं रागमुन्मूलं वीतराग ! विधेहि मे ॥ १४ ॥
कर्णधार ! भवार्णोधेर्मध्यतो मज्जता मया ।
कृच्छ्रेण बोधिनौर्लब्धा भूयान्निर्वाणपारगा ॥ १५ ॥

## अथ बाहुबल्यष्टकम्

( पं० श्रीपन्नालालसाहित्याचार्यरचितम् )

विजित्याग्रजं यो रणे स्वात्मवीर्याद् ।
विरक्तो बभूव क्षितौ प्राप्तराज्यात् ॥
तपस्यानिलीनं विलीनांहसं वै ।
सुनन्दासुतं तं सदाऽहं नमामि ॥ १ ॥

तपस्यां चरन् यो महाशीतवातं ।
खरांशुप्रतापं महाम्भोदवृष्टिम् ॥
प्रसेहे स्थिरं स्वात्मचिन्तायुतम् वै ।
सुनन्दासुतं तं सदाऽहं नमामि ॥ २ ॥

गृहीत्वा तपो येन भुक्तं न जातु ।
जलं नैव पीतं पिपासातुरेण ॥
विवृद्धो व्यधायि स्वकीयो गुणौघः ।
सुनन्दासुतं तं सदाऽहं नमामि ॥ ३ ॥

यदीये सुदेहे गिरीन्द्रेण तुल्ये ।
घनाः श्यामलाभाः सुलग्ना बभूवुः ।
सदा ध्यानमग्नं महामोक्षलग्नं ।
सुनन्दासुतं तं सदाऽहं नमामि ॥ ४ ॥

यदीयाङ्गलग्नं लतातन्तुजातम् ।
अकुर्वन् विदूरं सुरीखेचराद्याः ॥
युतं पत्रिवृन्दैः कुलायस्थितैर्वै ।
सुनन्दासुतं तं सदाऽहं नमामि ॥ ५ ॥

निमग्नं सदा स्वात्मसंचेतनायां ।
विलग्नं सदा मुक्तिकान्तानुबन्धे ।
दहन्तं सदा कर्मदावं महान्तं ॥
सुनन्दासुतं तं सदाऽहं नमामि ॥ ६ ॥

सुराः खेचराश्चानमन्ति स्म नित्यं ।
स्थितं ध्यानमध्ये गिरीन्द्रोपमानम् ॥
महाबोधकैवल्यलक्ष्म्या लसन्तं ।
सुनन्दासुतं तं सदाऽहं नमामि ॥ ७ ॥

विधूयाष्टकं यो विधीनां विदुष्टं ।
बभूवापवर्गेश्वरः क्षिप्रमेव ॥
नुतं देववृन्दैः स्तुतं साधुसंघैः ।
सुनन्दासुतं तं सदाऽहं नमामि ॥ ८ ॥

बाहुबल्यष्टकं नित्यं पठेद् यः शुद्धचेतसा ।
सोऽनन्तबलमाप्नोति नियमेन निरन्तरम् ॥९॥
इति बाहुबल्यष्टकं सम्पूर्णं ।

## श्रीबाहुबलिस्तोत्रम्

सकलनृपसमाजे, दृष्टिमल्लाम्बुयुद्धै-
र्विजितभरतकीर्ति, र्यः प्रवव्राज मुक्त्यै ।
तृणमिव विगणय्य, प्राज्यसाम्राज्यभारं,
चरमतनुधराणामग्रणीः सोऽवताद्वः ॥ १ ॥

भरतविजयलक्ष्मीर्जाज्वलच्चक्रमूर्त्या,
यमिनमभिसरन्ती क्षत्रियाणां समक्षं ।
चिरतरमवधूतापत्रपापात्रमासी-
दधिगत गुरुमार्गः सोऽवताद् दोर्बली वः ॥ २ ॥

स जयति जयलक्ष्मी, सङ्गमाशामवन्ध्यां,
विदधदधिकधामा सन्निधौ पार्थिवानाम् ।
सकलजगदगार–व्याप्तकीर्तिस्तपस्या–
मभजत यशसे यः सूनुराद्यस्य धातुः ॥ ३ ॥

जयति भुजबलीशो बाहुवीर्यं स यस्य,
प्रथितमभवदग्रे क्षत्रियाणां नियुक्ते ।
भरतनृपतिनाऽमा यस्य नामाक्षराणि,
स्मृतिपथमुपयान्ति प्राणिवृन्दं पुनन्ति ॥ ४ ॥

जयति भुजगवक्त्रोद्वान्तनिर्यद्गराग्निः,
प्रशममसकृदापत् प्राप्य पादौ यदीयौ ।
सकलभुवनमान्यः खेचरस्त्रीकराग्रोद्,
ग्रथितविततवीरुद्वेष्टितो दोर्बलीशः ॥ ५ ॥

जयति भरतराज प्रांशुमौल्यग्ररत्नो–,
पललुलितनखेन्दुः स्रष्टुराद्यस्य सूनुः ।
भुजगकुलकलापैराकुलैर्नाकुलत्वं,
धृतिबलकलितो यो, योगभृन्नैव भेजे ॥ ६ ॥

शितिभिरलिकुलाभैराभुजं लम्बमानैः,
पिहितभुजविटङ्को मूर्धजैर्वेष्टिताग्रैः ।
जलधरपरिरोध–व्याममूर्द्धेव भूध्रः,
श्रियमपुष–दनूनां दोर्बली यः स नोऽव्यात् ॥७॥

स जयति हिमकाले यो हिमानीपरीतं,
वपुरचल इवोच्चैर्बिभ्रदाविर्बभूव ।
नवघनसलिलौघैर्यश्च धौतोऽब्दकाले,
खरघृणिकिरणा-नप्युष्णकाले विषेहे ॥ ८ ॥

जगति जयिनमेनं योगिनं योगिवर्यै-
रधिगतमहिमानं मानितं माननीयैः ।
स्मरति हृदि नितान्तं यः स शान्तान्तरात्मा,
भजति विजयलक्ष्मी-माशु जैनीमजय्यां ॥ ९ ॥

इति श्रीबाहुबलिस्तोत्रम्

## वीतरागस्तोत्रम्

कल्याणकीर्तिविरचितम्

शान्तं शिवं शिवपदस्य परं निदानं,
सर्वज्ञमीशममलं जितमोहमानम् ।
संसारनीरनिधिमन्थनमन्दराऽगं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥१॥

अव्यक्तमुक्तिपदपङ्कजराजहंसं,
विश्वाऽवतंसममरैर्विहितप्रशंसम् ।
कन्दर्पभूमिरुहभञ्जनमत्तनागं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥२॥

संसारनीरनिधितारणयानपात्रं,
ज्ञानैकपात्रमतिमात्रमनोज्ञगात्रम् ।
दुर्वारमारघनपातनशातरागं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥३॥

शान्तं नितान्तमतिकान्तमनन्तरूपं,
योगीश्वरं किमपि संविदितस्वरूपम् ।
संसारमारश्रपथाद्भुतनिर्भराऽगं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥४॥

दुष्कर्मभीतजनताशरणं सुरेन्द्रैः,
निःशेषदोषरहितं महितं नरेन्द्रैः ।
तीर्थङ्करं भविकदापितमुक्तिमार्गं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥५॥

कल्याणवल्लिवनपल्लवनाऽम्बुवाहं,
त्रैलोक्यलोकनयनैकसुधाप्रवाहम् ।
सिद्धयङ्गनावरविलासनिबद्धरागं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥६॥

लोकावलोकनकलाऽतिशयप्रकाशं,
व्यालोककीर्तिवरनिर्जितकम्बुहास्यम् ।
वाणीतरङ्गनवरङ्गलसत्तडागं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥७॥

कल्याणकीर्तिरचिताऽऽलयकल्पवृक्षं,
ध्यानाऽनले दलितपापमुदारपक्षम् ।
नित्यं क्षमा[illegible]शेषनागं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥८॥
श्रीजैनसूरिविनतक्रमपद्मसेनं,
हेलाविनिर्दलितमोहनरेन्द्रसेनम् ।
लीलाविलङ्घितभवाऽम्बुधिमध्यभागं,
पश्यन्ति पुण्यरहिता न हि वीतरागम् ॥९॥

इति वीतरागस्तोत्रम्

## श्रीपद्मनन्दिरचितं वीतरागस्तोत्रम्

स्वात्मावबोधविशदं परमं पवित्रं,
ज्ञानैकमूर्तिमनवद्य–गुणैकपात्रं ।
आस्वादिताक्षयसुखामृतसत्परागं,
पश्यन्ति पुण्यसहिता भुवि वीतरागं ॥१॥
उद्योतयस्तपनशोषितपापपङ्कं,
चैतन्यचिह्नमचलं विमलं विशङ्कं ।
देवेन्द्रवृन्दमहितं करुणालताङ्गं,
पश्यन्ति पुण्यसहिता भुवि वीतरागं ॥२॥
जाग्रद्विशुद्धमहिमाविधिमस्तशोकं,
धर्मोपदेशविधिबोधितभव्यलोकं ।

आचारबन्धुरमितं जनता-सुरागं,
पश्यन्ति पुण्यसहिता भुवि वीतरागं ॥३॥

कन्दर्पसर्पमदनाशनवैनतेयं,
पापापहारजगदुत्तमनामधेयं ।
संसारसिन्धुपरिमन्थनमन्दरागं,
पश्यन्ति पुण्यसहिता भुवि वीतरागं ॥४॥

निर्वाणकञ्जकमलारसिकं विदम्भं ।
वर्द्धिष्णु सद्व्रतचयामृतपूर्णकुम्भं ।
बालाद् विमोहतरुखण्डनचण्डनागं,
पश्यन्ति पुण्यसहिता भुवि वीतरागं ॥५॥

आनन्दकन्दमुररीकृतधर्मपक्षं,
ध्यानाग्निदग्धनिखिलोद्धतकर्मकक्षं ।
व्यस्ताश्रवाञ्जगवृघातविधायि योगं,
पश्यन्ति पुण्यसहिता भुवि वीतरागं ॥६॥

स्वच्छोच्छलद्ध्वनिविवर्जिन्मेघनादं,
स्याद्वादवादिनमपाकृतिसद्विघातं ।
निःसीमसंयमसुधारससत्तडागं,
पश्यन्ति पुण्यसहिता भुवि वीतरागं ॥७॥

सम्यक्प्रमाणकुमुदाकरपूर्णचन्द्र !
माङ्गल्यकारणमनन्तगुणं वितन्द्रं ।

इष्टप्रदानविधिपोषितभूमिभागं,
पश्यन्ति पुण्यसहिता भुवि वीतरागं ॥८॥
श्री पद्मनन्दिरचितं किल वीतरागं,

यः कोमलेन वचसा विनयादधीते,
स्वर्गापवर्गकमला तमलं वृणीते ॥९॥

इति श्रीवीतरागस्तोत्रं सम्पूर्ण

## श्रीवीतरागस्तोत्रम्

गणेन्द्रसेव्यं मुनिवृन्दवन्द्यं, देवेन्द्रपूज्यं भुवनेन्द्रध्येयं ।
त्रैलोक्यनाथं त्रिजगच्छरण्यं, श्रीवीतरागं प्रणमामि नित्यं ॥१॥
सर्वज्ञमेकं विगताभिमानं, श्रीदर्शनं केवलिनामयुक्तं ।
सौख्याकरं वीर्यगुणं विशालं, श्रीवीतरागं प्रणमामि नित्यं॥२॥
सत्प्रातिहार्यातिशयं गरिष्ठं, सिंहासनस्थं समशत्रुमित्रं ।
दिव्यध्वनिपोषितभव्यलोकं, श्रीवीतरागं प्रणमामि नित्यं॥३॥
श्रीशान्तिरूपं नयनोत्पलं वै, श्रीदीप्तिमूर्ति गतसर्वसङ्गं ।
निरायुधं निर्भयरत्नयुक्तं, श्रीवीतरागं प्रणमामि नित्यं ॥४॥
निर्भूषणं रागविकारहीनं, भव्यैकधीरं हतपापवीरं ।
कर्मौघशत्रुं हतमोहपाशं, श्रीवीतरागं प्रणमामि नित्यं ॥५॥
श्रीमुक्तिनाथं भुवनैकसारं, जिनोत्तमं कीर्तिवरं महन्तं ।
सदोदयं तारितसर्वलोकं, श्रीवीतरागं प्रणमामि नित्यं ॥६॥

विद्यामयं धर्मकरं विमारं, यतेन्द्रियं श्रीऋषिनायकं तं ।
स्वयं गुरुं भूतपतिं विदोषं, श्रीवीतरागं प्रणमामि नित्यं॥७॥

दिगम्बरं धर्ममयं सुधीरं, शतेन्द्रवन्द्यं जगदेकतीर्थं ।
अपारसंसारसमुद्रपोतं, निर्ग्रन्थनाथेन नुतं जिनेन्द्रं ॥ ८ ॥

अखिलगुणसमुद्रं देवदेवैः प्रपूज्यं,
मुनिगणधरसेव्यं भव्यसत्त्वैकबन्धुम् ।
रहितनिखिलदोषं वीतरागं श्रियाढ्य,
सकलविमलकीर्त्यां संस्तुवे तद्गुणाय ॥ ९ ॥

## आत्मभावनाष्टकम्

अनुपमगुणकोशं, छिन्नलोभादिपाशम्,
वनभवनसमानं, केवलज्ञानमानम् ।
विनमदमरवृन्दं, सच्चिदानन्दकन्दम्,
जिनबलसमतत्त्वं, भावयाम्यात्मतत्त्वम् ॥ १ ॥

रहितसकलमोहं, मुक्तसंसारदाहं,
प्रहतवितथमार्गं, क्षीणनोकर्ममार्गं ।
सहजचरणसारं, जन्मवाराशिपारं,
स्वहितपरिणतत्वं, भावयाम्यात्मतत्त्वं ॥ २ ॥

अमृतसुखमनन्तं, निश्चलं मुक्तिकान्तं,
शमितखलकषायं, लब्धमुक्त्यभ्युपायम् ।

दमितकरणदन्ति, प्राप्तदुष्कर्मशान्तिम्,
भ्रमणविरहितत्वं, भावयाम्यात्मतत्त्वं ॥३॥

अकुटिलगतियुक्तं, भावकर्मातिरिक्तं,
सकलविमलबोधं, ध्वस्तसंसारबाधं ।
प्रकटितनिजधर्मं, निरस्तैकस्वरूपं,
विकृतिविरहितत्वं, भावयाम्यात्मतत्त्वं ॥४॥

प्रवरगुणकदम्बं, द्रव्यकर्मादिशम्बं,
भववननिविपोतं, शुद्धचित्स्वभावं ।
शिवसुखसुचरित्रं, घातिवल्लीलवित्रं,
नवमरसकतत्वं, भावयाम्यात्मतत्त्वं ॥५॥

स्मरकमलशशाङ्कं, शुष्कदुष्कर्मपङ्कं,
करणतिमिरभानुं, मुक्तिशैलेन्द्रसानुं ।
स्थिरतरसुखरूपं, नष्टकामोग्रतापं,
विरहितपरतत्वं, भावयाम्यात्मतत्त्वं ॥६॥

अजरअमरमेकं, विश्वलोकावलोकम्,
निजरुचिमणिदीपं शान्तकर्माग्नितापं ।
सुजनजनवसन्तं, मोक्षलक्ष्मीनिकेतं,
त्रिजगतिपरमतत्वं, भावयाम्यात्मतत्त्वं ॥७॥

त्रिदशनुतमनिन्द्यं, जैनयोगीन्द्रवन्द्यं,
मधुरयमलदूरं, शाश्वतानन्दपूरं ।

चिदमलगुणमूर्तिः, बालचन्द्रोरुकीर्तिः,
विदितसकलतत्त्वं, भावयाध्यात्मतत्त्वं ॥८॥

इति आत्मभावनाष्टकं सम्पूर्णं ।

## उपयोगाष्टकम्

अथ शुभमशुभं वा सत्यमस्ति क्रियाया–
फलमपघनभाजां निष्फलं नैव कर्म । ?
निरवधिपरिशुद्धब्रह्मगम्भीरमूर्तिः,
स जयति परमात्मा निष्फला यस्य सेवा ॥१॥

ननु शुभ-उपयोगः पुण्यबन्धस्य हेतुः,
प्रभवति खलु पापं तत्र यत्राशुभोऽसौ ।
तदुभयमपि न स्याद् देव ! शुद्धोपयोगाद्,
वरमिह तव सेवा यत्र तस्य प्रसूतिः ॥२॥

ध्रुवमयमशुभः स्याद् द्वेषसन्मोहरागैः,
अभिसरति शुभत्वं केवलं धर्मरागात् ।
निजमहिमनि रागः द्वेषमोहैरपोढः,
परिचुदढभावं याति शुद्धो यदा स्यात् ॥३॥

यदभिरुचितमस्मै मन्यते तद्धि पुण्यं,
यदनभिरुचितं तु प्राह तत्पापमज्ञः ।
प्रविलसति सदेतद् द्वैतमद्वैतमेव,
स्फुरति हृदयगर्भे तावकं यस्य तेजः ॥४॥

इह हि भवति पुण्यं कारणं भोगलक्ष्म्याः,
प्रभवति खलु तस्याः पुष्कला मोहवल्ली ।
इहमपि च विधत्ते पापवल्लीं दुरन्तां,
द्वयमिदमविशिष्टं हेतुमद्धेतुभावः ॥५॥
समभवमहमिन्द्रोऽनन्तशोऽनन्तवारान्,
पुनरपि च निगोतोऽनन्तशोऽन्तर्विवृत्तः ।
किमिह फलमभुक्तं यद्यद्यापि भोक्ष्ये ?
सकलफलविधत्ते कारणं देव ! देया ॥६॥
रमति झगिति रागं प्राप्य शुद्धोपयोगं,
भवति शमसुखानां पात्रमस्तान्तरागः ।
प्रशमसुखरसज्ञो ज्ञानमाप्नोत्यनन्तं,
भवति वरदजीवन्नेवमुक्तस्तदात्मा ॥७॥
अपगतफलकामो निष्फलं प्राप्तुकामः,
त्वयि निरवधि बोधेऽत्यन्तमाबद्धलक्ष्यः ।
स्वयमपि हि जनोऽयं पुण्यपापोपमर्दी-,
दनुभवति विशुद्धब्रह्मभासिस्वरूपम् ॥८॥

इत्युपयोगाष्टकम् ।

## श्रीवादिराजसूरिविरचितम्

अध्यात्माष्टकम् भुजङ्गप्रयातं छन्दः

विभावाद्यभावात् स्वभावं वहन्तं ।
सुबोधिप्रकर्षा-दबोधं दहन्तं ॥

नयातीतरूपं नयाम्भोधिचन्द्रं ।
भजेऽहं जगज्जीवनं श्रीजिनेन्द्रम् ॥१॥

दयादेयभावादनादेय दूरं ।
गुणानामभावाद् गुणाम्भोधिपूरम् ॥
सुचारित्र चर्यैक्षणातीतनिद्रं ।
भजेऽहं जगज्जीवनं श्रीजिनेन्द्रं ॥२॥

शुभं वाऽशुभं कर्म चैकं समस्तं ।
नयान् निश्चितं बन्धनद्धं निरस्तं ॥
स्वभावात्स्थिरत्वं स्वरूपं स्वसत्ताद्रं ।
भजेऽहं जगज्जीवनं श्रीजिनेन्द्रं ॥३॥

द्वयं चाद्वयं वस्त्वनित्यं च नित्यं ।
त्रिधा लभ्यमेतत् त्ववक्तव्य चिन्त्यम् ॥
लसत् सप्त भङ्गोर्मिमाला समुद्रं ।
भजेऽहं जगज्जीवनं श्रीजिनेन्द्रं ॥४॥

कुतस्त्यो विरोधादिदोषावकाशो ।
ध्वनिः स्यादिति स्यादहो यत् प्रकाशः ॥
इतीत्थं वदन्तं प्रमाणादरिद्रं ।
भजेऽहं जगज्जीवनं श्रीजिनेन्द्रं ॥५॥

प्रमाणं यतो द्वादशाङ्गाख्यशास्त्रं ।
सुवक्तुस्ततो धर्मकर्मादि पात्रम् ॥

फलं यत् तपोद्रोरभूद् भव्य ! भद्रं ।
भजेऽहं जगज्जीवनं श्रीजिनेन्द्रं ॥६॥
उपादानहाने फलं चाप्युपेक्षा ।
परैरन्यभावादिमाने सुशिक्षा ॥
तदाभासदकत्वाच्च तेषामभद्रं ।
भजेऽहं जगज्जीवनं श्रीजिनेन्द्रं ॥७॥
अतुल्या अनन्ता गुणा स्तावकीनाः ।
सदोषाः सुतुच्छा मतिर्मानहीना ॥
पदं प्राप्यमेतावतैवाहमिन्द्रं ।
भजेऽहं जगज्जीवनं श्रीजिनेन्द्रं ॥८॥

स्रग्धराछन्दः

वाधीराद्यर्हणा ते, सुरगति सुखदा, तुष्टिपुष्ट्यादिकर्त्री ।
दिव्या वागागमोत्था श्रुतिशरणिगताऽनन्तमिथ्यात्वहर्त्री ॥
रागद्वेषादिमुक्तो मुनिरिह विदितः शुद्धबोधाशयालुः ।
जन्मांहोवारणात् कस्तवमिममसृजद् वादिराजो दयालुः ॥९॥

## अद्याष्टकस्तोत्रम्

अनन्तकीर्तिविरचितम्

अद्याऽखिलं कर्म जितं मयाऽद्य, मोक्षो न दूरोऽननुभूतपूर्वः ।
तीर्णो भवार्णोनिधिरद्य घोरो जिनेन्द्रपादाम्बुजदर्शनेन ॥१॥
अद्य श्रियो मां वृणुतेऽद्य लोके, मान्योऽस्मि मान्यैरपि सर्वतोऽहं ।
उपार्जितं पुण्यमगण्यमद्य, जिनेन्द्रपादाम्बुजदर्शनेन ॥२॥

अद्य त्रिशुद्धया वरपात्रदानं, पूजाश्च शीलान्युपवासभेदाः ।
कृताश्च तेषां फलमद्य पूर्णं, जिनेन्द्रपादाम्बुजदर्शनेन ।।३।।
अद्य द्विधाकारि तपो मयोग्रं, धर्मो क्षमादिः परमाश्रितोऽद्य ।
श्रेयांसि भूयांस्यपि मे करेऽद्य, जिनेन्द्रपादाम्बुजदर्शनेन ।।४।।
अद्यापदो नः शमिता समस्ता, मनोरथा मे निखिलाश्च पूर्णाः।
अश्रेयसां सन्ततिरद्य नष्टा, जिनेन्द्रपादाम्बुजदर्शनेन ।।५।।
अद्येक्षितं मद्य रसायनानां, चिन्तामणिर्धाम च कामधेनुः ।
कल्पद्रुमार्थः फलितो ममाद्य, जिनेन्द्रपादाम्बुजदर्शनेन ।।६।।
अद्योत्तमाङ्गं मम सार्थमासीत्, मुखं सुवाचा मुखरायतेऽद्य ।
साफल्यमक्षं ध्रुवमद्यजातं, जिनेन्द्रपादाम्बुजदर्शनेन ।।७।।
अद्याऽहमास्मि सुतरां कृतार्थः, पुण्यात्मनामग्रपुरोगमोऽस्मि ।
जन्माद्य जातं सुफलं मदीयं, जिनेन्द्रपादाम्बुजदर्शनेन ।।८।।
अद्याष्टकं ये प्रपठन्ति नित्यं, अनन्तकीर्त्याख्यवरैर्मुनीन्द्रैः ।
आख्यातमेव भुवि ते च कीर्तिं, पद्मां भवन्ते परमां लभन्ते ।।९।।

इत्यद्याष्टकं समाप्तम् ।

## नवदेवतास्तोत्रम्

श्रीमन्तो जिनपा जगत्त्रयनुता दोषैर्विमुक्तात्मकाः,
लोकालोकविलोकनैकचतुराःशुद्धाः परं निर्मलाः ।
दिव्यानन्तचतुष्टयादिकयुताः सत्यस्वरूपात्मकाः,
प्राप्ता यैर्वसुविप्रातिहार्यविभवाः कुर्वन्तु मे मङ्गलम् ।।१।।

श्रीमन्तोनृसुरासुरेन्द्रमहिता लोकाग्रसंवासिनः,
नित्यं सर्वसुखाकरा भयहरा विश्वेषु कामप्रदाः ।
कर्मातीतविशुद्धभावसहिता ज्योतिः स्वरूपात्मकाः,
श्रीसिद्धा जनादर्शितास्तुरहिताः कुर्वन्तु मे मङ्गलम् ॥२॥

पञ्चाचारपरायणाः सुविमलाश्चारित्रसंद्योतका,
अर्हद्रूपधराश्च निस्पृहपराः कामादिदोषोज्झिताः ।
बाह्याभ्यन्तरसङ्गमोहरहिताः शुद्धात्मसंराधकाः,
आचार्या नरदेवपूजितपदाः कुर्वन्तु मे मङ्गलम् ॥३॥

वेदाङ्गं निखिलागमं शुभतरं पूर्णं पुराणं सदा,
सूक्ष्मासूक्ष्मसमस्ततत्त्वकथकं श्रीद्वादशाङ्गं शुभम् ।
स्वात्मज्ञानविवृद्धये गतमलाः येऽध्यापयन्तोऽनिशं,
निर्द्वन्द्वा वरपाठकाः सुविमलाः कुर्वन्तु मे मङ्गलम् ॥४॥

त्यक्त्वाऽऽशां भवभोगभूतनुजां मोहं परं दुस्त्यजं,
निःसङ्गाः करुणालयाश्च विरता दैगम्बरा धीधनाः ।
शुद्धाचाररता निजात्मरसिका ब्रह्मस्वरूपात्मकाः,
देवेन्द्रैरपि पूजिताः सुमुनयः कुर्वन्तु मे मङ्गलम् ॥५॥

जीवानामभयप्रदः सुखकरः संसारदुःखापहः,
*सौख्यं यो नितरां ददाति सकलं दिव्यं मनोवाञ्छितम् ।*
तीर्थेशैरपि धारितो ह्यनुपमः स्वर्मोक्षसंसाधकः,
धर्मः सोऽत्र जिनोदितो हितकरः कुर्यात् सदा मङ्गलम्।६।

स्याद्वादाङ्कधरं त्रिलोकमहितं देवैः सदा संस्तुतं,
सन्देहादि विरोधभावरहितं सर्वार्थसन्देशकम् ।
याथातथ्यमजेयमाप्तकथितं कोटिप्रभाभासितं,
श्रीमज्जैनसुशासनं हितकरं कुर्यात् सदा मङ्गलम् ॥७॥

सौम्याः सर्वविकारभावरहिताः शान्तिस्वरूपात्मकाः,
शुद्धध्यानलयाः प्रशान्तवदनाः श्रीप्रातिहार्यान्विताः ।
स्वात्मानन्दविकाशकाश्च सुभगाश्चैतन्यभावावहाः,
पञ्चानां परमेष्ठिनां हि कृतयः कुर्वन्तु मे मङ्गलम् ॥८॥

घण्टातोरणदामधूपघटकैः राजन्ति सन्मङ्गलैः,
स्तोत्रैश्चित्तहरैर्महोत्सवशतैर्वादित्रसङ्गीतकैः ।
पूजारम्भमहाभिषेकयजनैः पुण्योत्करैः सत्क्रियैः,
श्रीचैत्यायतनानि तानि कृतिनां कुर्वन्तु मे मङ्गलम् ॥९॥

इत्थं मङ्गलदायका जिनवराः सिद्धाश्च सूर्यादयः,
पूज्यास्ता नवदेवता अघहरास्तीर्थोत्तमास्तारकाः ।
चारित्रोज्ज्वलतां विशुद्धशमतां बोधिं समाधिं तथा,
श्रीजैनेन्द्र 'सुधर्म'-मात्मसुखदं कुर्वन्तु मे मङ्गलम् ॥१०॥

सर्वज्ञः सर्वदर्शी भवमरणजरान्तकशोकव्यतीतो ।
लब्धाहर्मीयस्वभावः क्षतसकलमलः शश्वदात्मानपायः ॥
दक्षैः संकोचिताक्षैर्भवमृतिचकितैर्लोकयात्रानपेक्षैः ।
नष्टाबाधात्मनीन-स्थिरविशदसुख-प्राप्तये चिन्तनीयः ॥

## चैत्यवन्दना

सद्वे देवलोके रविशशिभुवने व्यन्तराणां निकाये,
नक्षत्राणां निवासे ग्रहगणपटले तारकाणां विमाने ।
पाताले पन्नगेन्द्रे स्फुटमणिकिरणे ध्वस्तमिथ्यान्धकारे,
श्रीमत्तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥१॥

वैताढ्ये मेरुशृङ्गे रुचकनगवरे कुण्डले हस्तिदन्ते,
वक्षारे कूटनाद्रौ सुरकनकगिरौ नैषधे नीलवन्ते ।
चित्रे शैले विचित्रे यमकगिरिवरे चक्रवाले हिमाद्रौ,
श्रीमत्तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥२॥

श्रीशैले विन्ध्यशृङ्गे विपुलगिरिवरे अर्बुदे मानवाद्रौ,
सम्मेदे तारके वा कुलगिरिशिखरेऽष्टापदे स्वर्णशैले ।
रिक्ताद्रौ चोर्जयन्ते विमलगिरिवरे अञ्जने रोहणाद्रौ,
श्रीमत्तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥३॥

सद्द्वीपे पञ्चमेरौ क्षितिवरमुकुटे चित्रकूटे त्रिकूटे,
लाटे नाटे च घाटे विटपघनतटे देवकूटे विराटे ।
कर्णाटे हेमकूटे विकटतरकटे चक्रकूटे भुटङ्के,
श्रीमत्तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥४॥

अङ्गे वङ्गे कलिङ्गे धवलजिनगृहे सूरसेने तिलङ्गे,
गौडे चौडे पुरन्ध्रे वरतरद्रविडे कङ्कणे चापपुण्ड्रे ।

व्याघ्रे कौड्रे कलिङ्गे विजयजनपदे कर्णकूटे सुराष्ट्रे,
श्रीमत्तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥५॥

मेवाडे मालवे वा प्रचुरपुरवरे पुष्कले कच्छके वा,
नेपाले लाडडे वा कुवलयतिकले सिंहले पुङ्गले वा ।
पाञ्चाले कौशले वा विरहितसलिले जाङ्गले वा तमाले,
श्रीमत्तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥६॥

चम्पायां चन्द्रपुर्यां गजपुरमथुरापत्तने उज्जयिन्यां,
कौशाम्ब्यां कौशलायां कनकपुरवरे देवपुर्यां च काश्यां ।
लङ्कायां राजगेहे दशपुरनगरे भद्रिले वा विदेहे,
श्रीमत्तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥७॥

भूगर्भे अन्तरिक्षे गिरिशिखरतटे स्वर्णदीनीरतीरे,
स्वर्लोके नागलोके जलनिधिपुलिने भूरुहाणां निकुञ्जे ।
ग्रामे वा दुर्गमे वा जलथलविषये मध्यलोके त्रिलोके,
श्रीमत्तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥८॥

इत्थं श्रीजैनचैत्यस्तवनमनिशयं भक्तिभाजः त्रिसन्ध्यं,
प्रोद्यत्कल्याणहेतुं कलिमलहरणं ये पठन्ति प्रसिद्धं ।
तेषां श्रीतीर्थयात्राफलमतुलमलं जायते ह्यत्र मानां,
कार्ये सिद्धिं प्रभवति सततं चित्तमानन्दकारं ॥ ९ ॥

# देववन्दनाप्रयोगविधिः

मङ्गलाचरणम्

सिद्धं सम्पूर्णभव्यार्थं सिद्धेः कारणमुत्तमम् ।
प्रशस्तदर्शनज्ञानचारित्रप्रतिपादनम् ॥ १ ॥
सुरेन्द्रमुकुटाश्लिष्टपादपद्मांशुकेसरम् ।
प्रणमामि महावीरं लोकत्रितयमङ्गलम् ॥ २ ॥

भूमिस्पर्शनपूर्वकं पञ्चाङ्गनमस्कारं कुर्यात्

खम्मामि सव्वजीवाणं सव्वे जीवा खमंतु मे ।
मित्ती मे सव्वभूदेसु वैरं मज्झं ण केणवि ॥ ३ ॥
रायबंधपदोसं च हरिसं दीणभावयं ।
उस्सुगत्तं भयं सोगं रदिमरदिं च वोस्सरे ॥ ४ ॥
हा दुट्ठकयं हा दुट्ठचिंतियं भासियं च हा दुट्ठं ।
अंतो अंतो डज्झमि पच्छुत्तावेण वेदंतो ॥ ५ ॥
दव्वे खेत्ते काले भावे य कदावराहसोहणयं ।
णिंदणगरहणजुत्तो मणवचकाएण पडिक्कमणं ॥ ६ ॥
समता सर्वभूतेषु संयमः शुभभावना ।
आर्तरौद्रपरित्यागस्तद्धि सामायिकं मतं ॥ ७ ॥

## अथ चतुर्दिग्वन्दनं कुर्यात्

नववारणमोकारमन्त्रस्य जाप्यं कृत्वा प्राग्दिग्वन्दनं कुर्यात्
प्राग्दिग्विदिगन्तरे केवलिजिनसिद्धसाधुगणदेवाः ।

ये सर्वर्द्धिसमृद्धा योगिगणास्तानहं वन्दे ॥इतिपूर्वदिग्वन्दनं॥
नववारणमोकारमन्त्रस्य जाप्यं कृत्वा दक्षिणदिग्वन्दनं कुर्यात्
दक्षिणदिग्विदिगन्तरे केवलिजिनसिद्धसाधुगणदेवाः ।
ये सर्वर्द्धिसमृद्धा योगिगणास्तानहं वन्दे॥इतिदक्षिणदिग्वन्दनं॥
नववारणमोकारमन्त्रस्य जाप्यं कृत्वा पश्चिमदिग्वन्दनं कुर्यात्
पश्चिमदिग्विदिगन्तरे केवलिजिनसिद्धसाधुगणदेवाः ।
ये सर्वर्द्धिसमृद्धा योगिगणास्तानहं वन्दे॥इति पश्चिमदिग्वन्दनं॥
नववारणमोकारमन्त्रस्य जाप्यं कृत्वा उत्तरदिग्वन्दनं कुर्यात्
उत्तरदिग्विदिगन्तरे केवलिजिनसिद्धसाधुगणदेवाः ।
चतुर्दिग्वन्दायां प्रतिदिशं त्रिआवर्तं एकशिरोनतिं च कुर्यात् ।
ये सर्वर्द्धिसमृद्धा योगिगणास्तानहं वन्दे ॥इति उत्तरदिग्वन्दनं॥
※

## सामायिकप्रतिज्ञा—

तीर्थङ्करकेवलिसामान्यकेवलिउपसर्गकेवलिमूककेवलिअन्तःकृत्केवलिभ्यो नमो नमः। जिनोपदिष्टश्रुताय नमो नमः। सम्यग्दर्शनज्ञानचारित्रधारकाऽऽचार्योपाध्यायसर्वसाधुभ्यो नमो नमः। श्रीमूलसङ्घे कुन्दकुन्दाम्नाये बलात्कारगणे सेनगच्छे नन्दिसङ्घस्य परम्परायां आचार्य श्रीशान्तिसागरस्य पट्टशिष्यः आचार्यश्रीवीरसागरः संजातः तस्य शिष्यः आचार्यश्रीशिवसागरः तस्य शिष्योऽहं ……, जम्बूद्वीपस्य भरतक्षेत्रे आर्यखण्डे……प्रान्ते……नगरे ……जिनचैत्यालये सं० २०३ मासोत्तमे मासे……मासे…… पक्षे……तिथौ…वासरे…देववन्दनां द्विघटिकापर्यन्तं कुर्वेऽहम् ।

※ चतुर्दिग्वन्दनायां प्रतिदिशं त्रिआवर्तं एक शिरोनतिं च कुर्यात्

भो भगवन् ! प्रसीदन्तु प्रभुपादौ वन्देऽहं,
एषोऽहं सर्वसावद्ययोगाद्विरतोऽस्मि ।

अथ कृतविज्ञापनं

अथ ( पौर्वाह्णिक माध्याह्निक आपराह्णिक )
देववन्दनायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं ।
भावपूजावन्दनास्तवसमेतं चैत्यभक्तिकायोत्सर्गं
कुर्वेऽहं ।

## सामायिकदण्डकम्

त्रिआवर्तं एकां शिरोनतिं च कुर्यात्

णमोअरहंताणं णमो सिद्धाणं णमो आइरियाणं ।
णमो उवज्झायाणं णमो लोए सव्वसाहूणं ॥

चत्तारि मंगलं—अरहंता मंगलं, सिद्धा मंगलं,
साहू मंगलं, केवलिपण्णत्तो धम्मो मंगलं ।
चत्तारि लोगुत्तमा—अरहंता लोगुत्तमा, सिद्धा,
लोगुत्तमा, साहू लोगुत्तमा, केवलि पण्णत्तो धम्मो ।
लोगुत्तमो । चत्तारि सरणं पव्वज्जामि—अरहंते,
सरणं पव्वज्जामि, सिद्धे सरणं पव्वज्जामि,
साहू सरणं पव्वज्जामि, केवलिपण्णत्तं धम्मं,
सरणं पव्वज्जामि ।

अड्ढाइज्जदीव दोसमुद्देसु पण्णारसकम्मभूमिसु जाव अरहंताणं भयवंताणं आदियराणं तित्थयराणं जिणाणं जिणोत्तमाणं केवलियाणं सिद्धाणं बुद्धाणं परिणिव्वुदाणं अंतयडाणं पारयडाणं, धम्माइरियाणं, धम्मदेसियाणं, धम्मणायगाणं, धम्मवरचाउरंगचक्कवट्टीणं, देवाहिदेवाणं, णाणाणं दंसणाणं चरित्ताणं सदा करेमि किरियम्मं।
करेमि भंते! सामाइयं सव्वसावज्जजोगं पच्चक्खामि जावज्जीवं तिविहेण—

मणसा वचसा काएण ण करेमि ण कारेमि अण्णं कीरंतं पि ण समणुमणामि। तस्स भंते! अइचारं पडिक्कमामि, णिंदामि गरहामि अप्पाणं, जाव अरहंताणं भयवंताणं पज्जुवासं करेमि ताव कायं पावकम्मं दुच्चरियं वोस्सरामि।

अत्रापि त्रिआवर्तं एकां शिरोनतिं च विदध्यात्
(नववारपञ्चनमस्कारमन्त्रस्य जाप्यं कुर्यात्)

## चतुर्विंशतिस्तवः

अत्रापि त्रिआवर्तं एकां शिरोनतिं च कुर्यात्

थोस्सामि हं जिणवरे तित्थयरे केवली अणंतजिणे।
णरपवरलोयमहिए विहुयरयमले महप्पण्णे॥

लोयस्सुज्जोयवरे धम्मं तित्थंकरे जिणे वंदे ।
अरहंते कित्तिस्से चउवीसं चेव केवलिणो ॥
उसहमजियं च वंदे संभवमभिणंदणं च सुमइं च ।
पउमप्पहं सुपासं जिणं च चंदप्पहं वन्दे ॥
सुविहिं च पुप्फयंतं सीयल सेयं च वासुपुज्जं च ।
विमलमणंतं भयवं धम्मं संतिं च वंदामि ॥
कुंथुं च जिणवरिंदं अरं च मल्लिं च सुव्वयं च णमिं ।
वंदामि रिट्ठणेमिं तह पासं वड्ढमाणं च ॥
एवं मए अभित्थुआ विहुयरयमला पहीणजरमरणा ।
चउवीसं पि जिणवरा तित्थयरा मे पसीयंतु ॥
कित्तिय वंदिय महिया एदे लोगुत्तमा जिणा सिद्धा ।
आरोग्गणाणलाहं दिंतु समाहिं च मे बोहिं ॥
चंदेहिं णिम्मलयरा आइच्चेहिं अहियपयासंता ।
सायरमिव गंभीरा सिद्धा सिद्धिं मम दिसंतु ॥

अत्रापि त्रिआवर्त एकां शिरोनतिं च कुर्यात्

## अथ चैत्यभक्तिः

जयति भगवान् हेमाम्भोजप्रचारविजृम्भिता-
वमरमुकुटच्छायोद्गीर्णप्रभा परिचुम्बितौ ।
कलुषहृदया मानोद्भ्रान्ताः परस्परवैरिणो,
विगतकलुषाः पादौ यस्य प्रपद्य विशश्वसुः ॥१॥

तदनु जयति श्रेयान् धर्मः प्रवृद्धमहोदयः,
कुगतिविपथक्लेशाद्योऽसौ विपाशयति प्रजाः ।
परिणतनयस्याङ्गीभावाद्विविक्तविकल्पितं,
भवतु भवतस्त्रातृ त्रेधा जिनेन्द्रवचोऽमृतम् ॥२॥
तदनु जयताज्जैनी वित्तिः प्रभङ्गतरङ्गिणी,
प्रभवविगमध्रौव्यद्रव्यस्वभावविभाविनी ।
निरुपमसुखस्येदं द्वारं विघट्य निरर्गलं,
विगतरजसं मोक्षं देयान्निरत्ययमव्ययम् ॥३॥
अर्हत्सिद्धाचार्योपाध्यायेभ्यस्तथा च साधुभ्यः ।
सर्वजगद्वन्द्येभ्यो नमोऽस्तु सर्वत्र सर्वेभ्यः ॥४॥
मोहादिसर्वदोषारिघातकेभ्यः सदाहतरजोभ्यः ।
विरहितरहस्कृतेभ्यः पूजार्हेभ्यो नमोऽर्हद्भ्यः ॥५॥
क्षान्त्यार्जवादिगुणगणसुसाधनं सकललोकहितहेतुं ।
शुभधामनि धातारं वन्दे धर्मं जिनेन्द्रोक्तम् ॥६॥
मिथ्याज्ञानतमोवृतलोकैकज्योतिरमितगमयोगि ।
साङ्गोपाङ्गमजेयं जैनं वचनं सदा वन्दे ॥७॥
भवनविमानज्योतिर्व्यन्तरनरलोकविश्वचैत्यानि ।
त्रिजगदभिवन्दितानां वन्दे त्रेधा जिनेन्द्राणां ॥८॥
भुवनत्रयेऽपि भुवनत्रयाधिपाभ्यर्च्यतीर्थकर्तृणाम् ।
वन्दे भवाग्निशान्त्यै विभवानामालयालीस्ताः ॥९॥

इति पञ्चमहापुरुषाः प्रणुता जिनधर्मवचनचैत्यानि ।
चैत्यालयाश्च विमलां दिशन्तु बोधिं बुधजनेष्टाम् ॥१०॥
अकृतानि कृतानि चाप्रमेयद्युतिमन्ति द्युतिमत्सु मन्दिरेषु ।
मनुजामरपूजितानि वन्दे प्रतिबिम्बानि जगत्त्रये जिनानाम् ॥११
द्युतिमण्डलभासुराङ्गयष्टीः प्रतिमा अप्रतिमा जिनोत्तमानाम् ।
भुवनेषु विभूतये प्रवृत्ता वपुषा प्राञ्जलिरस्मि वन्दमानः ॥१२॥
विगतायुधविक्रियाविभूषाः प्रकृतिस्थाः कृतिनां जिनेश्वराणाम्
प्रतिमाः प्रतिमागृहेषु कान्त्या प्रतिमाः कल्मषशान्तयेऽभिवन्दे १३
कथयन्ति कषायमुक्तिलक्ष्मीं परया शान्ततया भवान्तकानाम् ।
प्रणमाम्यभिरूपमूर्तिमन्ति प्रतिरूपाणि विशुद्धये जिनानां ॥१४॥
यदिदं मम सिद्धभक्तिनीतं सुकृतं दुष्कृतं वर्त्मरोधि तेन ।
पटुना जिनधर्म एव भक्तिर्भवताज्जन्मनि जन्मनि स्थिरा मे ॥१५

अर्हतां सर्वभावानां दर्शनज्ञानसम्पदाम् ।
कीर्तयिष्यामि चैत्यानि यथाबुद्धि विशुद्धये ॥१६॥
श्रीमद्भवनवासस्थाः स्वयंभासुरमूर्तयः ।
वन्दिता नो विधेयासुः प्रतिमाः परमां गतिम् ॥१७॥
यावन्ति सन्ति लोकेऽस्मिन्नकृतानि कृतानि च ।
तानि सर्वाणि चैत्यानि वन्दे भूयांसि भूतये ॥१८॥
ये व्यन्तरविमानेषु स्थेयांसः प्रतिमागृहाः ।
ते च सङ्ख्यामतिक्रान्ताः सन्तु नो दोषविच्छिदे ॥१९॥

ज्योतिषामथ लोकस्य भूतयेऽद्भुतसम्पदः ।
गृहाः स्वयम्भुवः सन्ति विमानेषु नमामि तान् ॥२०॥
वन्दे सुरकिरीटाग्रमणिच्छायाभिषेचनम् ।
याः क्रमेणैव सेवन्ते तदर्चाः सिद्धिलब्धये ॥२१॥
इति स्तुतिपथातीतश्रीभृतामर्हतां मम ।
चैत्यानामस्तु संकीर्तिः सर्वास्रवनिरोधिनी ॥२२॥
अर्हन्महानदस्य त्रिभुवनभव्यजनतीर्थयात्रिकदुरित-
प्रक्षालनैककारणमतिलौकिककुहकतीर्थमुत्तमतीर्थम् ।२३।
लोकालोकसुतत्त्वप्रत्यवबोधनसमर्थदिव्यज्ञान-
प्रत्यहवहत्प्रवाहं व्रतशीलामलविशालकूलद्वितयम् ॥२४॥
शुक्लध्यानस्तिमितस्थितराजद्राजहंसराजितमसकृत् ।
स्वाध्यायमन्द्रघोषं नानागुणसमितिगुप्तिसिकतासुभगम्।२५।
क्षान्त्यावर्तसहस्रं सर्वदयाविकचकुसुमविलसल्लतिकम् ।
दुःसहपरीषहाख्यद्रुततररङ्गत्तरङ्गभङ्गुरनिकरम् ॥२६॥
व्यपगतकषायफेनं रागद्वेषादिदोषशैवलरहितम् ।
अत्यस्तमोहकर्दममतिदूरनिरस्तमरणमकरप्रकरम् ॥२७॥
ऋषिवृषभस्तुतिमन्द्रोद्रेकितनिर्घोषविविधविहगध्वानम् ।
विविधतपोनिधिपुलिनं सास्रवसंवरणनिर्जरानिःस्रवणम्।२८।
गणधरचक्रधरेन्द्रप्रभृतिमहाभव्यपुण्डरीकैः पुरुषैः ।
बहुभिः स्नातं भक्त्या कलिकलुषमलापकर्षणार्थममेयम्।२९।

अवतीर्णवतः स्नातुं ममापि दुस्तरसमस्तदुरितं दूरं ।
व्यपहरतु परमपावनमनन्यजय्यस्वभावभावगंभीरम् ।।२०।।

अताम्रनयनोत्पलं सकलकोपवह्नेर्जयात्,
कटाक्षशरमोक्षहीनमविकारतोद्रेकतः ।
विषादमदहानितः प्रहसितायमानं सदा,
मुखं कथयतीव ते हृदयशुद्धिमात्यन्तिकीम् ।।२१।।

निराभरणभासुरं विगतरागवेगोदयान्
निरम्बरमनोहरं प्रकृतिरूपनिर्दोषतः ।
निरायुधसुनिर्भयं विगतहिंस्यहिंसाक्रमात्,
निरामिषसुतृप्तिमद्विविधवेदनानां क्षयात् ।।२२।।

मितस्थितनखाङ्गजं गतरजोमलस्पर्शनं,
नवाम्बुरुहचन्दनप्रतिमदिव्यगन्धोदयम् ।
रवीन्दुकुलिशादिदिव्यबहुलक्षणालङ्कृतं,
दिवाकरसहस्रभासुरमपीक्षणानां प्रियम् ।।२३।।

हितार्थपरिपन्थिभिः प्रबलरागमोहादिभिः,
कलङ्कितमना जनो यदभिवीक्ष्य शोशुद्ध्यते ।
सदाभिमुखमेव यज्जगति पश्यतां सर्वतः,
शरद्विमलचन्द्रमण्डलमिवोत्थितं दृश्यते ।।२४।।

तदेतदमरेश्वरप्रचलमौलिमालामणि-
स्फुरत्किरणचुम्बनीयचरणारविन्दद्वयम्,

पुनातु भगवज्जिनेन्द्र ! तव रूपमन्धीकृतम्,
जगत् सकलमन्यतीर्थगुरुरूपदोषोदयैः ॥३५॥

## अञ्चलिका

इच्छामि भंते ! चेइयभत्तिकाउसग्गो कओ तस्सालोचेउं । अहलोय तिरियलोय उड्ढलोयम्मि किट्टिमाकिट्टिमाणि जाणि जिणचेयाणि ताणि सव्वाणि तिसुवि लोएसु भवणवासिय वाणविंतर जोइसिय कप्पवासियत्ति चउविहा देवा सपरिवारा दिव्वेण गंधेण, दिव्वेण पुप्फेण, दिव्वेण धूव्वेण, दिव्वेण चुण्णेण, दिव्वेण वासेण, दिव्वेण ण्हाणेण, णिच्चकालं अंचंति पुज्जंति, वंदंति, णमंसंति अहमवि इह संतो तत्थ संताइं णिच्चकालं अंचेमि पूजेमि वंदामि णमंसामि दुक्खक्खओ कम्मक्खओ बोहिलाहो सुगइगमणं समाहिमरणं जिणगुणसंपत्ति होदु मज्झं ।

कृतविज्ञापनं

अथ ( पौर्वाण्हिक माध्याह्निक अपराण्हिक ) देववन्दनायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं पञ्चमहागुरुभक्तिकायोत्सर्गं कुर्वेऽहम् ।

अत्रापि १२५पृष्ठलिखितसामायिकदण्डकं पठेत् तस्य पूर्वं पश्चाच्च त्रिः त्रिः आवर्तं एकां एकां शिरोनतिं कायोत्सर्गं च कुर्यात् ।

तदनन्तरं १२६ पृष्ठलिखित चतुर्विंशतिस्तवं पठेत् तस्य पूर्वं पश्चाच्च त्रिः त्रिः आवर्तं एकां एकां शिरोनतिं च कुर्यात् ।

## पञ्चगुरुभक्तिः

श्रीमदमरेन्द्रमुकुटप्रघटितमणिकिरणवारिधाराभिः ।
प्रक्षालितपदयुगलान् प्रणमामि जिनेश्वरान् भक्त्या ॥१॥

अष्टगुणैः समुपेतान् प्रणष्टदुष्टाष्टकर्मरिपुसमितीन् ।
सिद्धान् सततमनन्तान्नमस्करोमीष्टतुष्टिसंसिद्ध्यै ॥२॥

साचारश्रुतजलधीन् प्रतीर्य शुद्धोरुचरणनिरतानाम् ।
आचार्याणां पदयुगकमलानि दधे शिरसि मेऽहम् ॥३॥

मिथ्यावादिमदोग्रध्वान्तप्रध्वंसिवचनसन्दर्भान् ।
उपदेशकान् प्रपद्ये मम दुरितारिप्रणाशाय ॥४॥

सम्यग्दर्शनदीपप्रकाशकामेयबोधसम्भूताः ।
भूरिचरित्रपताकास्ते साधुगणास्तु मां पान्तु ॥५॥

जिनसिद्धसूरिदेशकसाधुवरानमलगुणगणोपेतान् ।
पञ्चनमस्कारपदैस्त्रिसन्ध्यमभिनौमि मोक्षलाभाय ॥६॥

इच्छामि भंते ! पंचमहागुरुभत्तिकाउसग्गो कओ, तस्सालोचेउं अट्ठमहापाडिहेरसंजुत्ताणं, अट्ठगुणसंपण्णाणं उड्ढलोयमत्थयम्मि पइट्ठियाणं सिद्धाणं, अट्ठपवयणमउसंजुत्ताणं आइरियाणं, आयारादिसुदणाणोवदेसयाणं उवज्झायाणं,

तिरयणगुणपालणरयाणं सव्वसाहूणं, णिच्चकालं अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ, कम्मक्खओ, बोहिलाहो सुगइगमणं, समाहिमरणं, जिणगुणसम्पत्ति होदु मज्झं ।

कृतविज्ञापनं

अथ ( पौर्वाण्हिक माध्याह्निक अपराह्निक ) देववन्दनायां पूर्वाचार्यानुक्रमेण सकलकर्मक्षयार्थं भावपूजावन्दनास्तवसमेतं चैत्यभक्ति पञ्चमहागुरुभक्ति च कृत्वा तद्धीनाधिकदोषविशुद्ध्यर्थं आत्मपवित्रीकरणार्थं समाधिभक्तिकायोत्सर्गं कुर्वेऽहं ।

अत्रापि १२५ पृष्ठलिखितसामायिकदण्डकं पठेत् तस्य पूर्वं पश्चाच्च त्रिः त्रिः आवर्तं एकां एकां शिरोनतिं कायोत्सर्गं च कुर्यात् ।

तदनन्तरं १२६ पृष्ठलिखितचतुर्विंशतिस्तवं पठेत् तस्य पूर्वं पश्चाच्च त्रिः त्रिः आवर्तं एकां एकां शिरोनतिं च कुर्यात् ।

## अथ समाधिभक्तिः

स्वात्माभिमुखसंवित्तिलक्षणं श्रुतचक्षुषा ।
पश्यन् पश्यामि देव ! त्वां केवलज्ञानचक्षुषा ॥१॥
शास्त्राभ्यासो जिनपतिनुतिः सङ्गतिः सर्वदार्यैः ।
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ॥

सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे ।
सम्पद्यन्तां मम भवभवे यावदेतेऽपवर्गः ॥२॥
जैनमार्गरुचिरन्यमार्गनिर्वेगता जिनगुणस्तुतौ मतिः ।
निष्कलङ्कविमलोक्तिभावना सम्भवन्तु मम जन्मजन्मनि ।३।
गुरुमूले यतिनिचिते चैत्यसिद्धान्तवार्धिसद्घोषे ।
मम भवतु जन्मजन्मनि संन्यसनसमन्वितं मरणम् ।४।
जन्मजन्मकृतं पापं जन्मकोटिसमार्जितम् ।
जन्ममृत्युजरामूलं हन्यते जिनवन्दनात् ॥ ५ ॥
आबाल्याज्जिनदेवदेव ! भवतः श्रीपादयोः सेवया,
सेवासक्तविनेयकल्पलतया कालोऽद्य यावद्गतः ।
त्वां तस्याः फलमर्थये तदधुना प्राणप्रयाणक्षणे,
त्वन्नामप्रतिबद्धवर्णपठने कण्ठोऽस्त्वकुण्ठो मम ॥६॥
तव पादौ मम हृदये मम हृदयं तव पदद्वये लीनम् ।
तिष्ठतु जिनेन्द्र ! तावद्यावन्निर्वाणसम्प्राप्तिः ॥ ७ ॥
एकापि समर्थेयं जिनभक्तिर्दुर्गतिं निवारयितुम् ।
पुण्यानि च पूरयितुं दातुं मुक्तिश्रियं कृतिनः ॥८॥
पंच अरिंजयणामे पंच य मदिसायरे जिणे वन्दे ।
पंच जसोयरणामे पंच य सीमंदरे वंदे ॥ ९ ॥
रयणत्तयं च वंदे चउवीसजिणे च सव्वदा वंदे ।
पंचगुरूणं वंदे चारणचरणं सदा वंदे ॥ १० ॥

अर्हमित्यक्षरं ब्रह्म, वाचकं परमेष्ठिनः ।
सिद्धचक्रस्य सद्बीजं सर्वतः प्रणिदध्महे ।। ११ ।।
कर्माष्टकविनिर्मुक्तं मोक्षलक्ष्मीनिकेतनम् ।
सम्यक्त्वादिगुणोपेतं सिद्धचक्रं नमाम्यहं ।। १२ ।।
आकृष्टिं सुरसम्पदां विदधते मुक्तिश्रियो वश्यता-
मुच्चाटं विपदां चतुर्गतिभुवां विद्वेषमात्मैनसाम् ।
स्तम्भं दुर्गमनं प्रति प्रयततो मोहस्य सम्मोहनम्,
पायात् पञ्चनमस्क्रियाक्षरमयी साराधना देवता ।।१३।।
अनन्तानन्तसंसार-सन्ततिच्छेदकारणम् ।
जिनराजपदाम्भोज, स्मरणं शरणं मम ।। १४ ।।
अन्यथा शरणं नास्ति, त्वमेव शरणं मम ।
तस्मात् कारुण्यभावेन, रक्ष रक्ष जिनेश्वर ! ।।१५।।
नहि त्राता नहि त्राता, नहि त्राता जगत्त्रये ।
वीतरागात् परो देवो, न भूतो न भविष्यति ।।१६।।
जिने भक्तिर्जिने भक्तिर्जिने भक्तिर्दिने दिने ।
सदा मेऽस्तु सदा मेऽस्तु सदा मेऽस्तु भवे भवे ।।१७।।
याचेऽहं याचेऽहं जिन ! तव चरणारविन्दयोर्भक्तिम् ।
याचेऽहं याचेऽहं पुनरपि तामेव तामेव ।।१८।।
विघ्नौघाः प्रलयं यान्ति शाकिनीभूतपन्नगाः ।
विषो निर्विषतां याति स्तूयमाने जिनेश्वरे ।।१९।।

इच्छामि भंते ! समाहिभत्तिकाउस्सग्गो कओ तस्सालोचेउं रयणत्तयसरूवपरमप्पज्झाणलक्खणं समाहिभत्तीए णिच्चकालं अंचेमि, पूजेमि, वंदामि, णमंसामि, दुक्खक्खओ कम्मक्खओ बोहिलाहो,सुगइगमणं, समाहिमरणं, जिणगुणसंपत्ति होदु मज्झं ।

[ यथाशक्ति शुद्धात्मगुणचिन्तनं कुर्यात् ]

## ध्यानोपदेशकोषः अथवा योगसारसङ्ग्रहः

भद्रं भूरिभवाम्भोधिशोषिणे दोषमोषिणे ।
जिनेशशासनायाऽस्तु कुशासनविशासिने ॥१॥
संयमोद्दाममारामं श्रीगुरोः पादपङ्कजम् ।
वन्दे देवेन्द्रवृन्दोद्यन्मौलिमालाकरार्चितम् ॥२॥
योगीन्द्रो रुन्द्रयोगाग्निदग्धकर्मेन्धनोऽङ्गिनाम् ।
विश्वज्ञो विश्वदृश्वाऽस्तु मङ्गलं मङ्गलार्थिनाम् ॥३॥
सद्वाग् रूपपदन्यास वर्णालङ्कारधारिणी ।
सन्मार्गाङ्गी सदैवास्तु प्रसन्ना नः सरस्वती ॥४॥
यस्माद् ध्यानं बुधैरिष्टं साक्षान्मोक्षस्य साधनम् ।
अतो मोक्षार्थिभव्येभ्यस्तदेवास्माभिरुच्यते ॥५॥
वैराग्यं दशधा धर्मो ध्यानाभ्यासोऽपवर्गदः ।
अतो मुमुक्षवो भव्या यतन्ते ध्यानसाधने ॥६॥
सर्वज्ञोपज्ञमाप्यापि दुर्लभं धर्ममङ्गिनः ।
प्रमादाद्धि प्रणश्यन्ति विचित्रा कर्मणां गतिः ॥७॥

सर्वसारं दुराराध्यं दुर्विज्ञेयं सुदुष्करम् ।
आत्मधर्ममवाप्यापि दग्धभाग्यो विलम्बते ॥८॥
कर्मसमित्समु-द्भूत-कालानलकरालितम् ।
प्रमादमदिरोन्मत्तं जाज्वलीति जगत्त्रयम् ॥९॥
कालानलमहाज्वाला-कलापपरिवारिताः ।
मोहान्धाः शेरते विश्वे परं जाग्रति योगिनः ॥१०॥
बोधशुद्धान्तरात्मानः प्रमादपरिवर्जिताः ।
उन्मूलयन्ति कर्माणि योगिनो ध्यानवायुना ॥११॥
कषायैरिन्द्रियैर्दुष्टै र्व्याकुलीक्रियते मनः ।
ततः कर्तुं न पार्यंत भावना गृहमेधिभिः ॥१२॥
वह्निना चेत् प्रचाल्येत काठिन्यं कनकं यथा ।
स्वभावचपलैर्भ्रातृ-पुत्रदारादिभिर्न किम् ॥१३॥
संसारभीरुभिस्तस्मात् प्राणिभिर्मोक्षकाङ्क्षिभिः ।
गेहवासः परित्याज्यो धीरैर्ध्यानप्रसिद्धये ॥१४॥
गेहवासे कुतः सौख्यमाशापाशविपाशिते ।
विषयामिषलुब्धानां मोहदावाग्निदीपिते ॥१५॥
सर्वसङ्गविमुक्तानां सन्तोषामृतपायिनाम् ।
शमात्मकं सुखं यत्स्यात् कुतस्तद्भोगगृद्धितः ॥१६॥
अध्यात्मजं निराबाधमात्मायत्तं भवेद् ध्रुवम् ।
अनुपमं सुखं पुंसां न तथा विषयात्मकम् ॥१७॥

विषयामिषसेवयास्तृप्तिर्नैवोपजायते ।
केवलं पापबन्धः स्यान्नानादुःखनिर्नृणाम् ॥१८॥

रागान्धबुद्धयो जीवाः सौख्याशाभिः वशीकृताः ।
सुखदातॄन् प्रपश्यन्ति विषयान् विषसन्निभान् ॥१९॥

तदुद्भवमजानानो जनोऽन्यत्र समीप्सति ।
यदन्यत्र स्थितं वस्तु तदन्यत्र किमाप्यते ॥२०॥

आत्यन्तिकस्वभावोत्थानन्तज्ञानसुखः पुमान् ।
परमात्माविपः कन्तुरहो माहात्म्यमात्मनः ॥२१॥

जानन्नपि न जानाति पश्यन्नपि न पश्यति ।
विषयेषु विषक्तात्मा शृण्वन्नपि शृणोति न ॥२२॥

न वेत्ति किं करोमीति कामसंमूढमानसः ।
बालिशः शिशुवन्नित्यं विधत्ते देहमण्डनम् ॥२३॥

तावदेव सुखी जीवो यावन्न स्निह्यति क्वचित् ।
स्नेहबन्धनबद्धस्य दुःखमेव पदे पदे ॥२४॥

न दुःखं न सुखं किंचित् संसारे परमार्थतः ।
वासनावासितो जन्तुः सुखं दुःखं च मन्यते ॥२५॥

दुःखितः सुखिनं पश्यन्नात्मानं सुखवान्न किम् ।
अन्यथा वैपरीत्येन तस्मात् संकल्पजं द्वयम् ॥२६॥

संकल्पोऽपि च जन्तूनां कारणं बन्धमोक्षयोः ।
वीतरागोऽपवर्गस्य रागो बन्धस्य कारणम् ॥२७॥

इहतः परलोके च वाञ्छद्भिः सौख्यमुत्तमम् ।
ध्याने यत्नः प्रकर्तव्यस्तच्च चित्तनिरोधनम् ॥२८॥
चित्तायत्तो व्रजेज्जीवः कृष्टा सूचीव सूत्रतः ।
गतिस्तत्र मतिर्यत्र तत्कुर्यान्मनसः क्षयम् ॥२९॥
मनोरोधे भवेद्रुद्धं विश्वमेव शरीरिभिः ।
प्रायोऽसंवृत्तचित्तानां शेषरोधोऽप्यपार्थकः ॥३०॥
तस्मान्मनोनिरोधाय रागद्वेषौ विवर्जयेत् ।
साम्यभावितभावानां ध्यानसिद्धिर्ध्रुवं भवेत् ॥३१॥
साम्यमेवादराद् भाव्यं किमन्यैर्ग्रन्थविस्तरैः ।
प्रक्रियामात्रमेवेदं वाङ्मयं विश्वमस्य हि ॥३२॥
साम्यादपि महाक्ष्वेडज्वरदुष्टजलग्रहाः ।
नियम्यन्तेऽपि सत्त्वाद्याः साम्याद्विश्वमपैतेऽखिलम्॥३३॥
एकचिन्तानिरोधो यस्तद्ध्यानं भावना परा ।
अनुप्रेक्षाऽथ चिन्ता वा तज्ज्ञैरभ्युपगम्यते ॥३४॥
छद्मस्थानामिदं ध्यानं भवेदन्तर्मुहूर्ततः ।
योगरोधो जिनेन्द्राणां कर्मौघध्वान्तभास्वताम्॥३५॥
ध्याता ध्यानं तथा ध्येयं फलं चेति चतुष्टयम् ।
योगसंग्रहसारेऽस्मिन् गीयते योगिपुङ्गवैः ॥३६॥
आर्तं रौद्रं विदुर्धर्म्यं शुक्लं चात्रामलाशयाः ।
चतुर्धा ध्यानमन्वर्थं प्रत्येकं तच्चतुर्विधम् ॥३७॥

त्रिषादामर्षशान्त्यादि–संक्षेपात्तस्य लक्षणम् ।
मैत्रीप्रमोदकारुण्याः भावना भवभेदिकाः ॥३८॥

संयोगे यद्यनिष्टस्य समन्वाहरणं स्मृतेः ।
तद्वियोगार्थमाद्यार्शं मनोज्ञस्य विपर्ययात् ॥३९॥

स्याद् द्वितीयस्तृतीयश्च वेदनायां चतुर्थकम् ।
निदाने श्रावको ध्याता विरते तु विदुस्त्रयः ॥४०॥

फलं तिर्यग्गतिरस्य रौद्रस्य नारकी गतिः ।
संयतासंयतो ध्याता सम्यग्दृष्टिरपीष्यते ॥४१॥

हिंसायामनृते स्तेये विषयेष्वथ रक्षणे ।
जीवस्योत्पद्यते शश्वत् कषायकलुषस्य तत् ॥४२॥

रागाद् द्वेषान्ममत्वाद्वा ये मया हा विराधिताः ।
क्षमन्तु जन्तवस्ते मां तेभ्यो मृष्याम्यहं पुनः ॥४३॥

मनसा वपुषा वाचा कृतकारितसंमतैः ।
रत्नत्रयभवं दोषं गर्हे निन्दामि वर्जये ॥४४॥

मधुरोऽम्लः कटुस्तिक्तः कषायो लवणं तथा ।
अशनादि चतुर्विधोऽऽहारस्त्यक्तो मयाऽधुना ॥४५॥

नाहं देवो मनुष्यो वा नैव तिर्यङ् न नारकः ।
सिद्ध एव विशुद्धात्मा सर्वं कर्मविनिर्मितम् ॥४६॥

कर्मजं भावमुत्सृज्य संप्रपद्ये स्वभावजम् ।
आत्मैव केवलोऽहं मे, ज्ञानदर्शनवैभवः ॥४७॥

एतामास्थां समास्थाय साम्यभावितभावनः ।
ध्यानमालम्बते धर्म्यं शुक्लं वाथ यथाबलम् ॥४८॥

सत्संयमधरो धीरः सत्संहतिरनाकुलः ।
परीषहजिदुत्साही मुक्तदेहादिबन्धनः ॥४९॥
शून्यवेश्मगिरीन्द्रोरु-गुहागह्वरमध्यगः ।
विविक्तविजनारण्य-निराबाधप्रदेशभाक् ॥५०॥
सद्बोधवार्धिनिर्धौत-शुद्धबुद्धिर्दयार्द्रधीः ।
वीतरागो महामोहमहाशल्यप्रभेदकः ॥५१॥

यः प्रमत्तोऽप्रमत्ताख्यः सद्यो जातः स्वरूपभृत् ।
ऊर्ध्वस्थितो निषण्णो वा पर्यङ्कादिभिरासनैः ॥५२॥

पर्यङ्कदेशमध्यस्थः प्रोत्तानकरकुड्मलः ।
ऋज्वायततनुः शान्तो रौद्रार्तपरिवर्जितः ॥५३॥

समाहृत्येन्द्रियग्राम-मात्मार्थेऽभ्यस्तमानसम् ।
ललाटमध्यविन्यस्तं मनः कृत्वा सुनिश्चलम् ॥५४॥

उत्सृजन् मन्दमुच्छ्वासं घोणाग्रनिहितेक्षणः ।
लेप्यचित्राकृतिर्धर्म्यं ध्यायेद् ध्यानं महामुनिः ॥५५॥

आज्ञापायविपाकानां विचितिः संस्थितेः क्रमात् ।
धर्म्यं ध्यानमिति प्रोक्तं केवलज्ञानलोचनैः ॥५६॥

त्रिकालगोचरानन्त–गुणपर्यायसंयुतम् ।
वस्तुतत्त्वं जिनाम्नातं संमतं नस्तथैव तत् ॥५७॥

बन्धहेतून् कदापास्य रत्नत्रयविभूषणः ।
कर्मारातिचमूं भित्वा शिवं प्राप्स्यामि शाश्वतम् ।।५८।।
कष्टं कर्माष्टकं प्राप्य द्रव्यादिकचतुष्टयम् ।
शुभाशुभफलं दत्ते देहिनां भवभागिनाम् ।।५९।।
जीवाजीवादिभिर्भावैः स्थित्युत्पत्तिव्ययात्मभिः ।
सम्पूर्णोऽनादिसंसिद्धो लोकस्तालतरुस्थितिः ।।६०।।
ध्येयं वस्तु द्विधा तच्च चेतनाचेतनात्मकम् ।
अशेषदोषनिर्मुक्तो देवः सकलनिष्कलः ।।६१।।
क्षीरवारिधिमध्यस्थसहस्रदलमम्बुजम् ।
तत्रात्मानं सदोच्छिद्रं ध्यायन्नन्तर्बहिर्मुहुः ।।६२।।
मूर्ध्नेन्दुमुक्तपीयूष–वारिधारापरिप्लुतम् ।
मनोवाक्कायगुप्तोऽसौ प्रोषधफलमश्नुते ।।६३।।
अष्टोत्तरशतं पूर्णं यो जपे,–दपराजितम् ।
मनोवाक्कायगुप्तोऽसौ प्रोषधं फलमश्नुते ।।६४।।
षोडशाक्षरविद्यायां स्याच्छदेव शतद्वये ।
त्रिशत्या षट् सुवर्णेषु चतुः षट्शत्या च वार्धिषु ।।६५।।
अकारं परमं बीजं जपेद्य यः शतपञ्चकम् ।
प्रोषध माप्नुयात् सम्यक् शुद्धबुद्धिरतन्द्रितः ।।६६।।
तस्यैवादिनमस्कारं वर्णसप्तकमाजपेत् ।
योऽसावेकमनाः शश्व-दश्नुते शाश्वतं शिवम् ।।६७।।

'अ सि आ उ सा' बीजानि विश्वव्यापीनि तन्मनाः ।
जपन्ननारतं योगी सम्यग्बोधर्द्धिमृच्छति ॥६८॥

शरणोत्तममाङ्गल्य—परमन्त्रपदान्यपि ।
जपतां स्मरतां पुंसां मोक्षलक्ष्मीर्वशं व्रजेत् ॥६९॥

ललाटपङ्कसंश्लिष्टां चञ्चच्चन्द्रकलामलाम् ।
ईषत्प्राग्भारदेशीयां सुधाधारात्रपाश्रिताम् ॥७०॥

ध्यायंस्त्रयोदशीं मात्रां महाबलमनाहतम् ।
घोणाग्रे ज्ञानमाप्नोति स्वच्छस्फाटिकसंस्थितेः ॥७१॥

सर्वलक्ष्यविनिर्मुक्तः सन्निरुद्धैकमानसः ।
एवं केवलमभ्यस्यन् विश्वमध्यक्षमीक्षते ॥७२॥

क्षान्त्यर्थं सर्वजन्तूनामिहामुत्रविरोधिनाम् ।
'णमो अरहंताणं' जपित्वा मन्त्रशतं दिशि ॥७२॥

दलाशाष्टकसंश्लिष्टे वर्गाष्टकविभूषिते ।
दिग्दलप्रणवाक्रान्ते प्रतिपत्रं मुखाम्बुजे ॥७४॥

ॐ णमो अरहंताणमित्येकैकमथाक्षरम् ।
विन्यस्यैनं पुनर्मन्त्रं जपेत् सद्बोधसिद्धये ॥७५॥

प्रणवस्य युगाभ्यां प्राग् मायाया युगलेन च ।
पार्श्वयोर्चूर्ध्वस्थ-न्यस्तहंसपदान्वितम् ॥७७॥

अनाहतसमाक्रान्त—श्रीकारं मूर्धवर्जितम् ।
ध्यायन्नेतां जपेद्विद्यां स विद्याभ्यासिवाञ्छया ॥७८॥

जोग्गे मग्गे तच्चे भूदे भव्वे भविस्से अक्खे पक्खे जिणपासे स्वाहा ॥१॥

ॐ ह्रीं अर्हं णमो अरहंताणं ह्रीं नमः ॥२॥

मस्तके वदने कण्ठे, हृदये नाभिमण्डले ।
ध्यायेचन्द्रकलाकारं, योगे प्रत्येकमम्बुजम् ॥ ७९ ॥

उद्यदादित्यबिम्बाभं प्रभासंभारभास्वरम् ।
शोषयन्तं महास्नेहं प्लुष्यन्तं कर्मपञ्जरम् ॥ ८० ॥

स्वमशेषितकर्माणं नयन्तं परमास्पदम् ।
विश्वतो वदनं ध्याये-दोङ्कारं नाभिवारिजे ॥८१॥

तथाभूतमोङ्कारं हि मानसाम्भोजवासितम् ।
कण्ठकन्दलसंलीन-मप्यकारं सरोजगम् ॥८२॥

शिरः सरोरुहारूढं 'सि' वर्णं शशिरोचिषम् ।
सोंकारं च मुखाम्भोजे हारनीहारपाण्डुरम् ॥८३॥

स्वसंवेद्यकृदन्यच्च यन्निर्वेदविधायकम् ।
पदाक्षरमेकं वा योगी ध्यायन्न नश्यति ॥८४॥

वीतरागो भवन् योगी यच्च किञ्चिद्विचिन्तयेत् ।
तदेव ध्यानमाम्नात-मतोऽन्ये ग्रन्थविस्तराः ॥८५॥

प्रमाणनयनिक्षेपैरात्मतत्त्वमवैति यः ।
स वेत्ति परमात्मानं परमात्मानमर्थतः ॥ ८६ ॥

त्रिकालविषयं साक्षाच्छक्तिव्यक्तिविवक्षया ।
सामान्येन नयेनैकं परमात्मानमर्थतः ॥ ८७ ॥
कल्याणातिशयैराढ्यो नवकेवललब्धिमान् ।
सभास्थितो जिनो ध्येयः प्रातिहार्यैः परिष्कृतः ॥८८॥
सर्वलक्षणसम्पूर्णनिर्मले मणिदर्पणे ।
संक्रान्तबिम्बसादृश्यं शान्तं स चिन्तयेद्विभुम् ॥८९॥
सर्वज्ञः सर्वदृक् सार्वो निर्मलो निष्कलोऽव्ययः ।
वीतरागः परोदेवः योगिनो योगगोचरः ॥९०॥
मूषागर्भगताशेष–माक्षिकप्रतिमो भवेत् ।
यादृगाकारसंस्थानं तादृगाकृतिकं स्मरेत् ॥९१॥
अनन्यशरणस्तद्धि तत्संलीनैकमानसः ।
तद्गुणस्तत्स्वभावात्मा तत्तादात्म्यं स एव सन् ॥९२॥
योजयेत्तद्गुणग्रामैरात्मानं परमात्मना ।
तद्भावभावितो भव्यस्तत्स्वरूपमुपाश्नुते ॥९३॥
त्रिकालगोचरानन्त–गुणपर्यायसङ्गतः ।
अनादिनिधनोऽमूर्तः संख्यातीतप्रदेशयुक् ॥९४॥
निष्कलः परमात्माऽहं लोकालोकावभासनः ।
विश्वव्यापी स्वभावस्थो विकारपरिवर्जितः ॥९५॥
इतीदृक् पुरुषाकारः स्वाङ्गगर्भगतः स्फुरन् ।
सर्वदा परमात्मैव ध्येयः शुद्धस्वभावभाक् ॥९६॥

एवं शुद्धनयालम्बी सत्वासित्वमशेषयेत् ।
महासंवरमध्यस्थो कर्मकक्षं विनिर्दहेत् ॥९७॥

## द्वादशानुप्रेक्षाः

ध्यानस्यालम्बनीभूता धर्मस्य द्वादशा पराः ।
अत्रैवानुगतः सम्य-गनुप्रेक्षाश्च चिन्तयेत् ॥९८॥

अशाश्वतं शरीरादि कर्मबन्धनिबन्धनम् ।
जीवसम्बन्धमन्यद्व्यज्ञानदर्शनसंपदः ॥९९॥

मृत्युव्याघ्रसमाघ्रातं संसारारण्यवर्तिनम् ।
जीवैर्नीशाक्यं पातुं नान्योऽस्ति जिनशासनात् ॥१००॥

कर्मपोतं समारुह्य दुःखभाण्डभरो नरः ।
संकल्पश्वसनैर्नूनं बंभ्रमीति भवोदधौ ॥१०१॥

उन्मज्जन्विनिमज्जन् च जीवः संसारसागरे ।
दुर्मोहान्धो भ्रमत्येको दुःखैर्वानिलर्दीपितः ॥१०२॥

अन्योऽहं देहतोऽमुष्मात्सम्बन्धं प्रत्येकवानपि ।
स्वलक्षणविवक्षायाः स्वर्णे कालिकादिवत् ॥१०३॥

शरीरं विश्वतः शश्व-दशौचं बीजदोषतः ।
स्वतुल्यात् कारणान्नित्यं कार्यमुत्पद्यते यतः ॥१०४॥

योगरन्ध्रैरशुद्धात्मा कर्मवारिनिरन्तरम् ।
आत्मपोतः समादत्ते पर्यटन्-भववारिधौ ॥१०५॥

सद्दृष्टिसद्धनुर्धीरः संवरायसवर्मकः ।
साधुयोधः सदाभेद्यः यदि न स्यादसंयमः ॥१०६॥
कषायकालिकाकर्म–मललेपाद्विशुध्यति ।
जीवो हेमवदत्यन्तं तप्यमानस्तपोऽग्निना ॥१०७॥
उत्पद्येत विपद्येत लोकोदुम्बरसदृशः ।
क्रिमिराशिरिवासाता–संतप्ता जन्तुसन्ततिः ॥१०८॥
मानुष्यं कर्मभूर्योग्यः सद्देशः कल्पवत्कुलम् ।
सत्यपीत्यादि दुष्प्रापं बोधिरत्नं सुदुर्लभम् ॥१०९॥
इहैवोपशमात्सौख्यं नृदेवेषु परत्र च ।
आनन्दमक्षयं मोक्षे धर्मरत्नादवाप्यते ॥११०॥
एताभिर्भावनाभिः स्वं भावयन् भव्यपुङ्गवः ।
निर्विण्णात्मनि संविग्नो ध्याने दार्ढ्यं समश्नुते ॥१११॥
निष्प्रकम्पशिखो दीपस्तमो यद्वन्निरस्यति ।
पापान्धतमसं हन्ति तद्वद्ध्यानं सुनिश्चलम् ॥११२॥
क्षुत्तृष्णोष्मादिभि र्दुःखैर्विषयैर्वा प्रकम्पते ।
निसर्गतरलं चित्तं वायुना शीर्णपर्णवत् ॥११३॥
धर्तुं मनो न शक्नोति मुनिरल्पबलो यदा ।
निर्वीर्यं बन्धसम्बन्धं केवलं कुरुते तदा ॥११४॥
वज्रकायं परिप्राप्य योगमारभते यदा ।
नियन्तुं शक्नुयाद्योगी तदा चित्तं सुनिश्चलम् ॥११५॥

छिन्ने भिन्ने हते दग्धे देहे स्वमिव दूरगम् ।
प्रपश्यन् वर्षवातादि दुःखैरपि न कम्प्यते ॥११६॥

ध्यानमाहात्म्यम्

न पश्यति यदा किंचिन्न शृणोति न जिघ्रति ।
स्पृष्टं किंचिन्न जानाति साक्षान्निर्वृत्तलेपवत् ॥११७॥

ध्यानफलम्

सम्यग्दृष्ट्याद्यसंख्येय–गुणनिर्जरणोद्गमात् ।
लब्धात्मलाभसद्ध्यान–बलादेव विनिर्दहन् ॥११८॥
असंख्येयगुणं कर्म शमकोऽप्यानुषङ्गिकम् ।
ज्ञानाद्यैश्वर्यमाप्नोति फलं चोपशमात्सुखम् ॥११९॥
परलोके पुनः स्वर्ग–सागरे पतितः पुमान् ।
प्रोद्यत्सम्पूर्णपूर्णेन्दु-वर्धमानोरुसम्पदि ॥१२०॥
अणिमादिगुणानर्घ्य–माणिक्यगुणसंकुले ।
कालं गतं न जानाति भुञ्जानस्तत्सुखामृतम् ॥१२१॥
ततश्च्युत्वाऽवनौ भुक्त्वा तीर्थनाथादिसम्पदः ।
शुक्लध्यानामृतं पीत्वा प्रयात्यजरामरपदम् ॥१२२॥ ?
धर्मध्यानमतिक्रान्तो यदा योगी भवेत्तदा ।
शुक्लध्यानं पुनर्ध्यातुमारभेत् समाहितः ॥१२३॥
सवितर्कं सवीचारं स पृथक्त्वमुदाहृतम् ।
शुक्लमाद्यं द्वितीयं च विपरीतवितर्कयुत् ॥१२४॥

सूक्ष्मक्रियाप्रतिपाति तृतीयं यदपाति तत् ।
समुच्छिन्नक्रियं तुर्यं ध्वस्तबन्धनिबन्धनम् ॥१२५॥

त्र्येकयोगवपुर्योगा योगिनां तदनुक्रमात् ।
परे केवलिनः शुक्ले पूर्वे पूर्वविदः स्मृते ॥१२६॥

एकाश्रये सवीचारे सवितर्के द्वितीयकम् ।
अवीचारं त्व वीचारे योगवागर्थसंक्रमः ॥१२७॥

वितर्कः श्रुतमित्याहुर्यस्मादर्थान् पृथक् पृथक् ।
ध्यायत्यागममालम्ब्य पृथक्त्वं तेन तद्विदुः ॥१२८॥

अर्थादर्थं वचः शब्दाद्योगं योगात् समाश्रयन् ।
पर्यायादपि पर्यायं द्रव्याणोश्चिन्तयेद् ध्रुवम् ॥१२९॥

एवं शान्तकषायात्मा कर्मकक्षाशुशुक्षणिः ।
एकत्वध्यानयोग्यं स्यात् पृथक्त्वाचो जिताशयः ॥१३०॥

एकं द्रव्यमथाणुं वा पर्यायं चिन्तयेद्यतिः ।
योगेनैकेन यत्क्षीणस्तदेकत्वमुदीरितम् ॥१३१॥

शुक्लध्यानानलेनैव दग्ध्वा घातीन्धनोत्करम् ।
तदार्हन्त्यमनुप्राप्तो भाति भव्याब्जभास्करः ॥१३२॥

धर्मामृतप्रवर्षेण प्रीणयन् भव्यचातकान् ।
पर्यटत्यविघ्नमुद्बुधो जिनो ध्यानधरो धराम् ॥१३३॥

येषामायुः समानि स्युर्नामगोत्रे च वेद्यकम् ।
अकृत्वा ते समुद्घातं शैलेश्यमियृति जिनाः ॥१३४॥

कृत्वाऽन्ये योगसंरोधं कुर्युरन्ते तु योगिनः ।
स्युस्सूक्ष्मक्रियायोगेन वीतयोगा विबन्धनाः ॥१३५॥
समुच्छिन्नक्रियेणाऽथ हत्वा घातिबलं बलात् ।
साधितात्मस्वभावास्ते प्रयान्ति पदमव्ययम् ॥१३६॥
मोक्षलक्ष्मीसमाश्लिष्टाः विशिष्टगुणभूषणाः।
शीलमालानिरौपम्या भुवनेश्वरवन्दिताः ॥१३७॥
तत्र त्रैलोक्यसाम्राज्य–श्रियमात्यन्तिकीं पराम् ।
सेवमाना निराबाधमनन्तं कालमासते ॥१३८॥
सच्चरित्रतरुः सम्यग् यः पूर्वमभिवर्धितः ।
सद्ध्यानामृतसंसेकैस्तत्फलं भुञ्जते शिवम् ॥१३९॥
महामोहमहामीनं दुःखवाडववह्निकम् ।
ध्याननावा समुत्तीर्णं संसारापारसागरम् ॥१४०॥
आत्यन्तिकसुखावासं निराबाधजिनान्वितम् ।
नानागुणमणिव्रातं निर्वाणद्वीपमाश्रिताः ॥१४१॥
आत्माधीनं निराबाधं निरौपम्यस्वभावजम् ।
निर्द्वन्द्वातीन्द्रियानन्त–सौख्यसागरवर्तिनाम् ॥१४२॥
को नाम वर्णयेत्तेषां स्वरूपं परमात्मनाम् ।
ज्ञानात्मनामचिन्त्यानां सर्वज्ञज्ञानगोचरम् ॥१४३॥
गन्तुमन्तो न शक्येत यद्वदाकाशकालयोः ।
ज्ञानदर्शन सौख्यादिगुणानां तद्वदात्मनाम् ॥१४४॥

सन्दरोदधिचन्द्रार्क-गगनादिगुणौघवत् ।
निष्ठितार्थसुखादीनामुपमानं न विद्यते ॥१४५॥
एवं ध्यानबलाद्धीरा: साधयन्तूत्तमं पदम् ।
देवविद्याधरादीनां भुक्त्वा भोगपरम्पराम् ॥१४६॥
उत्तम: संयमो ध्यानं ध्यानमत्युत्तमं तप: ।
संवर: परमो ध्यानं ध्यानं सर्वार्थसाधनम् ॥१४७॥
संयमाभरणोद्भासी गुरुभक्तिपरायण: ।
संसारसागरोत्तीर्ण: प्रयाति परमं पदम् ॥१४८॥
उक्त: संक्षेपतो ध्यान-विधि: किंचिद् यथामति ।
नि:शेषमभिधातुं तत्केवलं केवली विभु: ॥१४९॥
सम्यग्गुरूपदेशेन विनिश्चित्यादरादिमम् ।
समभ्यस्य प्रयत्नेन याति शान्तपदं पुमान् ॥१५०॥
अज्ञानाद्यन्मया बद्ध-मागमस्य विरोधकृत ।
तत्सर्वमागमाभिज्ञा: शोधयन्तु विमत्सरा: ॥१५१॥
भद्रं भूतिभृतां भूरिभव्याम्भोजैकभास्वताम् ।
शासनाय जिनेशानामाशापाशविपाशिने ॥१५२॥
संयमोत्तमपीयूष-पानसंशान्तदु:सह-।
मोहहालाहलाग्निभ्य: श्रीगुरुभ्यो नमो नम: ॥१५३॥
त्रैलोक्यसाररत्नाय मोक्षलक्ष्मीविधायिने ।
संसारोत्तारिणे नित्यं नम: संयमसेतवे ॥१५४॥

तीर्थेशाश्चक्रनाथाः खचरहलधराः यं गणेन्द्राः मुनीन्द्राः ।
ध्यानाब्धिं संविगाह्य प्रचुरगुणमणिव्रातमव्यग्रदेशम् ।
याता यास्यन्ति यान्ति प्रवरशिवसुधापानभूमोगतृप्ताः
दासस्य श्रीगुरोर्मे शमसुखकृदसौमानसे स्यात्सदैव ॥१५५॥

विपुलवाङ्मयवारिधितत्त्वसन्-
मणिमयूखलवांशकलाकृतेः ।
स्मरणमात्रमिदं गदिदं मया
किमथ दृष्टमहो न महात्मभिः ॥१५६॥

ध्यानोपदेशकोषोऽयं सरस्वत्या यदर्पितः ।
भव्यैरादीयमानोऽपि सर्वदाऽऽक्षयसंस्थितिः ॥१५७॥
श्रीनन्दनन्दिवत्सः श्रीनंदीगुरुपदाब्जषट्चरणः ।
श्रीगुरुदासो नन्द्यान्मुग्धमतिः श्रीसरस्वतीसूनुः ॥१५८॥

इति ध्यानोपदेशकोषः यद्वा योगसारसंग्रहः

## ध्यानसार:

करणक्रमनिःक्रान्तं, कर्तृकर्मादिवर्जितं ।
ध्यातृध्येयपथातीतं, प्रत्यग्ज्योतिरुपास्महे ॥१॥
निराकारं निराधारं, निराध्येयं निराश्रयं ।
एकानुभवसम्पृक्तं, चैतन्यं चेतयाम्यहं ॥२॥
यत्र सर्वत्र विज्ञानं, विज्ञानैकात्म्यतन्मयं ।
विज्ञानास्वादसम्बद्धं, सिद्धं विज्ञानयोगतः ॥३॥

निर्मलं निष्कलं शुद्धं, शिवं शान्तं स्वभावतः ।
आत्मानुभवसुव्यक्तं, वीतव्यक्तिप्ररूपणं ॥४॥
निर्विकल्पं निरातङ्कं, निराबाधं निरामयं ।
निर्विशेषं निराकाङ्क्षं, निरीहं चिन्मयं सदा ॥५॥
निर्विभागं निरुच्छ्वासं, निरुत्सर्गं निरत्ययं ।
निर्विकारं निरुच्छेदं, निराकाशं निरुत्सुकं ॥६॥
निःप्रत्यूहं निरास्वादं, निराभासं निरामयं ।
निर्निमेषं निराश्लेषं, निर्व्यपेक्षं निरङ्कुशं ॥७॥
निःसंसारं निराहारं, निराकारं निरक्षरं ।
निराशं निर्गतापाशं, निरीहं निरहंक्रियं ॥८॥
तदेव परमं ज्ञानं, तद्ध्यानं तत्परं तपः ।
आत्मानुभावभूयिष्ठं, तदेव परमं महः ॥९॥
तदेव परमं तत्त्वं, तदेव परमं पदं ।
तदेव परमं बीजं, स एवात्मा निरञ्जनः ॥१०॥
तवैवामृतसंस्थानं, तदेवामृततर्पणं ।
स एव परमानन्द—स्तदेवामृतजीवनं ॥११॥
तदेव योगिनां ध्येयं, तदेवार्हत्पदप्रदं ।
तदेव मोक्षलक्ष्मीणां, हठादाकृष्टिकार्मणं ॥१२॥
सदोदितं सदा व्यक्तं, सदा शान्तं सदा शिवं ।
सदा सुखं सुधास्वादं, नियन्त्रितनिजक्रियं ॥१३॥

सदा नित्यं सदा सूक्ष्मं, सदा रत्नत्रयात्मकं ।
सदैव त्रिजगद्वस्तु-प्रकाशनसमुद्भटं ॥१४॥
शुद्धं निश्चयतस्त्वं न, चैतन्यं च सदादरः ।
सदाराध्यं मुमुक्षूणां, मोक्षलक्ष्मीसुखप्रदं ॥१५॥
तत् पूर्वोक्तं शुद्धचैतन्यं, कुतोऽस्तीति चिदुच्यते ।
आत्मद्रव्यमिदं सर्वं, चैतन्यस्य च लक्षणं ॥१६॥
शुद्धं तदेव सिद्धाना-मसिद्धानां ततोऽन्यथा ।
सिद्धसंसारिभेदोऽयं, व्यवहारनयाश्रितः ॥१७॥
निश्चयेन तु चैतन्यं, सर्वत्राऽपि हि तादृशं ।

तस्य अशुद्धचैतन्यस्य शुद्धीकरणार्थमुपक्रम्यते—

निर्विकल्पं स्थिरं चित्तं, विमुक्ताखिलवासनं ।
आत्मज्ञानं स्वयं याति, चैतन्यामृतसागरं ॥१८॥
यथाव्यक्तनिरोधाग्रं, निम्नमार्गाश्रितं पयः ।
स्वयमेव प्रयात्येव, विना यत्नेन सागरं ॥१९॥

तत् निर्विकल्पं चित्तं कथं क्रियते इत्याह—

कषायोत्पादकं वस्तु, त्रिधा त्यक्त्वा प्रयत्नतः ।
एकान्तस्थानमाश्रित्य, दृढासनपरिग्रहः ॥२०॥
प्राणायामकृताभ्यासः, श्रुतसागरपारगः ।
स्थिरीकृत्वा यदा चित्तं, विकल्पः क्षियते तदा ॥२१॥

बहुप्रकारं विकल्पजालं दूरीक्रियमाणमपि कस्मात् सहस्रधा प्रादुर्भवतीत्याह—

आसंसारसमुत्पन्ना-दविद्यावादकन्दलाद् ।
दुर्निवारा भवन्त्येव, विकल्पा भवकारणं ॥२२॥
नभस्तोमजले पूर्णो सुखेच्छावातकम्पिते ।
उत्पद्यन्ते विपद्यन्ते, मानसे विविधोर्मयः ॥२३॥
चित्तचञ्चलताहेतु-विकल्पा एव केवलं ।
विकल्पाः कर्मबन्धाय विकल्पाः कर्मराशयः ॥२४॥
विकल्पा आस्रवाः सर्वे विकल्पाः कल्मषीकराः ।
ध्यानध्येयविनाशाय विकल्पा एव निर्मिताः ॥२५॥

तथा चोक्तं समयसारकलशे—

विकल्पकः परं कर्ता, विकल्पाः कर्म केवलं ।
न जातु कर्मकर्तृत्वं, सविकल्पस्य नश्यति ॥

ते विकल्पा द्विधा शुभाऽशुभाश्च तत्र तावदशुभानाह—

अनाद्यनात्मवेद्यत्वात्, परद्रव्यपरायणः ।
आत्मोपलम्भदूरस्थः सर्वाशुभविकल्पकः ॥२६॥
अहो मोहस्य माहात्म्य-मस्यां संसारसन्ततौ ।
आत्मानमेव मोहाच्च, नैव प्रत्यभिज्ञायते ॥२७॥
निजात्मानं नैव जानन्तः, क्वचिज्ज्ञानमदोद्धताः ।
दूरंनष्टं विजानीम, इति जल्पन्ति निस्त्रपाः ॥२८॥
बहिर्बहिर्यथा भावो, भावकर्तुः प्रजायते ।
तथा तथा स्फुरन्त्येव, विकल्पा बन्धहेतवः ॥२९॥

विकल्पाः अशुभाः प्रोक्ताः, रौद्रार्तध्यानगोचराः ।
आर्तास्तिरश्चो दुःखाय, रौद्रा नरकहेतवे ॥२०॥

## अथार्त्तध्यानं चतुःप्रकारं व्याचष्टे—

इष्टाभावाद् भवेत्पूर्वं, परश्चानिष्टयोगतः ।
तृतीयरोग सम्भूतं, चतुर्थं तु निदानजं ॥२१॥

अथेष्टवियोगजं प्रथममार्त्तध्यानमाह—

पुत्रमित्रकलत्राणि, राज्यादिविभवोऽथवा ।
हा हा मम गतमिष्टं, चिन्तार्तध्यानमुच्यते ॥२२॥
संत्यज्य स्वात्मचैतन्य-मज्ञा रत्नत्रयात्मकं ।
यदन्यन्मन्यतेऽभीष्टं, तन्मोहस्य विजृम्भितं ॥२३॥
तपश्चादिकं मोक्तव्यं, यदि कर्म मुमुक्षुभिः ।
स्वयमेव गतं कस्मा-दिष्टं शोचन्ति पण्डिताः ॥२४॥
आत्मज्ञानं सदा सौख्यं, आत्मज्ञानं सदा प्रियं ।
तन्न नियाति कुत्रापि, किमिष्टं स्वात्मनो गतं ॥२५॥
ज्ञान जन्यं सदा इष्टे-र्जनको ज्ञानमेव च ।
पुत्रपितृमतिभ्रान्तः, किमात्माऽयं विमुह्यति ॥२६॥
रत्नत्रयं यदेतस्य, स एवायं शिवेश्वरः ।
तन्न कुत्रापि निर्याति, हानिरस्य कुतो भवेत् ॥२७॥
चेतनाचेतनास्त्येव सम्बन्धो बाह्यवस्तुभिः ।
असन्तमपि तं कृत्वा, हन्तात्मन् ! तेन तप्यसि ॥२८॥

आसंसारमहाकर्म,–चमूचक्रेण चूर्णितं ।
अंशोऽपि न परिस्पृष्टो, भीतिस्तस्य कुतस्तनी ॥३९॥
लवशो नारके छित्त्वा पिष्टं घृष्टमनन्तशः ।
क्षीणं न याति चैतन्यं तदान्यैर्मामियं कुधाः ॥४०॥
यदिष्टं तव चैतन्यं, तत्केनापि न हन्यते ।
इष्टाभावं विनाप्यार्तं, हन्तात्मन् ! मा वृथा कृथाः ॥४१॥

इष्टवियोगजं प्रथममार्त्तनिराकरणोपायं चात्रोपदिष्टं ।

अथानिष्टसंयोगजं द्वितीयार्त्तध्यानमाह—

शत्रुदुर्जनदोषाग्नि- विद्युद्व्याघ्रादिकष्टदाः ।
मां तुदन्ति तुदिष्यन्ति, चिन्तार्तध्यानगोचरा ॥४२॥
मामके पशुपुत्रादौ, हा पीडा कीदृशी स्थिता ।
दरिद्रत्वादिकं दुःखं, मयि जीवति बंधुषु ॥४३॥
इत्यभीष्टवियोगेन मन्यते दुःखमात्मनः ।
न जानातीह चात्मैवः निःसंयोगः स्वभावतः ॥४४॥
अद्वैतं यत्र सर्वत्र, ज्ञानैकात्म्ये समाश्रितं ।
ततोऽनिष्टस्य संयोगः, कथंकारं विभासते ॥४५॥
इष्टानिष्टानि कर्माणि, कर्मैव समुपासते ।
ज्ञानविज्ञानमध्यास्ते कस्यानिष्टस्य संभवः ॥४६॥
अनिष्टानिष्टचेष्टानि कर्माणि परमात्मनः ।
न प्रीतिः नापि हि द्वेषो नभसः पुद्गलैः समं ॥४७॥

इष्टानिष्टदशाक्रान्तं कर्म जानीहि केवलं ।
योगोऽयोगस्तु तस्यैव, कर्मणस्तव किंच न ॥४८॥
अनिष्टं तव नास्त्येव, विज्ञानैकनिजात्मनः ।
असद्रूपं तथा कृत्वा, तत्फलं तत्फलं स्फुटं ॥४९॥
एतदेव महानिष्टं, यन्नष्टं ज्ञानमात्मनः ।
ज्ञानैकात्मस्थिते ज्ञाने सर्वमिष्टं हि जायते ॥५०॥

इत्यनिष्टसंयोगजंद्वितीयार्त्तध्यानप्रतिषेधमुद्दिष्टं ।

अथ तृतीयं रोगसम्भूतार्त्तध्यानमाह—

वातपित्तकफोद्रेकात्रुरसशोणितसम्भवाः ।
दुष्टाहारविहारेण, विरूढा व्याधयो मम ॥५१॥
तुन्दिलत्वं कृशत्वं च, वलीपलितसम्भवाः ।
काममनिष्टकं कष्टं, कथंकारं विनश्यति ॥५२॥
भिषग्भेषजमन्त्राद्याः, सर्वेक्षयमुपागताः ।
हा हा मे व्याधयः कष्टा, विनश्यन्ति कथं कदा ॥५३॥
इत्यादिरोगसंभूतां, पीडामात्मनि मन्यते ।
निर्मलं निर्विकारं च, नैवात्मानं विबुध्यते ॥५४॥
संसारोऽयं महाव्याधि, यत्र वैद्यो न विद्यते ।
अथ चेद्विद्यते वैद्यः, तदा स्वात्मैव नापरः ॥५५॥
ज्ञानाद्वैते कथं व्याधि—र्ज्ञानाद्वैते कथं व्यथा ।
ज्ञानाद्वैते कथं दुःखं, ज्ञानाद्वैते कथं मृतिः ॥५६॥

पित्तवातरसश्लेष्म, शोणिताद्या श्चत्र पुद्‌गलाः
शरीरे पुद्‌गले मान्ते तवात्मन् किं कुर्वते । ।।५७।।
एष एव महारोगो, मोहमूर्च्छामयो महान् ।
यस्मिन् सति विज्ञानं, लभते नैव चेतनां ।।५८।।
कर्मत्वष्टाकृता पीडा, यथात्मन् ! सह्यते चिरं ।
कर्मभिः पीडितं कर्म कथं दुःखं करिष्यति ।।५९।।

इति रोगजनिततृतीयार्त्तध्याननिराकरणोपायमाशंकथितं ।

अथ चतुर्थनिदानभूतार्त्तध्यानमाह—

सर्वैश्वर्यप्रभुत्वानि, सर्वसाम्राज्यशक्तयः ।
सर्वभोगोपभोगाश्च, सन्तु मे सर्वसिद्धयः ।।६०।।
कलाकलापकौशल्यं, शस्त्रशास्त्रैकचातुरी ।
भाग्यसौभाग्यलावण्यं, कदा मम भविष्यति ।।६१।।
इत्येतद्वासनासक्ताः, परद्रव्याभिलाषुकाः ।
बध्यन्ते निजदोषेण, निःस्पृहो नैव बध्यते ।।६२।।
यं यं पश्यति लोकोऽयं, परस्य महिमोदयं ।
तं तं कामयते सर्वं, परं पुण्येन लभ्यते ।।६३।।
सुधाकुण्डसमुद्‌भूतो, यथा सलिलमानुषः ।
मृगतृष्णां बहिर्दृष्ट्वा, तृष्णाच्छेदाय धावति ।।६४।।
तथाऽयं मोहतो जीवः सुखामृतमहोदधिं ।
निजात्मानं स्वयं त्यक्त्वा, बहिर्याति सुखेच्छया ।।६५।।

सुखबीजं सुखस्थानं, सुखहेतुं सुखप्रदं ।
निजात्मानं स्वयं त्यक्त्वा, बहिर्भ्राम्यति मूढधीः ॥६६॥

यस्य छायाऽपि संस्पृष्टा, महेन्द्रत्वं प्रयच्छति ।
तं महेशं परित्यज्य, महामूढो याचते परम् ॥६७॥

त्रैलोक्यानुग्रहं कर्तुं, धत्तेऽनन्तचतुष्टयम् ।
यो देवः स कथं नाम, दारिद्र्यैः परिहूयते ॥६८॥

रत्नत्रयस्वभावोऽपि, पार्थिवं रत्नमीहते ।
स्वयं कल्पद्रुमारूढो, बदरीं यातुमुत्सुकः ॥६९॥

शुभाशुभपरिणामाः, ये केचित् पुद्गलाश्च ते ।
त्रिलोकेऽनन्तशो भुक्ता निदानं क्रियते कथं ॥७०॥

इति चतुर्थनिदानार्त्तध्यानप्रतिषेधमात्रं कथितम् ।

इदानीं सर्वार्त्तध्यानयुक्तस्य पुरुषस्य लक्षणमाह—

शोकशङ्काभयभ्रान्ति, मोहमूर्च्छाश्रमभ्रमम् ।
दैन्याक्रन्दननिःश्वास—आलापपरिदेवनम् ॥७१॥

निद्राप्रमादवैकल्यं, चिन्ता चित्तस्य विप्लवः ।
कलहो विषयोद्रेक, इत्यार्त्तध्यानलक्षणम् ॥७२॥

दृढकर्मसमाकीर्णं, बहुदुःखनिबन्धनम् ।
तिर्यग्जन्मफलं तस्य, संसारावर्तवर्त्तिकः ॥७३॥

इत्यशुभविकल्परूपार्त्तध्यानलक्षणं प्रतिपादितम् ।

इदानीं महाऽशुभान् रौद्रध्यानविकल्पानाह—

हिंसानन्दो मृषानन्दः, स्तेयानन्दः सुरक्षणम् ।
चतुर्धा भिद्यते रौद्रं, ध्यानं पापैकचेतसम् ॥७४॥
हिंसानन्दोवधः स्याद्वा, वधप्राचारिसोत्सुकः ।
वधे कृते श्रुते दृष्टे, परमानन्दसम्भवः ॥७५॥
वधकस्तवनश्लाघो, वधकोपायदर्शनम् ।
शस्त्रयुद्धकथाप्रीती, रोमाञ्चः शौर्यवर्णने ॥७६॥
इति रौद्ररसोद्रेकं, भजते मोहभावितः ।
न जानीते निजात्मेव, सर्वजन्तुषु वर्तते ॥७७॥
परमात्मैव सर्वत्र, सर्वजन्तुषु तादृशः ।
तस्य भेदो न विज्ञातः, कस्मै कुप्यति मूढधीः ॥७८॥
अविचारितजं बन्धुं, हत्वा रोदिति लब्धतो ।
विचारं निजमात्मानं, हत्वा तुष्यति जन्तुषु ॥७९॥ (?)
सिद्धो न शुद्धचैतन्यं, वैरविद्वेषहेतवे । ?
कर्मणामपराधोऽयं, जीवो चेदपराध्यति ॥८०॥
हतो न नाशमायाति, रक्षितो नैव जीवति ।
आत्मा स्वकर्मभोगेऽपि, पापं पुण्यं प्रयच्छति ॥८१॥(?)
धीरोऽहं शूरशौण्डीरो, इति चेतसि मा कृथाः ।
घोरं कर्म परिणामः, स शूरः स च कातरः ॥८२॥
आनन्दितोऽसि यद्घाते, यद्घाते कीर्तिमानसि ।
कीर्तिनिन्द्यवधं मिथ्या, सत्या मोहपरम्परा ॥८३॥

इति हिंसानन्दं प्रथम रौद्रध्यानप्रतिषेधमात्रं कथितम् ।

अथ द्वितीयं मृषानन्दरौद्रध्यानमाह—

मृषाजल्पनचातुर्यान्, मया विश्वं प्रतारितम् ।
असत्यं सत्यतां नीतं, यथा मुह्यन्ति पण्डिताः ॥८४॥

मृषाशास्त्रैः मृषामन्त्रैः मृषातन्त्रप्रकाशनैः ।
मायया मोहितो लोको, यथा सत्याय कुप्यति ॥८५॥

सत्यं राजसभामध्ये, मृषावादं करोम्यहम् ।
असत्यं सत्यतां याति, मयि जल्पति तत्क्षणात् ॥८६॥

कृतं कुर्वे करिष्येऽहं, मृषावादेन वञ्चनम् ।
कष्टे ऽहं पातयिष्यामि, ये गर्वोद्धतचेतसः ॥८७॥

इत्यादिकं मृषानन्दं, चेष्टते मुग्धमानसः ।
न जानातेऽपशब्दोऽहं, शब्दाः कार्मणपुद्गलाः ॥८८॥

आस्तां तावन्मृषावादो, वाचोऽपि न तदाश्रयाः ।
भावाभावाश्रयास्तस्य, द्रव्यवाचस्तु दूरगाः ॥८९॥ (?)

महानन्दी यथा कश्चित्, पीत्वा हालाहलं विषम् ।
असत्यजल्पनं कृत्वा, तथा तुष्यति मन्दधीः ॥९०॥

इति मृषानन्दं द्वितीयरौद्रध्यानं निगदितं ।

अथ तृतीयं स्तेयानन्दरौद्रध्यानमाह—

चौर्यचातुर्यचारुत्वं, चौर्यचर्याचमत्कृतिः ।
चौर्याचारे चिरं चिन्ता, चौर्यचारित्रदर्शनम् ॥९१॥

हृते च हारिते चैव, परद्रव्ये महोत्सवः ।
स्वदते च महास्वादं, परद्रव्यं च भक्षणे ॥९२॥
चौरोत्कर्षकथादर्शी, चौरसन्तानपोषकः ।
चौर्यस्तुतिः सदानन्द, श्चौर्यध्याने च तत्परः ॥९३॥
इत्याद्यध्यवसायेन, स्तेयानन्दो विजृम्भते ।
न मन्यते परद्रव्यं, विषादपि महाविष ॥९४॥
परद्रव्यग्रहग्रस्तः, क्षिप्तः संसारसागरे ।
निगोदजं महादुःखं, महामोहं च लम्भितः ॥९५॥
यथा यथा परद्रव्यं, स्वभावेन जिघृक्षति ।
तथा तथा निजद्रव्यं, स्वभावेन विहीयते ॥९६॥
यथा यथा निजद्रव्यं, स्वभावेन न हीयते ।
तथा तथा परद्रव्यं, स्वभावेन जिघृक्षति ॥९७॥
यावद् यस्य यथा यत्र, परद्रव्यं समाश्रितम् ।
तावत्तस्य तथा तत्र, परं दुःखं समाश्रितम् ॥९८॥
तथा चोक्तं इष्टोपदेशे—
परः परस्ततो दुःख–मात्मैवात्मा ततः सुखं ।
अत एव महात्मानः, तन्निमित्तं कृतोद्यमाः ॥
निजद्रव्यस्थितिः सौख्य,–मन्यस्तस्यैव विस्तरः ।
परद्रव्यस्थितिर्दुःख,–मन्यस्तस्यैव विस्तरः ॥९९॥
इति स्तेयानन्दतृतीयरौद्रध्यानप्रतिषेधमाधमुक्तं ।

अथ चतुर्थं संरक्षणानन्दरौद्रध्यानमाह—

मम राज्यं धनं भूमिं, यदि वाञ्छन्ति केचन ।
तेषामहं करिष्यामि, रुधिरैः पितृतर्पणम् ॥१००॥

चन्द्रचारुप्रभाशुभ्रां, कीर्तिं मे यो न मन्यते ।
तस्य मांसैर्बलिं कृत्वा, ददाम्यहं सुनिश्चितम् ॥१०१॥

कुलं शीलं बलं विद्यां, ममनिन्दन्ति ये जनाः ।
कीटमारिं करिष्येऽहं तेषां कुलनिकृन्तनम् ॥१०२॥

इति संरक्षणे रौद्रं, कुरुते तामसाशयः ।
न जानीते महामोह–महामाया विजृम्भते ॥१०३॥(?)

तवात्मत्वं निजं राज्यं तवात्मत्वं निजं धनम् ।
तवात्मत्वं निजं भूमिं, तवात्मत्वं निजं सुखम् ॥१०४॥

तवात्मत्वं कुलं शीलं, तवात्मत्वं महाबलम् ।
तवात्मत्वं महाविद्या, तवात्मत्वं महाप्रियम् ॥१०५॥

तच्चात्मन् ! सदाग्राह्यं, निजरक्षा सुरक्षितम् ।
ततः संरक्षणे रौद्रं, मा कृथा मूढमानसः ॥१०६॥

मार्गसंसारपाथोधौ, गिलितं मोहरक्षसा ।
तच्चैतन्यं न ते नष्टं, तस्य रक्षापि कीदृशी ॥१०७॥

त्याज्यं कर्ममयं गात्रं, तच्चेत्त्यक्तुं न शक्यते ।
त्यागोपायः सदाचिन्त्यो, वृथा रक्षेति विप्लवः ॥१०८॥

त्याज्यलक्षणसम्बन्धो, विद्यते वपुषा समं ।
सोऽपि बाह्यैर्न गेहाद्यैः, किं तद्रक्षार्थमाकुलाः ॥१०९॥

इति संरक्षणानन्दं चतुर्थं रौद्रध्यानप्रतिषेधमात्रं कथितम् ।

इदानीं सर्वरौद्रध्यानयुक्तस्य पुरुषस्य लक्षणमाह—

क्रूरत्वं वञ्चकत्वं च, नृशंसत्वं च कठोरता ।
दण्डपारुष्यकारित्वं, रौद्रध्यानस्य चेष्टितम् ॥११०॥

स्फुलिङ्गसदृशे नेत्रे, भ्रकुटिर्भीषणाकृतिः ।
प्रस्वेदकम्पनिःश्वासं, बाह्यं रौद्रस्य लक्षणं ॥१११॥

कृष्णलेश्या बलाधिक्यं, दृढकर्मफलोदयं ।
नारकत्वं फलं तस्य, घोरकर्मैकमन्दिरम् ॥११२॥

इति उद्देशमात्रेण आर्त्तरौद्ररूपाऽशुभविकल्पा उक्ताः ।

इदानीं शुभविकल्पानाह—

आर्तरौद्राश्रयं त्यक्त्वा, यो विकल्पोऽभिवर्तते ।
तं सर्वं शुभमित्याहु, र्ध्यानं ध्यानपदेश्वराः ॥११३॥

तत् शुभध्यानं धर्म्यध्यानरूपेण चतुःप्रकारं भवतीत्याह ।

आज्ञापायविपाकश्च, तथा संस्थानचिन्तनम् ।
इत्येवं योगिनः प्राहु, र्धर्म्यध्यानं चतुर्विधम् ॥११४॥

तत्राज्ञाधर्म्यध्यानं व्याचष्टे—

जीवादिसप्ततत्त्वानां, जिनोक्तानां च चिन्तनम् ।
तदाज्ञाविचयोनाम, धर्म्यध्यानमिदं मतम् ॥११५॥

धर्म्यध्याने ध्येयमाह—

पिण्डस्थं च पदस्थं च, रूपस्थं रूपवर्जितम् ।
ध्येयं चतुर्विधं प्रोक्तं, धर्म्यध्यानपथाध्वगैः ॥११६॥

नाभिपद्मादिरूपेषु, देहस्थानेषु योगिनाम् ।
अर्हमाद्यक्षरन्यासैः, पिण्डस्थं ध्येयमुच्यते ॥११७॥

प्रणवाद्यक्षरश्रेणीं, परमेष्ठ्यादिवाचिकाम् ।
ध्यानिना वर्णनं तस्य, पदस्थं ध्येयमुच्यते ॥११८॥

भामण्डलादियुक्तस्य, शुद्धस्फटिकभासिनः ।
चिन्तनं जिनरूपस्य, रूपस्थं ध्येयमुच्यते ॥११९॥

अतीन्द्रियस्य शुद्धस्य, रत्नत्रितयशालिनः ।
रूपातीतं मतं ध्येयं, चिन्तनं परमात्मनः ॥१२०॥

रागद्वेषद्वयं त्यक्त्वा, ज्ञानवैराग्यतन्मयः ।
यं यं विचिन्तयेद् योगी, तं तं धर्मैककारणम् ॥१२१॥

विषयाशावशातीतो निःकषायो जितेन्द्रियः ।
सत्क्रियो धर्ममध्यास्ते, निःक्रियो मुक्तिभाजनम् ॥१२२॥

इत्युद्देशमार्गेणाज्ञाविचयं नाम प्रथमं धर्मध्यानं निरूपितं ।

अथ द्वितीयमपायविचयं नाम धर्म्यध्यानमाह—

कस्मिन् कदा कुतः कीदृक्, कस्य केन क्रिया कथम् ।
अपायः कर्मजालस्य, स्यादित्यपायविचिन्तम् ॥१२३॥

कथं भावास्रवस्त्याज्यः, किं द्रव्यास्रवकारणम् ।
कथं सम्पद्यते बन्धः, कथं संवरनिर्जरे ॥१२४॥
दर्शनज्ञानचारित्र–मूर्तिरात्मा निरञ्जनः ।
कर्मैव बलवद् येन, नाट्यते भवनाटकम् ॥१२५॥
अनेनदृग्विकल्पेन, कर्मणां बन्ध ईदृशः ।
ईदृशा कर्मबन्धेन, जायते दुःखमीदृशम् ॥१२६॥
इति चिन्ताविकल्पोऽय–मपायविचयो मतः ।
[illegible], चापायविचयस्ततः ॥१२७॥
इत्युद्देश्यमात्रेणापायविचयो नाम द्वितीयं धर्म्यध्यानमुक्तं ।

अथ तृतीयं विपाकविचयो नाम धर्म्यध्यानमाह—

अष्टानां कर्मणामीदृक्, विपाकः क्रूरकष्टदः ।
अचिन्त्यमहिमात्मायं, येन जीवो मृतः कृतः ॥१२८॥
यत्प्रभावादिदं ज्ञानं, निश्चेष्टं सर्पदष्टवत् ।
सत्यामपि महाशक्तौ, विपाकः स हि कर्मणाम् ॥१२९॥
ज्ञानावृतिविपाकोऽयं, यज्जानाति न किंचन ।
मोहकर्मविपाकोऽयं, जानन्नपि विमुह्यते ॥१३०॥
नामगोत्रविपाकोऽय–ममूर्तोऽपि हि मूर्तिमान् ।
आयुर्वेद्यविपाकोऽयं, सुखे दुःखे च नीयते ॥१३१॥
अन्तरायविपाकोऽयं, लभते नैव निर्वृतिम् ।
दर्शनावृतिपाकोऽयं, यन्मोक्षोऽपि न रोचते ॥१३२॥
इति विपाकविचय तृतीय धर्म्यध्यानमुद्दिष्टं ।

अथ चतुर्थसंस्थानविचयधर्म्यध्यानमाह—

इत्थं त्रिजगतः संस्था, कर्मणामिति संस्थितिः ।
द्रव्यषट्कस्य संस्थैव–मिति संस्थानचिन्तनम् ॥१३३॥

मदवन्मोहसंस्थानं, रजसो ऽर्द्धस्थभित्तिवत् ।
मधुलिप्तासिधारेव, वेद्यं नाम च चित्रवत् ॥१३४॥

कुलालवत् त्रितंगोत्र,–मायुष्कं लोहपाशवत् ।
भाण्डागारिकवत् विघ्नं, कर्मणामिति संस्थितिः ॥१३५॥

देहप्रमितिरात्मायं, कर्तृभोक्तृक्रियान्वितः ।
अणुस्कन्धस्वरूपोऽयं, पुद्गलः तद्विलक्षणः ॥१३६॥

अमूर्ताखण्डरूपेण, धर्माधर्मौ तथा मतौ ।
जीवानां पुद्गलानां च, गतिस्थित्येककारणम् ॥१३७॥

कालाणवः स्वयं भिन्नाः, पुञ्जस्था मणयो यथा ।
वर्तनात्वैव द्रव्याणां, परिणमनहेतवः ॥१३८॥

अवगाहैकशक्तित्वेऽनन्तानन्तप्रदेशकम् ।
अखण्डामूर्तमाकाशं, द्रव्याणामिति संस्थितिः ॥१३९॥

इति चतुःप्रकारं धर्म्यध्यानमुद्देशमात्रमुक्तं ।

इदानीं सर्वधर्म्यध्यानयुक्तस्य पुरुषस्य लक्षणमाह—

सत्यं शौचं तपस्त्यागः क्षमा मार्दवमार्जवम् ।
संयमो ब्रह्मचर्यं च सदाकिञ्चन्यभावना ॥१४०॥

एतानि दशलक्षणानि धर्मध्यानयुक्तस्य ।

**शुभलेश्या प्रभावत्वं, शुभभावमहोदयम् ।**
**शुभसौख्यं महास्थाने स्वर्गराज्यं हि तत्फलम् ॥१४१॥**

इदानीं सूक्ष्मविकल्पप्रथमभेदेन अग्रिमभेदत्रयेण निर्विकल्पं चतुःप्रकारं शुक्लध्यानमाह—

**पृथक्त्वश्रुतवीचार-मेकत्वश्रुतनिश्चलम् ।**
**सूक्ष्मक्रियाप्रतिपाति, क्षीणक्रियानिवर्तकम् ॥१४२॥**

अथ नानापृथकत्ववितर्कवीचारं प्रथमं भेदं व्याचष्टे—

**आत्मद्रव्येषु पर्याये, गुणेवात्मस्वभावजे ।**
**भावश्रुतानुसारेण, सवीचारं स्वचिन्तनम् १४३॥**

**अर्थैकपरमणौ वा, बहुपर्यायचिन्तनम् ।**
**अङ्गबाह्य श्रुतज्ञानाद्, योगसङ्क्रान्तिसङ्गतम् ॥१४४॥**

**योगत्रयेऽपि सङ्क्रान्तं, यत्रोऽनीहितवृत्तितः ।**
**ईषत्स्पृष्टात्मभावत्वं, त्रियोगश्रमकारणम् ॥१४५॥**

**यावन्नात्मा स्थिरीभूत, स्तावत्कुत्रात्मदर्शनम् ।**
**आत्मदृष्टिं विना सूक्ष्मविकल्पा यान्ति योगिनाम् ॥१४६॥**

इति पृथक्त्ववितर्कवीचारं प्रथमशुक्लध्यानमुक्तं ।

अथ द्वितीयं एकत्ववितर्कावीचारं भेदमाह—

**आत्मगुणे स्वपर्याय,—स्वसंवेदनलक्षणे ।**
**स्वस्मिन् एकत्वसंलीनं, तदेकत्व श्रुतस्थिरम् ॥१४७॥**

स्वद्रव्यगुणपर्याय-स्तेषामेकत्र कुत्रचित् ।
आत्मानुभूतिभावेन, श्रुतेन परिनिश्चलम् ॥१४८॥

एकं चैतन्यपर्यायं, दृष्ट्वा ज्ञात्वानुभूय वा ।
तत्रैव समरसीभावं, धत्ते स्वात्मानुभूतितः ॥१४९॥

तदैव केवलज्ञानं, तदनन्तचतुष्टयम् ।
तदैव घातिकर्माणं, तदेवाचिन्त्यवैभवम् ॥१५०॥

इति एकत्ववितर्कावीचारद्वितीयं शुक्लध्यानमुक्तं ।
अथ सूक्ष्मक्रियाप्रतिपाति नामधेयं तृतीयशुक्लध्यानमाह—

निर्वाणगतिसामीप्ये, काले केवलियोगिनाम् ।
परिस्पन्दादिरूपेण, सूक्ष्मः कायिकसत्क्रिया ॥१५१॥

अथ दण्डे कपाटे वा, प्रतरे पूरणेऽथवा ।
कुर्वन्नात्मपरिस्पन्दं, देवः सूक्ष्मक्रियान्वितः ॥१५२॥

एतां सूक्ष्मक्रियां कुर्वन्, तद्ध्येयं परमात्पृशेत् ।
येन येनात्मसद्ध्यान-मप्रतिपाति जायते ॥१५३॥

ज्ञानी ज्ञानेन विज्ञानं, ज्ञात्वा विज्ञाननिर्भरः ।
ज्ञानैकरसविज्ञानं, जानीते ज्ञानतामयम् ॥१५४॥

अनिवृत्तिस्तथा ध्यानं, जायते परमेष्ठिनः ।
यथाऽशेषाणि कर्माणि, भस्मसात् कुरुतेक्षणात् ॥१५५॥

इति सूक्ष्मक्रियाप्रतिपातकं तृतीयशुक्लध्यान मुक्तं ।

अथ चतुर्थव्युपरतक्रियानिवृत्तिभेदमाह—

क्षीणक्रियागतं कर्म, नष्टं कर्तृत्वमञ्जसा ।
अहमेको भविष्यामि, शिवसौख्यं निरन्तरम् ॥१५६॥
यद्ध्यानं चान्तिमे क्षीणे, कर्मकाण्डे तनूभृतः ।
अनन्तेनापि कालेन, तद्ध्यानं नापसर्पति ॥१५७॥
ऊर्ध्वगतिस्वभावेन, धर्मद्रव्यसहायतः ।
अधर्मद्रव्यसहाय्याल्लोकाग्रे स्थितिरुत्तमा ॥१५८॥
रत्नत्रयबलं सौख्य–मवगाहागुरुलघु–
मव्याबाधं च सिद्धानां, अष्टकं गुणसंज्ञितम् ॥१५९॥

इति सर्वविकल्पप्रतिषेधद्वारेण चैतन्यशुद्धिकरणोपायमात्रमत्र समुद्दिष्टं ।

इति पण्डितश्रीयशःकीर्तिकृतोऽपध्यानसारः समाप्तः ।

अथपण्डिताशाधरविरचितं

# अध्यात्मरहस्यम्

## [ योगोद्दीपनशास्त्रम् ]

भव्येभ्यो भजमानेभ्यो, यो ददाति निजं पदम् ।
तस्मै श्रीवीरनाथाय, नमः श्रीगौतमाय च ॥१॥
नमः सद्गुरवे तस्मै, यद्वाग्दीपस्फुटीकृतात् ।
मार्गादारूढयोगः स्यात् , मोक्षलक्ष्मीकटाक्षभाक् ॥२॥
शुद्धे श्रुतिमतिध्याति, दृष्टयः स्वात्मनि क्रमात् ।
यस्य सद्गुरुतः सिद्धाः, स योगी योगपारगः ॥३॥

स स्वात्मेत्युच्यते शश्वद्, भाति हृत्पङ्कजोदरे ।
[1]योऽहमित्यञ्जसा शब्दात् [2]पशूनां [3]स्वविदा विदाम् ॥४॥
यो न मुह्यति नो रज्य–त्यपि न द्वेष्टि कस्यचित् ।
स्वात्मा दृग्बोधसाम्यात्मा, स शुद्ध इति बुध्यताम् ॥५॥
आप्तोपज्ञमदृष्टेष्ट–विरोधाद्[4] धर्म्यशुक्लयोः ।
ध्यानयोः शास्ति या ध्येयं[5], सा गुरूक्तिरिति श्रुतिः ॥६॥
श्रुत्या निरूपितः सम्यक्, शुद्धः स्वात्माऽञ्जसा यया ।
युक्त्या व्यवस्थाप्यतेऽसौ, मतिश्चानुमन्यताम् ॥७॥
सन्तत्या वर्तते बुद्धिः, शुद्धस्वात्मनि या स्थिरा ।
[6]ज्ञानान्तरास्पर्शवती सा ध्यातिरिह गृह्यताम् ॥८॥
शुद्धः स्वात्मा यया साक्षात्, क्रियते ज्ञानविग्रहः ।
विशिष्टभावनास्पष्ट,–श्रुतात्मा दृष्टिरत्र सा ॥९॥
निजलक्षणतो लक्ष्यं, यद्वानुभवतः(ति) सुखम् ।
सा संविद्दृष्टिरात्मा, लक्ष्यं दृग्धीश्च लक्षणम् ॥१०॥
सैव सर्वविकल्पानां, दहनी दुःखदायिनाम् ।
सैव स्यात् तत्परं [7]ब्रह्म, सैव योगिभिरर्थ्यते[8] ॥११॥

---

१ आत्मा । २ मूर्खाणाम् । ३ स्वस्य ज्ञानेन । ४ परोक्ष-प्रत्यक्ष-विरोधाभावात् । ५ आत्मानं प्रति रहस्यम् इत्यर्थः । ६ परद्रव्या-ऽस्पर्शवती स्वद्रव्यस्पर्शवती इत्यर्थः । ७ तत्प्रसिद्धम् । ८ उपादेय-रूपां क्रियते याच्यते ।

तदर्थमेव मथ्येत, बुधैः पूर्वं श्रुतार्णवः ।
ततश्चामृतमप्यन्यद्, वार्तमेव मनीषिणाम् ॥१२॥

यद्गिराऽभ्यस्यतः सा स्याद्, व्यवहारात् स सद्गुरुः ।
स्वात्मैव निश्चयात्तस्या, स्तदन्तर्वाग्भवत्वतः ॥१३॥

रत्नत्रयात्मस्वात्मैव, मोक्षमार्गोऽञ्जसाऽस्ति यः ।
स पृष्टव्यः स एष्टव्यः, स द्रष्टव्यो मुमुक्षुभिः ॥१४॥

शुद्धचिदानन्दमयं स्वात्मानं प्रति तथा प्रतीत्यनुभूत्योः ।
स्थित्यां चाभिमुखत्वं गौण्या दृग्धीक्रियास्तदुपयोगोऽग्रधाः[1]॥१५

बुद्ध्याधानाच्छुद्धध्यानः, स्वं संवेदयते स्वयम् ।
यथा संवेद्यमाने स्वे, लीयते च [2]त्रयीमयः ॥१६॥

यथास्थितार्थान् पश्यन्ती, धीः स्वात्माभिमुखी सदा ।
शुद्धिरत्र तदा बन्धो, ! [3]बुद्ध्याधानं तदन्वियात्[4] ॥१७॥

अहमेवाहमित्यात्म, ज्ञानादन्यत्र [5]चेतनाम् ।
इदमस्मि करोमीद,-मिदं भुञ्ज इति क्षिपे ॥१८॥

अहमेवाहमित्यन्त, र्जल्पसंपृक्तकल्पनाम् ।
त्यक्त्वाऽवाग्गोचरं ज्योतिः, स्वयं पश्येदनश्वरम् ॥१९॥

यद्यदुल्लिखति स्वान्तं, तत्तदस्वतया[6] त्यजेत् ।
तथा विकल्पानुदये, दीप्येतात्माच्छचिन्मये ॥२०॥

---

१ मुख्याः । २ रत्नत्रयमयः । ३ तस्याः बुद्धेः आधानं सम्बन्धः बुद्ध्याधानं कथ्यते । ४ जानीयात् । ५ चिन्तनाम् ६ परवस्तुतया

स विश्वरूपोऽनन्तार्था–कारप्रसरसूत्रतः ।
सोऽवाग्[1]दृशामलक्ष्योऽपि, लक्ष्यः केवलचक्षुषाम् ॥२१॥
तस्य लक्षणमन्त[2]र्भा गुपयोगो ह्यहंतया ।
नित्यमन्यतमा[3]भाग्भ्यः, [4]परेभ्योऽन्यत्र लक्षणात् ॥२२॥
[5]ययोर्लक्षणभेदस्तौ, भिन्नौ तोयानलौ यथा ।
सोऽस्ति च स्वात्मपरयो–रिति सिद्धाऽत्र युक्तिवाक् ॥२३॥
उपयोगश्चितः[6] स्वार्थ,–ग्रहण व्यापृतिः श्रुतेः[6] ।
शब्दगो दर्शनं ज्ञान–मर्थगस्तन्मयः पुमान् ॥२४॥
अमुह्यन्तमरज्यन्त–मद्विषन्तं च यः स्वयम् ।
शुद्धे निधत्ते स्वे शुद्ध–मुपयोगं स शुद्ध्यति ॥२५॥
भावयेच्छुद्धचिद्रूपं, स्वात्मानं नित्यमुद्यतः ।
रागाद्युदग्रऋणा–मनुत्पत्त्यै क्षयाय च ॥२६॥
रागः [7]प्रेम रतिर्माया, लोभं हास्यं च पञ्चधा ।
मिथ्यात्वभेदयुक् सोऽपि, मोहो द्वेषः [8]क्रुधादिषट् ॥२७॥
सर्वत्रार्थादुपेक्ष्येऽपि, इदं मे हितमित्यधीः ।
गृह्णन् [9]प्रीयेऽहितमिति, श्रयन् [10]दूयेऽत्र कर्मभिः ॥२८॥

---

१ छद्मस्थाम् । २ पृथग्भूतः अन्तरं भजतीति अन्तर्भाक् । ३ पृथग्भूतेभ्यः कथंचित् । ४ अचेतनद्रव्येभ्यः । ५ पुद्गलजीवयोः । ६ कर्णस्य ६ स्वार्थः शब्दः, तस्य गृहणं व्यापारः । ७ स्त्रीपुन्नपुंसकवेदरूपम् । ८ क्रोध-मानाऽरति-शोक-भय-जुगुप्साः । ९ प्रीतिं करोति । १० पीड्यते ।

अन्यतः सुगतौ स्वार्थैः, सुखाय दुर्गतौ मुहुः ।
दुःखाय चेत्यविवर्तैश्च, मोहाच्छेद्योऽद्य विद्यया ॥२९॥
निश्चयात् सच्चिदानन्दा, द्वयरूपं तदस्म्यहम् ।
ब्रह्मेति सततभ्यासाल्, लीये स्वात्मनि निर्मले ॥३०॥
सन्नेवाहं मया वेद्ये, स्वद्रव्यादिचतुष्टयात् ।
स्थित्युत्पत्तिव्ययात्मत्वा—दसन्नेव विपर्ययात् ॥३१॥
यथा जातु जगन्नाहं, तथाहं न जगत् क्वचित् ।
कथञ्चित् सर्वभावानां, [1]मिथो [2]व्यावृत्तिविचितः ॥३२॥
यदचेतत्तथानादि, चेतनीत्थमिहाऽद्य यत् ।
चेतिष्यत्यन्यथा[3]ऽनन्तं, यच्च चिद्द्रव्यमस्मि तत् ॥३३॥
एकमेकक्षणे सिद्धं, नश्यत् प्रागात्मना भवत् ।
[4]सता तिष्ठत्तदेवेद,—मिति [5]चित्या यथेष्यते ॥३४॥
द्रव्यं तथा सदा सर्वं, द्रव्यत्वात्तद्वदप्यहम् ।
विवर्तेऽनादिसन्तत्या, चिद्विवर्तैः [6]पृथग्विधैः ॥३५॥
गुणपर्यायवद् द्रव्यं, गुणाः सहभुवोऽन्यथा[7] ।
पर्यायास्तत्र चैतन्यं, गुणः [8]पुंस्यन्वयित्वतः[9] ॥३६॥
रूपित्वं पुद्गले धर्मे, गत्युपग्राहिता [10]तयोः ।
स्थित्युपग्राहिताऽधर्मे, परिशेषात्त्वयोजना ॥३७॥

---

१ परस्परम् । २ पृथक्स्वभावपरिज्ञानम् । ३ अन्येन प्रकारेण । ४ विद्यमानेन । ५ ज्ञानेन । ६ नानाप्रकारैः । ७ क्रमभुवः पर्यायाः ८ आत्मनि । ९ अनुगामित्वात् । १० जीव-पुद्गलयोः ।

सर्वत्र[1]काले सर्वेषां, खेऽवगाहोपकारिता ।
सर्वेषामर्थपर्यायः, सूक्ष्मः प्रतिक्षणक्षयी ॥३८॥
वाग्गम्योऽनश्वरः स्थेयान्, मूर्तो व्यञ्जनपर्ययः ।
जीवपुद्गलयोर्द्रव्यं, तन्मयं ते च तन्मयाः ॥३९॥
चेतनोऽहमिति द्रव्ये, शौक्ल्यं मुक्ताश्च हारवत् ।
चैतन्यं चिद्विवर्तांश्च[2], [3]मय्यामील्य मिलाम्यजे ॥४०॥

यश्चक्रीन्द्राहमिन्द्रादि, भोगीनामपि जातु न ।
शश्वत्सान्द्रोहमानन्दो मामेवाभिव्यनज्मि[4] तम् ॥४१॥

अविद्यां विद्यया ध्वस्त्वा,–नुपेक्षां संश्रयाऽसकृत् ।
कुर्वतो मदभिव्यक्तिः[5], क्रमेण स्यात्पराऽपि मे ॥४२॥

समस्तवस्तुविस्तारा, कारकीर्णोऽपि पर्ययात्[6] ।
द्रव्यार्थादेक एवास्मि, वाच्यः[7] कस्यापि नार्थतः[8] ॥४३॥

तदेव[9] तस्मै कस्मैचित्, परस्मै ब्रह्मणेऽमुना ।
सूक्ष्मेनेदं मनः शब्द–ब्रह्मणा संस्करोम्यहम् ॥४४॥

हृत्सरोजेऽष्टपत्रेऽधो,–मुखे [10]द्रव्यमनोऽम्बुजे ।
योगार्कतेजसा बुद्धे, स्फुरन्नस्मि परं महः ॥४५॥

---

१ घटनाकाले । २ ज्ञानपर्यायान् । ३ आत्मद्रव्ये । ४ अनुभवामि । ५ मम प्रकटता । ६ व्यवहारात् । ७ वचनगोचरः । ८ निश्चयात् । ९ तस्मात्कारणात् । १० गुणदोषविचारस्मरणादिप्रणिधानमात्मनो भावमनः । तदभिमुखस्यास्यैवाऽनुग्राहिपुद्गलोच्चयो द्रव्यमनः ।

ध्वस्ते मोहतमस्यान्त,–र्दृशाऽऽलोकेऽमलोदिते ।
शून्योऽप्यन्यैः स्वतोशून्यो, मया दृश्योऽयमप्यहम् ॥४६॥
ममैवाऽहं तथा पश्यन् ऐकाग्र्यं परमश्नुवे ।
भजे मत्कन्दमानन्दं[1], निर्जरासंवरावहम् ॥४७॥
अनन्तानन्तचिच्छक्ति, चक्रयुक्तोऽपि तत्त्वतः[2] ।
अनाद्यविद्यासंस्कार–वशा–द्दृश्यैर्बहिः स्फुरन् ॥४८॥
यदा यदधितिष्ठामि, तदा तत्स्वतया वपुः ।
[3]विद्वांस्तद्वृद्धिहानिभ्यां, [4]स्वस्य मन्ये चयक्षयौ ॥४९॥
दारादिवपुरप्येवं, तदात्माधिष्ठितं विदन् ।
तदात्मत्वेन[5] तत्सौख्य– दुःखे संनिमजे पुरा ॥५०॥
सम्प्रत्यात्मितयात्मानं, देहं देहतयात्मनः ।
परेषां[6] च विदन् साम्य–सुधां [7]चर्वन्नविक्रियाम् ॥५१॥
तत्त्वविज्ञानवैराग्य–रुद्धचित्तस्य खानि मे ।
न मृतानि न जीवन्ति, न सुप्तानि न जाग्रति ॥५२॥
विशदज्ञानसन्ताने, संस्कारोद्बोधरोधिनि[8] ।
[9]जाग्रत्यजाग्रत्स्मृत्यादेः, किं स्मरेत्[10] [11]कल्पनाऽपि मे ॥५३॥

---

१ मत्सम्भवं आत्मोत्थमिति यावत् । २ शुद्धनिश्चयनयापेक्षया । ३ ज्ञानवान् । ४ तस्य वपुषः वृद्धिश्च हानिश्च ताभ्यां । ५ स्वकीयत्वेन । ६ दारादीनाम् । ७ अनुभवन् तिष्ठामि । ८ संकल्पविकल्पनिरोधके । ९ सति । १० बाह्यवस्तु प्रति किं स्मरेत् ? अपि तु न । ११ कल्पना परिणतिकर्त्री ।

निश्चित्यानुभवन् हेयं, स्वानुभूत्यै बहिस्त्यजन् ।
आदेयं चाददानः स्यां, भोक्ता[१] रत्नत्रयात्मकः ॥५४॥
हित्वोपयोगमशुभं, श्रुताभ्यासाच्छुभं श्रितः ।
शुद्धमेवाधितिष्ठेयं, श्रेष्ठा निष्ठा हि सैव मे ॥५५॥
उपयोगोऽशुभो राग-द्वेषमोहैः क्रियात्मनः ।
शुभः केवलिधर्मानु-रागाच्छुद्धः स्वचिल्लयात् ॥५६॥
स एवाहं स एवाह-मिति भावयतो मुहुः ।
योगः स्यात् कोऽपि निःशब्दः, शुद्धस्वात्मनि यो लयः॥५७॥
शुद्धबुद्धस्वचिद्रूप, एव लीनः कुतोऽपि न ।
बिभेति परमानन्द, एव विन्दति भावकम्[२] ॥५८॥
तदैकाग्र्यं परं प्राप्तो, निरुन्धन्नशुभास्रवम् ।
क्षपयन्नर्जितं चैनो, जीवन्नप्यस्ति निर्वृतः ॥५९॥
यद्भावकर्म रागादि, यज्ज्ञानावरणादि तत् ।
द्रव्यकर्म यदङ्गादि, नोकर्मोज्झामि तद् बहिः ॥६०॥
भाव्यते[३]ऽभीक्ष्णमिष्टार्थ-प्रीत्याद्यात्मतयात्मना ।
वेद्यते यत्करोतीमं, यद्वशे[४] भावकर्म तत् ॥६१॥
बोधरोधादिरूपेण बहुधा पुद्गलात्मना[५] ।
विकारयति[६] चिदात्मापि [७]येनात्मा द्रव्यकर्म तत् ॥६२॥

१ निजचैतन्यभावस्य भोक्ता अहं भवेयम् । २ परमानन्दम् । ३ वेद्यते । ४ सति । ५ पुद्गलस्वभावेन । ६ विरूपको (कर्मरूपो) भवति । ७ कर्मणा ।

यज्जीवेऽङ्गादि तद्वृद्धि-हान्यर्थः पुद्गलोच्चयः ।
तथा विकुरुते कर्म-यशःश्लोकर्म नाम तत् ॥६३॥
व्यवहारेण मे हेय-मसद्ग्राह्यं च सद्बहिः ।
सिद्ध्यै निश्चयतोऽध्यात्मं, मिथ्येतरदृगादिकम्[१] ॥६४॥
न मे हेयं न चाऽऽदेयं, किञ्चित् परमनिश्चयात् ।
तद्यत्नसाध्या वाऽयत्न-साध्या वा सिद्धिरस्तु मे ॥६५॥
भवितव्यतां [२]भगवती मयियन्तु[३] [४]रहन्त्वहं करोमीति ।
यदि सद्गुरूपदेशव्यवसितजिनशासनरहस्याः ॥६६॥
शुद्धबुद्धस्वचिद्रू-पा-द्न्यस्याभिमुखी रुचिः ।
व्यवहारेण सम्यक्त्वं, निश्चयेन तथाऽऽत्मनः ॥६७॥
निर्विकल्पस्वसंवित्ति-रनर्पितपरग्रहा ।
सज्ज्ञानं निश्चयादुक्तं, व्यवहारनयात् परम् ॥६८॥
यदेव ज्ञानमर्थेन, संसृष्टं प्रतिपद्यते ।
वाचकत्वेन शब्दः स्यात् तदेव सविकल्पकम् ॥६९॥
सद्वृत्तं सर्वसावद्य-योगव्यावृत्तिरात्मनः ।
गौणं[५] स्याद् वृत्तिरानन्द,-सान्द्रा कर्मच्छिदाऽञ्जसा ॥७०॥
तत्त्वार्थाभिनिवेशनिर्णयतप, श्चेष्टामयीमात्मनः
शुद्धिं लब्धिवशाद्भजन्ति विकलां[६], यद्यच्च पूर्णामपि ।

१ मिथ्यादृगादिकं हेयम्, सम्यग्दृगादिकं ग्राह्यम् । २ माहात्म्यवतीम् । ३ आश्रयन्तु । ४ त्यजन्तु । ५ व्यवहारम् । ६ व्यवहाररूपां अपूर्णामित्यर्थः ।

स्वात्मप्रत्ययविश्चितव्रयमयीं, तद्भूव्यसिंहप्रियो
भूयाद्वो व्यवहारनिश्चयमयं, रत्नत्रयं श्रेयसे ॥७१॥
शश्वच्चेतयते यदुत्सवमयं, ध्यायन्ति यद्योगिनो
येन प्राणिति विश्वमिन्द्रनिकरा, यस्मै नमः कुर्वते ।
वैचित्री जगतो यतोऽस्ति पदवी, यस्यान्तरप्रत्ययो
मुक्तिर्यत्र लयस्तदस्तु मनसि, स्फूर्जत् परं ब्रह्म मे ॥७२॥

इति पण्डिताशाधरविरचितं
अध्यात्मरहस्याऽपरनाम योगोद्दीपनशास्त्रं
समाप्तम् ॥

## अर्हद्भक्तिः

जय नाथ ! जय जिनेश्वर ! जय जय कन्दपदर्पभरदलन !
जय नष्टघातिकर्मक ! जय देवेन्द्रमुकुटघृष्टितचरण ! ॥१॥
श्रियः पतिः श्रीवरमङ्गलालयः सुखं निषण्णो हरिविष्टरेऽनिशं।
निषेव्यते योऽखिललोकनायकैः स मङ्गलं नोऽस्तु परं परो जिनः२

सिद्धार्थ ! सिद्धिकर ! शुद्ध ! समृद्ध ! बुद्ध ! ।
मध्यस्थ ! सुस्थित ! शिवस्थित ! सुव्यवस्थ !
शामिन ! उदार ! भगवन् ! सुगृहीतनामन् !
आनन्दरूप ! पुरुषोत्तम ! मां पुनीहि ॥३॥
देवाधिदेव ! परमेश्वर ! वीतराग !
सर्वज्ञ ! तीर्थंकर ! सिद्ध ! महानुभाव !

त्रैलोक्यनाथ ! जिनपुङ्गव ! वर्द्धमान !
स्वामिन् ! गतोऽस्मि शरणं चरणद्वयं ते ॥४॥

कल्याणमङ्गलसुखावह ! भद्रमूर्ते !
भर्गः प्रशान्त ! निरुपप्लव ! सौम्यसम्यक् !
निष्क्रान्त ! कान्त ! विपदन्त ! भदन्त ! दान्त !
मा मा मम स्म मनसोऽपगमः कथञ्चित् ॥५॥

कल्पद्रुमामृतरसायन ! कामधेनो !
चिन्तामणे ! गुणसमुद्र ! मुनीन्द्रचन्द्र !
सिद्धौषधे ! सुखनिधे ! सुविधे ! विधेया,
धीस्ते स्तुतौ मम यथास्ति तथा विधेया ॥६॥

अदृष्टपर्यन्तसुखप्रदायिने ।
विमूढसत्त्वप्रतिबोधहेतवे ॥
अजन्मने जन्मनिबन्धनच्छिदे ।
निरस्तुतिज्ञानमयाय ते नमः ॥७॥

चतुर्निकायामरवन्दिताय,
घातिक्षयावाप्तचतुष्टयाय ।
कुतीर्थतर्काजितशासनाय,
देवाधिदेवाय नमो जिनाय ॥८॥

इन्द्रत्वं च निगोदतां च बहुधा मध्ये तथा योनयः ।
संसारे भ्रमता चिरं यदखिलाः प्राप्ता मयाऽनन्तशः ॥

तन्नापूर्वमिहास्ति किञ्चिदपि मे हित्वा विमुक्तिप्रदां ।
सम्यग्दर्शनबोधवृत्तिपदवीं तां देव ! पूर्णां कुरु ॥९॥

देव ! त्वदीयचरणद्वयदर्शनेन,
कर्मक्षयं भवति बोधिसमाधिसौख्यम् ।
निर्णामियर्ति विलयं खलु पापमन्नं,
सर्वार्थसिद्धिविपुलं परतः सुखं च ॥१०॥

## अर्हद्भक्तिः

बोधोऽवधिः श्रुतमशेषनिरूपितार्थं–,
मन्तर्बहिः करणजा सहजा मतिस्ते ।
इत्थं स्वतः सकलवस्तुविवेकबुद्धेः,
का स्याज्जिनेन्द्र ! भवतः परतो व्यपेक्षा ॥१॥

ध्यानावलोकविगलत्तिमिरप्रताने,
तां देव ! केवलमयीं श्रियमादधाने ।
आसीत्त्वयि त्रिभुवनं मुहुरुत्सवाय,
व्यापारमन्थरमिवैकपुरं महाय ॥२॥

छत्रं दधामि किमु चामरमुत्क्षिपामि,
हेमाम्बुजान्यथ जिनस्य पदेऽर्पयामि ।
इत्थं मुदामरपतिः स्वयमेव यत्र,
सेवापरः परमहं किमु वच्मि तत्र ॥३॥

त्वं सर्वदोषरहितः सुनयं वचस्ते,
सत्त्वानुकम्पनपरः सकलोविधिश्च ।
लोकस्तथापि यदि तुष्यति न त्वयीश !,
कर्मास्य तन्ननु रवाविव कौशिकस्य ॥४॥
पुष्पं त्वदीयचरणार्चनपीठसङ्गात्,
चूडामणी भवति देव ! जगत्त्रयस्य ।
अस्पृश्यमन्यशिरसि स्थितमप्यतस्ते,
को नाम साम्यमनुशास्त्रमनीश्वराद्यैः ॥५॥
मिथ्यामहान्धतमसावृतमप्रबोध–,
मेतत् पुरा जगदभूद्भवगर्तपाति ।
तद्देव दृष्टिहृदयाब्जविकासकान्तैः,
स्याद्वादरश्मिभिरथोद्धृतवांस्त्वमेव ॥६॥
पादाम्बुजद्वयमिदं तव देव ! यस्य,
स्वच्छे मनःसरसि सन्निहितं समास्ते ।
तं श्रीः स्वयं भजति तं नियतं वृणीते,
स्वर्गापवर्गजननीव सरस्वतीयम् ॥७॥
विनमदमर, श्रेणी मौलि, स्फुरन्मणिमालिका,
किरणलहरी, पातस्त्यायन् , नखद्युतिकन्दलम् ।
प्रणतदुरित, ध्वान्तध्वंस, प्रभातदिवाकरो,
दिशतु भवतां श्रेयः शीघ्रं जिनाङ्घ्रिसरोरुहं ॥८॥

इति अर्हद्भक्तिः ।

# हार्दिकभावना

प्रातर्विधिस्तव पदाम्बुजपूजनेन ।
मध्याह्नसन्निधिरयं मुनिमाननेन ॥
सायन्तनोऽपि समयो मम देव ! यायात् ।
नित्यं त्वदाचरणकीर्तनकामितेन ॥१॥

भक्तिः नित्यं जिनचरणयोः सर्वसत्त्वेषु मैत्री ।
सर्वातिथ्ये मम विभवधीर्बुद्धिरध्यात्मतत्त्वे ॥
सद्विद्येषु प्रणयपरता चित्तवृत्तिः परार्थे ।
भूयादेतद् भवति भगवन् ! धाम यावत्त्वदीयम् ॥२॥

अर्हद्भक्तिपरायणस्य विशदं जैनं वचोऽभ्यस्यतो ।
निर्जिह्वस्य परापवादवदने शक्तस्य सत्कीर्तने ॥
चारित्रोद्यतचेतसः क्षपयतः कोपादिविद्वेषिणो ।
देवाध्यात्मसमाहितस्य सकलाः सर्यन्तु मे वासराः ॥३॥

जीवाजीवपदार्थतत्त्वविदुषो बन्धास्रवौ रुन्धतः ।
शश्वत् संवरनिर्जरे विदधतो मुक्तिश्रियं काङ्क्षतः ॥
देहादेः परमात्मतत्त्वममलं मे पश्यतस्तत्त्वतः ।
धर्मध्यानसमाधिशुद्धमनसः कालः प्रयातु प्रभो ! ॥४॥

व्यसननिहृति शीलोद्युक्ति गुणोज्ज्वलसङ्गतिः ।
करणविजिति र्जन्मत्रस्तिः कषायनिराकृतिः ॥
जिनमतिरतिः सम्यक्त्वक्तिस्तपश्चरणे मतिः ।
तरितुमनसो जन्माम्भोधिं भवन्तु जिनेन्द्र ! मे ॥५॥

आबाल्याज् जिनदेव देव भवतः श्रीपादयोः सेवया।
सेवासक्तविनेयकल्पलतया कालोऽद्य यावद्गतः॥
त्वां तस्याः फलमर्थये तदधुना प्राणप्रयाणक्षणे।
त्वन्नामप्रतिबद्धवर्णपठने कण्ठोऽस्त्वकुण्ठो मम ॥६॥
शास्त्राभ्यासो जिनपतिनुतिः सङ्गतिः सर्वदार्यैः।
सद्वृत्तानां गुणगणकथा दोषवादे च मौनम्॥
सर्वस्याऽपि प्रियहितवचो भावना चात्मतत्त्वे।
सम्पद्यन्तां मम भवभवे यावदेतेऽपवर्गः॥७॥

## अर्हत्स्तुतिः

तुभ्यं नमो दशगुणोर्जितदिव्यगात्र!।
कोटिप्रभाकरनिशाकरजैत्रतेजः!॥
तुभ्यं नमोऽतिचिरदुर्जयघातिजात-
घातोपजातदशसारगुणाभिराम!॥१॥
तुभ्यं नमः सुरनिकायकृतैर्विहारे,
दिव्यैश्चतुर्दशविधातिशयैरुपेत!।
तुभ्यं नमः त्रिभुवनाधिपतित्वचिह्न-
श्रीप्रातिहार्याष्टकलक्षिताहन्!॥२॥
तुभ्यं नमः परमकेवलबोधवार्धे!।
तुभ्यं नमः समसमस्तपदावलोक!॥
तुभ्यं नमो निरुपमाननिरन्तवीर्य!।
तुभ्यं नमो निजनिरञ्जननित्यसौख्य!॥३॥

तुभ्यं नमः सकलमंगलवस्तुमुख्य ! ।
तुभ्यं नमः शिवसुखप्रद ! पापहारिन् ! ॥
तुभ्यं नमस्त्रिजगदुत्तमलोकपूज्य ! ।
तुभ्यं नमः शरणभूश्रय रक्ष रक्ष ॥४॥

तुभ्यं नमोऽस्तु नवकेवलपूर्वलब्धे ! ।
तुभ्यं नमोऽस्तु परमैश्वर्योपलब्धे ! ॥
तुभ्यं नमोऽस्तु मुनिकुञ्जर ! यूथनाथ ! ।
तुभ्यं नमोऽस्तु भुवनत्रितयैकनाथ ! ॥५॥

तुभ्यं नमोऽधिगुरवे, नमस्तुभ्यं महाविधे ।
तुभ्यं नमोऽस्तु भव्याब्जबन्धवे गुणसिन्धवे ॥६॥

तुभ्यं नमः सकलघातिमलव्यपाय-
सम्भूतकेवलमयामललोचनाय ।
तुभ्यं नमो दुरितबन्धनशृङ्खलानां ।
छेत्रे भवार्गलभिदे जिनकुञ्जराय ॥७॥

तुभ्यं नमस्त्रिभुवनैकपितामहाय ।
तुभ्यं नमः परमनिर्वृतिकारणाय ॥
तुभ्यं नमोऽधिगुरवे गुरवे गुणौघैः ।
तुभ्यं नमो विदितविश्वजगत्त्रयाय ॥८॥

तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !
तुभ्यं नमः क्षितितलामलभूषणाय ॥

तुभ्यं नमस्त्रिजगतः परमेश्वराय ।
तुभ्यं नमो जिनभवोदधिशोषणाय ॥९॥

तुभ्यं नमोऽप्रमितवीर्यतया युताय ।
तुभ्यं नमः प्रियहितप्रतिपादकाय ॥
तुभ्यं नमः सकलसत्त्वहितङ्कराय ।
तुभ्यं नमो दुरितसन्ततिमर्दनाय ॥१०॥

पृष्ठ ६३ ईदृशः श्लोकोऽस्ति

## अथ सिद्धभक्तिः

सम्यग्ज्ञानत्रयेण प्रविदितनिखिलज्ञेयतत्त्वप्रपञ्चाः,
प्रोद्धूय ध्यानवातैः सकलमघरजः प्राप्तकैवल्यरूपाः ।
कृत्वा सत्त्वोपकारं त्रिभुवनपतिभिर्दत्तयात्रोत्सवा ये,
ते सिद्धाः सन्तु लोकत्रयशिखरपुरीवासिनः सिद्धये वः॥१॥
दानज्ञानचरित्रसंयमनय, प्रारम्भगर्भं मनः,
कृत्वान्तर्बहिरिन्द्रियाणि मरुतः, संयम्य पञ्चापि च ।
पश्चाद्वीतविकल्पजालमखिलं, अस्यत्तमः सन्तति,
ध्यानं तत्प्रविधाय ये च मुमुचु, स्तेभ्योऽपि बद्धोऽञ्जलिः२
इत्थं येऽत्र समुद्रकन्दरसरः, स्रोतस्विनीभूनभो-,
द्वीपाद्रिद्रुमकाननादिषु भृत, ध्यानावधानर्द्धयः ।

कालेषु त्रिषु मुक्तिसङ्गमजुषः स्तुत्यास्त्रिभिर्विष्टपैः,
ते रत्नत्रयमङ्गलानि ददतां, भव्येषु रत्नाकराः ॥३॥
लोकोर्ध्वभागविजने मुक्तिकान्ताविराजितान् ।
नष्टकर्माष्टकान् सिद्धान् विशुद्धान् हृदि भावये ॥४॥
कर्मबन्धनमुक्तेभ्यः प्राप्तेभ्यः परमं पदम् ।
साक्षात् कृतात्मरूपेभ्यः सिद्धेभ्यः सर्वदा नमः ॥५॥

स्वस्वरूपस्थितान् शुद्धान् प्राप्ताष्टगुणसम्पदः ।
नष्टाष्टकर्मसन्दोहान् सिद्धान् वन्दे पुनः पुनः ॥६॥

संसारचक्रगमनागतिविप्रमुक्तान् ।
नित्यं जरामरणजन्मविकारहीनान् ॥
देवेन्द्रदानवगणैरभिपूज्यमानान् ।
सिद्धांस्त्रिलोकमहितान् शरणं प्रपद्ये ॥७॥

बाह्याभ्यन्तरहेतुजातसुदृशः पूर्वश्रुतैरादिमान् ।
शुक्लध्यानयुगाद् विजित्य दुरितं लब्ध्वा स योगिश्रियम् ॥
प्राप्याऽयोगिपदं परेण सकलं निर्जित्य कर्मोत्करम् ।
शुक्लध्यानयुगेन सिद्धसुगुणान् सिद्धान् समाराधये ॥८॥

सिद्धेभ्यो निष्ठितार्थेभ्यो वरिष्ठेभ्यः कृतादरः ।
अभिप्रेतार्थसिद्ध्यर्थं नमस्कुर्वे पुनः पुनः ॥९॥

लोकालोकविलोकनैकचतुरं, यद् दर्शनं निर्मलं ।
यस्य ज्ञानमनन्ततां प्रविदधत् सर्वात्मना वेदकम् ॥

यच्छक्ति युगपत् क्षणेन नियतं, विश्वस्य चोद्धारिणी ।
यत् सौख्यं विगतप्रबाधमकलं, स पातु सिद्धः स्तुतः ॥१०॥

इति सिद्धभक्तिः ।

# सिद्धभक्तिः

सिद्धाः शुद्धाः प्रबुद्धा व्यपगतविपदो दर्शनज्ञानचर्या,
संयोगाग्निप्रतानप्रकटपटुशिखा प्लुष्टकर्मेन्धना ये ।
स्तुत्या नित्यं प्रयत्य व्रतसमितितपो ध्यानवद्भिर्मुनीन्द्रैः,
तान् वन्दे भक्तिनम्रः प्रविमलमनसा मस्तकन्यस्तहस्तः ॥१॥

आबाधानां वियोगो गुरुलघुविरहः सूक्ष्ममत्यन्तवीर्यं,
दृग्ज्ञानानन्तभावः सुखमनुपरतं क्षायिकं दर्शनं च ।
रूपातीतश्च रूपं मुनिभिरविहिता सम्यगष्टौ गुणास्ते,
सिद्धानां प्रागुपात्तस्यतनुपरिमिते-रीषदूनाकृतीनां ॥२॥

आलोकान्तात् व्रजन्ति व्ययगमसमयानन्तरं कर्मणां ते,
बीजाग्नेरण्डकाना मिवदहनशिखे-वाग्रतालाबुवद्वा ।
ऊर्ध्वस्वभावगत्या निलयमुपगतो यत्र चोन्मुक्त एकः,
तत्रानन्ताश्च तिष्ठन्त्यवगाहनगुणा निःप्रतिद्वन्द्वतुल्या ॥३॥

भव्योच्छेदप्रसङ्गान्नियति नियमिता संसृतिं प्राहुरन्ये,
तेषां युक्त्या न युङ्क्ते वचनमिह यतोऽतीतकालोऽप्यनन्तः ।

न प्रत्यायाति नान्तं क्रमितुमभिमतः कालशून्यप्रसक्तेः,
एवं कालस्ततोऽर्थं न भवति विदुषां नव्यशून्यप्रसङ्गः ॥४॥

केचिद्दीपावसाना प्रतिमनिरनुगा मन्यते मुक्तिमेनां,
आचार्यो नैव मार्गो न हि भवति यतो विद्यमानस्य नाशः ।

सर्वेणैवात्मनोऽन्य-क्षण इति सपरैरभ्युपेतो परस्य,
स्यादुत्पत्तेर्निमित्तं क्षण इव विगतो मध्यवर्ती क्षणत्वात् ॥५॥

मन्यन्ते नैव मुक्तिं व्युपरतकरणं कायतोऽपि व्यपेतां,
चैतन्यस्यात्मनिष्ठां प्रकृतिपुरुषयोरन्तरं ज्ञानलभ्यां ।

चैतन्यस्याप्रवृत्तिः किल तदभिमता तेन मूर्खस्वभावः,
प्राप्यैवं सर्वप्रयासो न हि भवति वृथा वादिनामेवमेषां ॥६॥

बुद्धीच्छाद्वेषधर्मा-सुखमसुखमथो धर्मसंस्कारयत्ना,
जीवस्यैते गुणास्ते व्यपगमजनितां मुक्तिमेके वदन्ति ।

नायं पक्षोऽपि युक्तो न हि रहितगुणा येन लोके पदार्था,
दृष्टं नारवस्य शृङ्गं स्फुटनकुटिलता कौ व्यधर्माद्युपेतं ॥७॥

दोषास्तेषां मताना-मुपरि निगदिता दृग्विशुद्ध्यर्थमेव,
नाप्रागल्भ्यान्नदोष-ग्रहणखलतया नापि रागादिहेतोः ।

दिग्मात्राख्यापनार्थं कियदिव भगवत्प्रोक्तसिद्धान्तमार्गे,
सिद्धा ये दर्शितास्ते शिवपदमचिरादेव मह्यं दिशन्तु ॥८॥

# दर्शनभक्तिः

तत्त्वेषु प्रणयं परोऽस्य मनसः श्रद्धानमुक्तं जिनै–,
रेतद्द्वित्रिदशप्रभेदविषयं व्यक्तं चतुर्भिर्गुणैः ।
अष्टाङ्गं भुवनत्रयार्चितमिदं मूढैरपोढं त्रिभि–,
श्चित्ते देव ! दधामि संसृतिलतोल्लासावसानोत्सवम् ॥१॥

ते कुर्वन्तु तपांसि दुर्धरधियो ज्ञानानि सञ्चिन्वतां,
वित्तं वा वितरन्तु देव ! तदपि प्रायो न जन्मच्छिदः ।
एषा येषु न विद्यते तव वचः श्रद्धावधानोद्धुरा,
दुष्कर्माङ्कुरकुञ्जवज्रदहनद्योतावदाता रुचिः ॥२॥

संसाराम्बुधिसेतुबन्धमसमप्रारम्भलक्ष्मीवन,–
प्रोल्लासामृतवारिवाहमखिलत्रैलोक्यचिन्तामणिम् ।
कल्याणाम्बुजषण्डसम्भवसरः सम्यक्त्वरत्नं कृती,
यो धत्ते हृदि तस्य नाथ ! सुलभाः स्वर्गापवर्गश्रियः ॥३॥

ज्ञात्वा करामलकवद् भुवि सर्वविद्यां,
कृत्वा तपांसि बहुकोटियुगान्तरेऽपि ।
सद्दर्शनामृतरसायनपानबाह्या,
नात्यन्तिकीमनुभवन्ति हि मोक्षलक्ष्मीम् ॥४॥

इति दर्शनभक्तिः

# ज्ञानभक्तिः

अत्यल्पायतिरक्षजा मतिरियं बोधोऽवधिः सावधिः,
साश्चर्यः क्वचिदेव योगिनि स च स्वल्पो मनःपर्ययः ।
दुष्प्रापं पुनरद्य केवलमिदं ज्योतिः कथागोचरं,
माहात्म्यं निखिलार्थगे तु सुलभे किं वर्णयामः श्रुते ॥१॥
यद्देवैः शिरसा धृतं गणधरैः कर्णावतंसीकृतं,
न्यस्तं चेतसि योगिभिर्नृपवरैराघ्रातसारं पुनः ।
हस्ते दृष्टिपथे मुखे च निहितं विद्याधराधीश्वरैः,
तस्याद्वादसरोरुहं मम मनोहंसस्य भूयान्मुदे ॥२॥

मिथ्यातमःपटलभेदनकारणाय,
स्वर्गापवर्गपुरमार्गनिबोधनाय ।
तत्तत्त्वभावनमनाः प्रणमामि नित्यं,
त्रैलोक्यमङ्गलकराय जिनागमाय ॥३॥

इति ज्ञानभक्तिः

# चारित्रभक्तिः

ज्ञानं दुर्भगदेहमण्डनमिव स्यात् स्वस्य खेदावहं,
धत्ते साधु न तत्फलश्रियमयं सम्यक्त्वरत्नाङ्कुरः ।
कामं देव ! यदन्तरेण विफलास्तास्तास्तपोभूमयः,
तस्मै त्वच्चरिताय संयमदमध्यानादिधाम्ने नमः ॥१॥

यच्चिन्तामणिरीप्सितेषु वसतिः सौरूप्यसौभाग्ययोः,
श्रीपाणिग्रहकौतुकं कुलबलारोग्यागमे सङ्गमः ।
यत्पूर्वैश्चरितं समाधिनिधिभिर्मोक्षाय पञ्चात्मकं,
तच्चारित्रमहं नमामि विविधं स्वर्गापवर्गाप्तये ॥२॥
हस्ते स्वर्गसुखान्यतर्कितभवास्ताश्चक्रवर्तिश्रियो,
देवाः पादतले लुठन्ति फलति द्यौः कामितं सर्वतः ।
कल्याणोत्सवसम्पदः पुनरियं तस्याधिकाभ्युदये,
प्रागेवावतरन्ति यस्य चरितैर्जैनैः पवित्रं मनः ॥३॥

इति चारित्रभक्तिः

## योगिभक्तिः

योगीश्वरान् जिनान् सर्वान् योगनिर्धूतकल्मषान् ।
योगैस्त्रिभिरहं वन्दे, योगस्कन्धप्रतिष्ठितान् ॥१॥

आतापनादितरुमूलनिषण्णयोगान्,
वीरासनादि ननु संस्थितयोगयुक्तान् ।
साधूननेकगुणसंयमरत्नपूर्णान्,
स्तौमि स्तवेन मनसा शिरसा च नित्यम् ॥२॥

प्रावृट्कालेसविद्युत्प्रपतितसलिले वृक्षमूलाधिवासाः,
हेमन्ते रात्रिमध्ये प्रतिविगतभयाः काष्ठवत्त्यक्तदेहाः ।
ग्रीष्मे सूर्यांशुतप्ताः गिरिशिखरगताः स्थानकूटान्तरस्थाः,
ते मे धर्मं प्रदद्युर्मुनिगणवृषभा मोक्षनिःश्रेणिभूताः॥३॥

गिरिकन्दरदुर्गेषु ये वसन्ति दिगम्बराः ।
पाणिपात्रपुटाहारास्ते यान्ति परमां गतिम् ॥४॥

## द्वितीययोगिभक्तिः

मानुष्यं प्राप्य पुण्यात् प्रशममुपगता रोगवद्भोगजातं,
मत्वा गत्वा वनान्तं दृशिचिदिचरणे ये स्थिताः सङ्गमुक्ताः ।
कः स्तोता वाक्पथातिक्रमणपटुगुणैराश्रितानां मुनीनां ।
स्तोतव्यास्ते महद्भिर्भुवि य इह तदङ्घ्रिद्वये भक्तिभाजः ॥१॥

प्रोद्यत्तिग्मकरोग्रतेजसिलसच्चण्डानिलोद्यद्दिशि,
स्फारीभूतसुतप्तभूमिरजसि प्रक्षीणनद्यम्भसि ।
ग्रीष्मे ये गुरुमेदिनीध्रशिरसि ज्योतिर्निधायोरसि,
ध्वान्तध्वंसकरं वसन्ति मुनयस्ते सन्तु नः श्रेयसे ॥२॥

ते वः पान्तु मुमुक्षवः कृतरवैरब्दैरतिश्यामलैः,
शश्वद् वारिवमद्भिरब्धिविषयक्षारत्वदोषादिव ।
काले मज्जदिले पतद्गिरिकुले धावद्धुनीसङ्कुले,
झञ्झावातविसंस्थुले तरुतले तिष्ठन्ति ये साधवः ॥३॥

म्लायत्कोकनदे गलत्कपिमदे भ्रश्यद् द्रुमौघच्छदे,
हर्षद्रोमदरिद्रके हिमऋतावत्यन्तदुःखप्रदे ।
ये तिष्ठन्ति चतुष्पथे पृथुतपःसौधस्थिताः साधवः,
ध्यानोष्मप्रहतोग्रशैत्यविधुरास्ते मे विदध्युः श्रियम् ॥४॥

कालत्रये बहिरवस्थितिजातवर्षा,-
शीतातपप्रमुखसङ्घटितोग्रदुःखे ।
आत्मप्रबोधविकले सकलोऽपिकाय-
क्लेशो वृथा वृतिरिवोज्झितशालिबीजे ॥४॥

इति योगिभक्तिः

## पञ्चपरमेष्ठीभक्तिः

नापाकृतानि प्रभवन्ति भूय, स्तमांसि यैर्दृष्टिहराणि सद्यः ।
ते शाश्वतीमस्तमयानभिज्ञां, जिनेन्द्रवो वो वितरन्तु लक्ष्मीम् ॥१॥

विभिद्य कर्माष्टकशृङ्खलां ये, गुणाष्टकैश्वर्यमुपेत्य पूतम् ।
प्राप्तास्त्रिलोकाग्रशिखामणित्वं, भवन्तु सिद्धा मम सिद्धये ते ॥२॥

ये चारयन्ते चरितं विचित्रं, स्वयं चरन्तो जनमर्चनीयाः ।
आचार्यवर्या विचरन्तु ते मे प्रमोदमाने हृदयारविन्दे ॥३॥

येषां तपःश्रीरनघा शरीरे, विवेचिका चेतसि तत्त्वबुद्धिः ।
सरस्वती तिष्ठति वक्त्रपद्मे, पुनन्तु तेऽध्यापकपुङ्गवा वः ॥४॥

कषायसेनां प्रतिबन्धिनीं ये, निहत्य धीराः शमशीलशस्त्रैः ।
सिद्धिं विबाधां लघु साधयन्ते, ते साधवो मे वितरन्तु सिद्धिम् ॥५

शास्त्राम्बुधेः पारमियर्ति येषां, निषेवमाणाः पदपद्मयुग्मम् ।
गुणैः पवित्रैर्गुरवो गरिष्ठां, कुर्वन्तु निष्ठां मम ते वरिष्ठाः ॥६॥

इति पञ्चपरमेष्ठिभक्तिः

# पञ्चगुरुभक्तिः

समवशरणधामान् मुक्तिलक्ष्मीविलासान्,
स्वकलितमगधामान् दिव्यविद्यारसनाथान् ।
भवनिगलविनाशोद्योगयोगप्रकाशान्,
निरुपमगुणभावान् संस्तुवेऽहं क्रियावान् ॥१॥

नरोरगसुराम्भोज-विरोचनरुचिश्रियम् ।
आरोग्याय जिनाधीशं करोम्यर्चनगोचरम् ॥२॥

प्रत्नकर्मविनिर्मुक्तान् नूत्नकर्मविवर्जितान् ।
यत्नतः संस्तुवे सिद्धान् रत्नत्रयमहीयसः ॥३॥

विचार्य सर्वमैतिह्य-माचार्यकमुपेयुषः ।
आचार्यवर्यानर्चामि सञ्चार्य हृदयाम्बुजे ॥४॥

अपास्तैकान्तवादीन्द्रा-नपारागमपारगान् ।
उपाध्यायानुपासेऽह-मुपायाय श्रुतासये ॥५॥

बोधापगाप्रवाहेण विध्यातानङ्गवह्नयः ।
विध्याराध्याङ्घ्रयः सन्तु साध्यबोध्याय साधवः ॥६॥

रत्नत्रयपुरस्काराः पञ्चापि परमेष्ठिनः ।
भव्यरत्नाकरानन्दं कुर्वन्तु भुवनेन्दवः ॥७॥

इति पञ्चगुरुभक्तिः

## पञ्चगुरुभक्तिः

श्रीपादेन्दुद्वयस्यासी-दमरीचिकुरोऽम्बरम् ।
यस्य स्याद्वादिनो विश्व,-वेदिनः पातु नो जिनः ॥१॥
नष्टदुष्टाष्टकर्माणः ते पुष्टाष्टगुणर्द्धयः ।
त्रिलोकीमस्तकोत्तंसाः, सिद्धाः नः सन्तु सिद्धिदाः ॥२॥
निराकृत्यान्तरं ध्वान्तं, सूरिसूरः करोत्वरम् ।
स्वमानसाम्बुजानन्द,-मरन्दं भासुरैर्वरैः ॥३॥
कुर्वन्नखर्वं दुर्वादि-मदद्विरदमर्दनम् ।
स्याद्वादाद्रौ उपाध्याय-सिन्धुरारि र्विजृम्भताम् ॥४॥
रत्नत्रयामृताम्भोधि-विधवः साधवः श्रियम् ।
दधुरात्मर्द्धिनिर्धूत-दुरितध्वान्तसञ्चयः ॥५॥
त्रिजगद्गुरवः सर्वैः, गुणै र्गुरव इत्यमी ।
गुरवः पञ्च नः पान्तु, पापापायनिकायतः ॥६॥

इति पञ्चगुरुभक्तिः

## शान्तिभक्तिः

भवदुःखानलशान्तिर्धर्मामृतवर्षजनितजनशान्तिः ।
शिवशर्मास्रवशान्तिः शान्तिकरः स्ताज्जिनः शान्तिः ॥१॥
अनन्तविज्ञानमनन्तवीर्यतामनन्तसौख्यत्वमनन्तदर्शनम् ।
बिभर्ति योऽनन्तचतुष्टयं विभुः, स नोऽस्तु शान्तिर्भवदुःखशान्तये

हरीशपूज्योऽप्यहरीशपूज्यः, सुरेशवन्द्योऽप्यसुरेशवन्द्यः ।
अनङ्गरम्योऽपि शुभाङ्गरम्यः, श्रीशान्तिनाथः, शुभमातनोतु ।३।

भगवन् ! दुर्नयध्वान्तैराकीर्णे पथि मे सति ।
सज्ज्ञानदीपिका भूयात् संसाराब्धिवर्धिनी ॥४॥

जन्मजीर्णाटवीमध्ये जनुषान्धस्य मे सती ।
सन्मार्गे भगवन् ! भक्तिर्भवतान्मुक्तिदायिनी ॥५॥

स्वान्तशान्तिममैकान्ता–मनैकान्तैकनायकः ।
शान्तिनाथो जिनः कुर्यात् संसृतिक्लेशशान्तये ॥६॥

श्रीमत्पञ्चमसार्वभौमपदवीं प्रद्युम्नरूपश्रियं,
प्राप्तः षोडशतीर्थकृत्व–मखिलत्रैलोक्यपूज्यास्पदं ।
यस्तापत्रयशान्तितः स्वयमितः शान्तिं प्रशान्तात्मनां,
शान्तिं यच्छति तं नमामि परमं शान्तिं जिनं शान्तये॥७॥

इति शान्तिभक्तिः

## श्रीवर्द्धमाननिर्वाणभक्तिः

वर्द्धमानमहं स्तोष्ये वर्द्धमानमहोदयं ।
कल्याणैः पञ्चभिर्दैवं मुक्तिलक्ष्मीस्वयंवरं ॥१॥

स्वर्गावतरणे यस्य मासान् पञ्चदश मुचन् ।
यक्षो रत्नानि दिव्यानि नीराणीव पयोधरः ॥२॥

यामिन्याः पश्चिमे भागे स्वप्नाःषोडश वीक्षिताः ।
जनन्या स्वस्थया यस्य कल्मषक्षपणक्षमाः ॥३॥

चित्रयालिङ्गिते चन्द्रे पुष्पोत्तरविमानतः ।
आषाढशुक्लषष्ठ्यां यो निर्जगाम प्रियङ्करः ॥४॥
विवेश त्रिशलाकुक्षौ कुण्डग्रामे दिवाच्युतः ।
शुक्ताविव पयोबिन्दुसागरे रक्तसङ्कुले ॥५॥
चैत्रशुक्लत्रयोदश्यां फाल्गुन्यां निर्गमो जिनः ।
मातृकुक्षेरसौ शुक्ते मुक्तामणिरिवामलः ॥६॥
सिद्धार्थनृपतेः पुत्रे तत्र जाते महोदये ।
आसनैः सह देवानां मानसानि चकम्पिरे ॥७॥
हस्तचन्द्रमसौ योगे चतुर्दश्यां सुराचले ।
स्नपयन्ति स्म तं देवा नीत्वा क्षीरोदवारिभिः ॥८॥
त्रिंशद् वर्षाणि भुक्त्वाऽसौ कुमारसुखमूर्जितं ।
विबुधैर्बोधितो भक्त्या नत्वा लौकान्तिकामरैः ॥९॥
कृष्णायां मार्गशीर्षस्य दशम्यामगृहीत्तपः ।
षष्ठेनोपवनं गत्वा चन्द्रे चित्रामधिष्ठिते ॥१०॥
वर्षाणि द्वादशैवायं विजहार तपः श्रिया ।
जातरूपधरो धीरः प्रासाद इव जङ्गमः ॥११॥
ऋजुकूलानदीतीरे जृम्भिकाग्रामसमीपिवान् ।
चित्राचन्द्रमसोर्योगे विध्वस्ते घातिकर्मणि ॥१२॥
दशम्यामेष वैशाखे षष्ठेनामरपूजितः ।
दिनान्ते केवलं लेभे लोकालोकावलोकनं ॥१३॥

अष्टाऽसौ प्रातिहार्याणि प्राप वैभारपर्वते ।
आस्थायिकास्थितो भर्ता सैकादशगणाधिपः ॥१४॥
त्रिंशत्समावजह्ने ऽसौ सर्वज्ञस्तत्त्वदेशकः ।
वेष्टितो विविधैर्भव्यैश्चन्द्रमा तारकैरिव ॥१५॥
पावापुरवरोद्याने पद्मिनीखण्डमण्डिते ।
विच्छिद्य घातिकर्माणि शुक्लध्यानमहासिना ॥१६॥
अगात् कार्तिकदर्शादौ स्वातिप्राप्ते निशाकरे ।
द्व्यहेन निर्वृतिं वीरः पर्यङ्कासनमाश्रितः ॥१७॥
व्यलीयत वपुर्यष्टिः शम्पेव क्षणमात्रतः ।
निर्वृतस्य जिनेन्द्रस्य भासुराधातुवर्जिता ॥१८॥
आगत्य सपरिवाराश्चतुर्भेदा दिवौकसः ।
तत्र तस्य विधायार्चामर्चित्वा स्वास्पदं ययुः ॥१९॥
पञ्चकल्याणसौख्यानि सम्प्राप्य यः,
शाश्वतं सिद्धिशर्मप्रयातः प्रभुः ।
वन्द्यमानो महावीर नाम त्रिधा,
भक्तिवन्तो विधत्तां सममात्मनः ॥२०॥

इति वर्धमाननिर्वाणभक्तिः

## पण्डिताशाधरकृतमहावीरस्तवनम्

सन्मतिजिनपं सरसिजवदनं, सञ्जनिताखिलकर्मकमथनम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरि महावीरजिनेन्द्रम् ॥१॥

वीरभवोदधिपारोत्तारं, मुक्तिश्रीवधूनगरविहारम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरिमहावीरजिनेन्द्रम् ॥२॥
द्विद्वादशकं तीर्थपवित्रं, जन्माभिषकृतनिर्मलगात्रम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरि महावीरजिनेन्द्रम् ॥३॥
वर्धमाननामाख्यविशालं, मानप्रमाणलक्षणदशतालम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरि महावीरजिनेन्द्रम् ॥४॥
शत्रुविमथनविकटभटवीरं, इष्टैश्वर्य धुरीकृतदूरम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरिमहावीरजिनेन्द्रम् ॥५॥
कुण्डलपुरि सिद्धार्थभूपालं, तत्पत्नी प्रियकारिणिबालम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरिमहावीरचिनेन्द्रम् ॥६॥
तत्कुलनलिनविकाशितहंसं, घातिपुरोऽघातिकविध्वंसम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरिमहावीरजिनेन्द्रम् ॥७॥
ज्ञानदिवाकरलोकालोकं, निर्जितकर्मारातिविशोकम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरिमहावीरजिनेन्द्रम् ॥८॥
बालत्वे संयमसुपालितं, मोहमहानलमथनविनीतम् ।
पद्मसरोवरमध्यगजेन्द्रं, पावापुरिमहावीरजिनेन्द्रम् ॥९॥

इति महावीरस्तवनं सम्पूर्णम्

## दर्शनभक्तिः

भव्यः सम्प्रति लब्धकालकरण प्रायोग्यलब्ध्यादिकः ।
सम्यक्त्वस्य समुद्भवाय घटयन् मिथ्यात्व कर्मस्थितिम् ॥

कर्तुं प्रक्रमते तरां त्रिकरणैः संवेगवैराग्यवान् ।
संशुद्धामुदयावलेरुपरीं कुर्वन् मुहूर्तस्थितिम् ।।१।

मिथ्यात्वं परतस्ततः परिणतो हेतोस्त्रिधा भिद्यते ।
शुद्धाशुद्ध विमिश्रितैः प्रदरणाद् भेदैः यथा कोद्रवाः

ते दृग्मोहविकल्पनास्त्रिगणनाश्चारित्रमोहस्च यैः ।
प्राग्भेदैः सहिताश्चतुर्भिरुदिता ते सप्त दृग्घातिनः ।।२।।

यच्चेषां प्रशमाद्यदौपशमिक सम्यक्त्वमत्रान्तरे ।
प्रक्षीणेषु च तेषु सप्तसु भवेत् तद्दर्शनं क्षायिकम् ।।

शुद्धश्चेदुदयं गतः प्रशमिताशेषास्तथैव स्थिताः ।
कर्मांशाः यदुदीरितं मुनिवरैस्तन्नामतो वेदकम् ।।३।।

रत्नानां गणनासु यान्ति गणनां प्रागेव यान्युज्वला– ।
न्यत्राशानिचयै र्भवन्ति सहिता ये संयताः केचन ।।

मुक्ताः स्युः सुखधाम ये च विभवा तैरेव संलक्षिताः ।
सम्यक्त्वानि विभान्ति तानि सुबहन् मूल्यानि रत्नानि वा।।४।।

भीमानेकभवप्रपञ्चविपिन–निःसरणे सार्थवान् ।
नानादुःखमहासमुद्रभयतो निस्तारणे नौरिव ।।

सान्द्राऽज्ञानतमःसमूहदलने भास्वानिवाभ्युत्थितः ।
सम्यक्त्वत्रितयं नमामि तदहं तस्यैव संशुद्धये ।।५।।

इति दर्शनभक्तिः

# अथ ज्ञानभक्तिः

सम्यग्ज्ञानानि संज्ञाश्रुतमवधिमनःपर्ययौ केवलं च ।
प्रागुक्ते तेषु ये द्वे करणपरवशो जन्मनस्तत्परोक्षम् ॥

प्रत्यक्षं स्यात् प्रमाणं त्रितयमपि परं यन्नान्यपेक्षम् ।
तत्राद्ये द्वे प्रणीते न सकलविषये विश्वविद्योतिशेषम् ॥१॥

संज्ञातावग्रहादि सबहुबहुतरा–क्षिप्रतादि प्रभेदान् ।
श्रोत्राक्षिघ्राणजिह्वात्वचनिहितमनो ग्राह्यताया मतिः सा ॥

नानाबुद्ध्यर्धियोग श्रुतविनयतपोध्यानकाष्ठामुपेतैः ।
यद्भाष्यं द्वादशाङ्गं मुनिभिरभिकरमङ्गबाह्यं श्रुताख्यम् ॥

श्रीवृक्षस्वस्तिकाब्जध्वजकलशहलाद्यङ्क चिह्नोपजन्यः ।
देशः सर्वोऽथ शाऽस्तु परम इति मतो नामतः सोऽवधिः स्यात् ॥

मर्त्यक्षेत्रावभासी प्रविपुलतपसा संयमेनाभ्युपेतः ।
स्यातां यस्य प्रभेदौ ऋजुविपुलमती स्यान्मनःपर्ययोऽसौ ॥३॥

आकाशान्तान् पदार्थान् समुपगमनतो यस्य यत्तु व्यापि नित्यम्
लोकालोकप्रमाणप्रमितमपगतः प्रान्तमध्यादिरूपम् ।

संलक्ष्यन्ते कृतार्था श्च्युततनुकरणा यत्र सिद्धाः प्रबुद्धाः
तज्ज्ञानं केवलाख्यं वियदिव विमलं भ्राजते सूक्ष्ममेकम् ॥४॥

ज्ञानावृतकर्मणोऽस्य क्षयमुपशमाज्जातमाद्यं चतुष्कम् ।
तस्यैव प्रक्षयेन प्रभवति विपुलं केवलं ज्ञानमन्त्यम् ॥

सद्दृष्टौ संप्रयोगो मुनिभिरभिहितस्तेषु साधारणोऽयम् ।
तानि ज्ञानानि वन्दे प्रणिहितमनसा प्राञ्जलिर्नम्रमूर्तिः ॥५॥

अनुष्ठानास्पदं ज्ञानं ज्ञानं मोहतमोऽपहम् ।
पुरुषार्थकरं ज्ञानं ज्ञानं निर्वृतिसाधनम् ॥६॥

विभावसोरिवोष्णत्वं चरण्योरिव चापलम् ।
शशाङ्कस्येव शीतत्वं स्वरूपं ज्ञानमात्मनः ॥७॥

इति ज्ञानभक्तिः

## चारित्रभक्तिः

श्रीमच्चरित्रममलं रिपुबलविध्वंसिलक्षणोपेतम् ।
सन्मण्डाग्रसदृशं नमामि वीरैर्धृतं भक्त्या ॥१॥

चारित्रमस्ति यस्मिन् तस्मिन् संज्ञानदर्शने नियते ।
तत्र पुनश्चारित्रं सतोरितरयोश्च भजनीयम् ॥२॥

तस्मात् प्रधानभूतं चारित्रं कारणं परिप्राप्तेः ।
मोक्षस्य तदभिधास्ये समासतो नो मनःशुद्ध्यै ॥३॥

सामायिकं प्रथममतं छेदोपस्थापनं च परिहारः ।
सूक्ष्मं च यथाख्यातं चारित्रं पञ्चधा भवति ॥४॥

हिंसानृतचौरत्वाब्रह्मपरिग्रहकषायरत्यरतिः ।
दुर्दृष्टिभयजुगुप्सा प्रमादपैशून्यदोषैश्च ॥५॥

अज्ञानं कायमनोवचनानि तथेन्द्रियाणि निरोधश्च ।
सावद्ययोगभेदास्तद्विरतिः स्याद्भेदेन ॥६॥

संज्ञानध्यानविभासमेत-मुरुदुरिततिमिरनाशकरम् ।
सामायिकचरणमिदं द्रव्यार्थिकपूर्विकं बोध्यम् ।।७।।

हिंसादिकथितभेदान् विविच्य सावद्ययोगभवांस्तान् ।
तेभ्यो विनिवृत्तिः स्याच्छेदोपस्थापनं चरणम् ।।८।।

अथवा साष्टाविंशतिः मूलगुणाः छेदिता प्रमादेन ।
तेषां पुनरपि शुद्धयै स्थापनमचिरेण कर्तव्यम् ।।९।।

संगृह्य गुरोरन्ते व्रतमेकं पञ्चकं व्रतानां च ।
हिंसायाः परिहरणं नितरां स्यादत्र परिहारः ।।१०।।

सुक्षुक्षयोपशमजे दोषाणां सर्वघातिनामत्र ।
उदये देशघ्नानां भवति च सुचत्रयं पूर्णम् ।।११।।

प्रत्याख्यानचतुष्टय-संज्वलनत्रितय नोकषायाणाम् ।
उपशमनात् क्षयतो वा शुद्धतरं स्याच्च मुक्त्यङ्गम् ।।१२।।

सामायिकं चरित्रं छेदोपस्थानं च तत एव ।
स्यादेकयमं पूर्वं सभेदयमं परं ज्ञेयम् ।।१३।।

अप्रत्याख्यानादिप्रकृतीनां सूक्ष्मलोभवर्जाणाम् ।
विंशत्युपशमनाद् वा क्षयतो वा सूक्ष्मचारित्रम् ।।१४।।

लोभादिकपूर्वोदित-विंशत्याकर्मणां क्षयाज्जातम् ।
उपशमतो यत्तेषां तत्र यथाख्यातचारित्रम् ।।१५।।

आद्ये प्रमत्तविरत प्रभृतिष्वनिवृत्तिसंयतान्तेषु ।
तत् संयमः प्रमत्तेतरयोः परिहारविशुद्धिः स्यात् ।।१६।।

सूक्ष्मकषायस्थाने प्रवर्तते सूक्ष्मसाम्परायश्च ।
उपशमान्तादिचतुष्के भवति यथाख्यातचारित्रम् ॥१७॥

सामयिकादिसंयम–तरतमयोगप्रसिद्धपरिशुद्धिः ।
एतच्चरित्रपञ्चकमभिनौमि जिनाधिपतिविहितम् ॥१८॥

मुनिना चारित्ररता कर्तव्योऽप्यष्टधा कथितभेदः ।
ज्ञानाचारो नियतं कालादिरयं विशुद्धभावेन ॥१९॥

निःशङ्काद्यष्टकविध प्रकलभेदोऽपि दर्शनाचारः ।
बाह्याभ्यन्तरतपसा द्वादशभेदोऽप्यनशनादिः ॥२०॥

स्थानासनगमनादिषु मुनिरनिगूहितपराक्रमो यतते ।
वीर्याचारस्य बलादनेकभेदो विनिर्दिष्टः ॥२१॥

पञ्चमहाव्रतगुप्तित्रयं पञ्चकसमितयो यथाख्याताः ।
चारित्राचारस्य त्रयोदशैते विभागाः स्युः ॥२२॥

द्वाचत्वारिंशु विभ्रमी–दक्ष धारितमतिबलेन ।
चारित्रमहं वन्दे मम दुरितारिप्रणाशाय ॥२३॥

इति चारित्रभक्तिः

# मृत्युमहोत्सवम्

मृत्युमार्गे प्रवृत्तस्य, वीतरागो ददातु मे ।
समाधिबोधौ पाथेयं, यावन्मुक्तिपुरीपुरः ॥१॥

कृमिजालशताकीर्णे, जर्जरे देहपञ्जरे ।
भज्यमाने न भेतव्यं, यतस्त्वं ज्ञानविग्रहः ॥२॥

ज्ञानिन् ! भयं भवेत् कस्मात् प्राप्ते मृत्युमहोत्सवे ।
स्वरूपस्थः पुरं याति, देही देहान्तरस्थितिः ॥३॥

सुदत्तं प्राप्यते यस्मात्, दृश्यते पूर्वसत्तमैः।
भुज्यते स्वर्भवं सौख्यं, मृत्युभीतिः कुतः सताम् ॥४॥

आगर्भाद् दुःखसन्तप्तः, प्रक्षिप्तो देहपञ्जरे ।
नात्मा विमुच्यतेऽन्येन, मृत्युभूमिपतिं विना ॥५॥

सर्वदुःखप्रदं पिण्डं, दूरीकृत्यात्मदर्शिभिः ।
मृत्युमित्रप्रसादेन, प्राप्यन्ते सुखसम्पदः ॥६॥

मृत्युकल्पद्रुमे प्राप्ते, येनात्मार्थो न साधितः ।
निमग्नो जन्मजम्बाले, स पश्चात् किं करिष्यति॥७॥

जीर्णं देहादिकं सर्वं, नूतनं जायते यतः ।
स मृत्युः किं न मोदाय, सतां सातोत्थितिर्यथा ॥८॥

सुखं दुःखं सदा वेत्ति, देहस्थश्च स्वयं व्रजेत् ।
मृत्युभीतिस्तदा कस्य, जायते परमार्थतः ॥९॥

संसारासक्तचित्तानां, मृत्युर्भीत्यै भवेन्नृणाम् ।
मोदायते पुनः सोऽपि, ज्ञानवैराग्यवासिनाम् ॥१०॥

पुराधीशो यदा याति, सुकृतस्य बुभुत्सया ।
तदाऽसौ वार्यते केन, प्रपञ्चैः पाञ्चभौतिकैः ॥११॥

मृत्युकाले सतां दुःखं, यद्भवेद्व्याधिसम्भवम् ।
देहमोहविनाशाय, मन्ये शिवसुखाय च ॥१२॥
ज्ञानिनोऽमृतसङ्गाय, मृत्युस्तापकरोऽपि सन् ।
आमकुम्भस्य लोकेऽस्मिन् , भवेत्पाकविधिर्यथा ॥१३॥
यत्फलं प्राप्यते सद्भिर्व्रतायासविडम्बनात् ।
तत्फलं सुखसाध्यं स्यान्मृत्युकाले समाधिना ॥१४॥
अनार्तः शान्तिमान् मर्त्यो न तिर्यग्नाऽपि नारकः ।
धर्मध्यानी पुरो मर्त्योऽनशनी त्वमरेश्वरः ॥१५॥
तप्तस्य तपसश्चाऽपि, पालितस्य व्रतस्य च ।
पठितस्य श्रुतस्याऽपि, फलं मृत्युसमाधिना ॥१६॥
अतिपरिचितेष्ववज्ञा, नवे भवेत् प्रीतिरिति हि जनवादः ।
चिरतरशरीरनाशे, नवतरलाभे च किं भीरुः ॥१७॥
स्वर्गादेत्य पवित्रनिर्मलकुले, संस्मर्यमाणा जनैः,
दत्वा भक्तिविधायिनां बहुविधं, वाञ्छानुरूपं धनं ।
भुक्त्वा भोगमहर्निशं परकृतं, स्थित्वा क्षणं मण्डले,
पात्रावेशविसर्जनामिव मृतिं, सन्तो लभन्ते स्वतः ॥१८॥

इति मृत्युमहोत्सवम्

## संस्तरारोहणनक्षत्रफलम्

अथ प्रणम्य वीरेशमाखण्डलनतक्रमम् ।
निहताशेषकर्माणं ध्वस्तकन्दर्पवारणम् ॥१॥

यातस्य संस्तरं येन क्षपकस्य सुचेतसः ।
नक्षत्रेण यदायुः स्यात्तत्प्रवक्ष्यामि सांप्रतम् ॥२॥
यदा चाश्विनिनक्षत्रे क्षपको लाति संस्तरम् ।
तदा हि स्वातिनक्षत्रे नक्तं कालं करोति सः ॥३॥
भरणीभे प्रगृह्णाति क्षपकः संस्तरं यदि ।
कालं करोति रेवत्यां प्रदोषेऽसौ समाधिना ॥४॥
संस्तरं यदि गृह्णाति कृत्तिकायां विशुद्धधीः ।
उत्तराफाल्गुनिभे च मध्याह्ने मरणं व्रजेत् ॥५॥
क्षपकः संस्तरं लाति रोहिण्यां यदि शुद्धधीः ।
कालं श्रवणनक्षत्रे निशीथे विदधाति सः ॥६॥
मृगादिशिरसा भेन क्षपकः संस्तरं श्रितः ।
पूर्वफाल्गुनिनक्षत्रे ततः कालं करोति सः ॥७॥
आर्द्रायां यदि नक्षत्रे क्षपकः संस्तरं व्रजेत् ।
ततस्तद्दिवसे सोऽयं कालं कुर्यात् समाधिना ॥८॥
अथवा तद्दिने कालं कदाचिन्न क्वचिद्व्रजेत् ।
क्षपकः शुद्धचेतस्कः प्रभाते विदधाति सः ॥९॥
पुनर्वसुनि नक्षत्रे लाति संस्तरकं यदि ।
अपराह्णे ततोऽश्विन्यां क्षपकः कुरुते मृतिम् ॥१०॥
क्षपकः पुष्यनक्षत्रे लाति संस्तरकं यदि ।
मृगादिशिरसा कालं नक्षत्रेण करोत्ययम् ॥११॥

क्षपकोऽश्लेषनक्षत्रे संस्तरकं भजते यदि ।
चित्रयाऽयं ततः कालं विदधाति समाधिना ॥१२॥
यदा मघाख्यनक्षत्रे शैयां प्रतिपद्यते ।
क्षपकस्तद्दिने नूनं कुर्यात्कालं तदा सुधीः ॥१३॥
पूर्वफाल्गुनिनक्षत्रे क्षपकः संस्तरं भजेत् ।
धनिष्ठायां ततः कालं मध्याह्ने विदधाति सः ॥१४॥
उत्तरोपपदायां चेत् फाल्गुन्यां संस्तरं भजेत् ।
ततो मूलेन भेनाऽयं प्रदोषे कुरुते मृतिम् ॥१५॥
क्षपको हस्तनक्षत्रे संस्तरं भजते यदि ।
ततो भरणिनक्षत्रे प्रभाते कुरुते मृतिम् ॥१६॥
लाति चित्राख्यनक्षत्रे क्षपकः संस्तरं यदि ।
मृगादिशिरसा भेन निशीथे कुरुते मृतिं ॥१७॥
क्षपकः स्वातिनक्षत्रे वाऽऽदत्ते संस्तरं यदि ।
ततो रेवतिनक्षत्रे प्रभाते भजते मृतिम् ॥१८॥
विशाखाख्येऽथ नक्षत्रे क्षपको लाति संस्तरं ।
दिवसेऽश्लेषनक्षत्रे कुर्यात् कालमयं सुधीः ॥१९॥
अनुराधाख्यनक्षत्रे क्षपकः संस्तरं श्रयेत् ।
ततः पुष्येण संध्यायां कालं कुर्यात् समाधिना ॥२०॥
यदि ज्येष्ठाख्यनक्षत्रे क्षपकः संस्तरं भजेत् ।
पूर्वभाद्रपदाख्येभे दिने कालं करोति सः ॥२१॥

क्षपको मूलनक्षत्रे यदि गृह्णाति संस्तरम् ।
उत्तरादिकभद्रान्ते भे दिनार्धे मृतिं भजेत् ॥२२॥
पूर्वाषाढाख्यनक्षत्रे लाति संस्तरकं यदि ।
क्षपकस्तद्दिने कालं स्वपराह्ने करोति सः ॥२३॥
उत्तराषाढनक्षत्रे यदि गृह्णाति संस्तरम् ।
ततस्तद्दिवसे योगी चापराह्ने मृतिं भजेत् ॥२४॥
यदि श्रवणनक्षत्रे क्षपकः संस्तरं गतः ।
उत्तरादिकभद्रान्ते भे मृतिं तद्दिने व्रजेत् ॥२५॥
धनिष्ठायां च नक्षत्रे यदि गृह्णाति विस्तरम् ।
क्षपकस्तद्दिने कालं करोति स्म समाधिना ॥२६॥
अथवा दैवयोगेन कदाचित् तद्दिने न तम् ।
ततोऽन्यस्मिन् दिने कालं क्षपको विदधात्ययं ॥२७॥
नूनं शतभिषाख्ये तु नक्षत्रे संस्तरं भजेत् ।
यदि योगी धनिष्ठायां कुर्यात् कालं दिनाऽत्यये ॥२८॥
पूर्वभाद्रपदायां च क्षपकः संस्तरं श्रयेत् ।
पुनर्वसुनि नक्षत्रे नक्तं कालं करोत्ययम् ॥२९॥
नक्षत्रे चोत्तराभाद्र–पदायां यदि संस्तरम् ।
क्षपको लाति कालं च तद्दिने विदधाति सः ॥३०॥
रेवत्यां यदि गृह्णाति क्षपकः संस्तरं ततः ।
मघायां कुरुते काल–मध्यासितपरीषहः ॥३१॥

इदं सर्वं परित्यज्य नक्षत्रादिकमादरात् ।
कालानुरूपसंभूतै र्निमित्तैर्बहुधा स्थितैः ॥३२॥
परीक्ष्य पञ्चरत्वानि तथा लिंगनिकादपि ।
क्षपकं संस्तरारूढं कारापयति तं गणी ॥३३॥

इति संस्तरारोहणनक्षत्रफलम्

## दीक्षानक्षत्रफलं प्रवक्ष्यामि

**१ अश्विनिनक्षत्रमध्ये—**

दीक्षां गृहीत्वा महाचार्यो भवति पञ्चकान् दीक्षां दत्वा मिष्टाहारभोजनं च लभते । चतुर्दशवर्षाणि जीवति, द्वयोरप्यप-मृत्युर्भवति ।

**२ भरणिनक्षत्रमध्ये—**

दीक्षां गृहीत्वा तद्गुरोर्मृत्युर्भवति वर्षे स्वयमेव व्रतभ्रष्टो भवति पुनरपि दीक्षां गृहीत्वा द्वाधिकषष्टिवर्षाणि जीवति ।

**३ कृत्तिकानक्षत्रमध्ये**

दीक्षां गृहीत्वा महाचार्यो भवति अष्ट मनुष्यान् तपो ददाति तस्करबुद्धिर्भवति । ६५ वर्षाणि जीवति ।

**४ रोहिणीनक्षत्रे**

तपो गृहीत्वा सुभोजनानवरतं लभते देशान्तरे विहाय व्रतभ्रष्टो भवति पुनरपि दीक्षां गृहीत्वा जीवति वर्षं सप्ततिः (७०)

**५ मृगशिरानक्षत्रे**

दीक्षां गृहीत्वा महाचार्यो भवति शिष्याः अष्टाविंशति भवन्ति

शतमनुष्याधारो भवति। गणधरपदवीं च लभते विंशतिवर्षाणि जीवति।

## ६ आर्द्रानक्षत्रे

दीक्षां गृहीत्वा त्यक्त्वा गुरुकुलं जितेन्द्रियो भवति द्वाधिक षष्टिवर्षाणि जीवति।

## ७ पुनर्वसुनक्षत्रे

दीक्षां गृहीत्वा त्रयस्त्रिंशत् आर्यिकाः दीक्षां ददाति सप्ततिः वर्षाणि जीवति।

## ८ पुष्यनक्षत्रे

तपो गृहीत्वा किंचित् मनुष्याधारी भवति पञ्चमेधावी मनुष्याणां गुरुर्भवति। १०३ वर्षाणि जीवति।

## ९ आश्लेषानक्षत्रे

दीक्षां गृहीत्वा पूर्वं दुःखी पश्चात् सुखी भवति। विदेशगामी गुरुजनं प्रति उदासीनत्वं द्विवारं तपश्छेदं प्राप्य षष्टि वर्षानन्तरं सर्पदंष्टो म्रियते।

## १० मघानक्षत्रे

दीक्षितः प्रशस्ताचारवान् विनीतः षष्टि वर्षाणि जीवति।

## ११ पूर्वाफाल्गुनीनक्षत्रे

दीक्षितः पञ्चदशपुरुषाणां दीक्षादायकः स्वयं व्रतभ्रष्टो भूत्वा पुनः व्रतं स्वीकृत्य भवति वर्षाणि जीवति।

१२ उत्तराफाल्गुनीनक्षत्रे

दीक्षित: आचार्यपदं प्राप्य अशीतिवर्षाणि जीवति मधुराहार: भोजी च भवति ।

१३ हस्तनक्षत्रे

दीक्षित: आचार्यो भवति पंचस्त्रीणां पंचपुरुषाणां च दीक्षागुरुर्भूत्वा शतवर्षाणि जीवति ।

१४ चित्रानक्षत्रे

दीक्षितोऽशीतिवर्षाणि जीवति एकां दीक्षां ददाति ।

१५ स्वातिनक्षत्रे

दीक्षित: षष्टिवर्षाणि जीवति ।

१६ विशाखानक्षत्रे

दीक्षित: पंचदशदिने तपश्च्युत्वा अशीतिवर्षाणि जीवति ।

७१ अनुराधानक्षत्रे

दीक्षित: आचार्यो भवति सप्ततिपुरुषाणां दीक्षागुरुर्भूत्वा नवतिवर्षाणि जीवति मिष्टान्नभोजी भवति ।

१८ ज्येष्ठानक्षत्रे

दीक्षित: एकाकी उग्रतपस्वी षट्पंचाशत्वर्षाणि जीवति।

१९ मूलनक्षत्रे

दीक्षितो मिष्टान्नभोक्ता अपमृत्युतपश्च्युतो भूत्वा नवतिवर्षाणि जीवति ।

## २० पूर्वाषाढ़ानक्षत्रे

दीक्षितः उपसर्गभयसहिष्णुः तपश्च्युत्वा पुनः व्रतं स्वीकृत्य अशीतिवर्षाणि जीवति ।

## २१ उत्तराषाढ़ानक्षत्रे

दीक्षितस्तपश्च्युत्वा अतिरोगोत्पादकदशापमृत्युच्युतो भूत्वा स्त्रीद्वयं पुरुषपंचकं च दीक्षां दत्वा षष्टि वर्षाणि जीवति ।

## २२ श्रवणनक्षत्रे

दीक्षितो द्वादश पुरुषाणां दीक्षागुरुः मिष्टान्नभोक्ता विंशति उत्तराशतवर्षाणि जीवति ।

## २३ धनिष्ठानक्षत्रे

दीक्षितः आचार्यो भवति, अशीतिवर्षाणि जीवति ।

## २४ शतभिखानक्षत्रे

दीक्षितः पंचपुरुषाणां दीक्षागुरुः भवति सप्ततिवर्षाणि जीवति ।

## २५ पूर्वाभाद्रपदनक्षत्रे

दीक्षितो द्वादशपुरुषाणां दीक्षागुरुर्भवति अशीतिवर्षाणि जीवति ।

## २६ उत्तराभाद्रपदनक्षत्रे

दीक्षितः मिष्टान्नभोजी भवति द्वादशपुरुषाणां आर्यिकाणां च गुरुः भूत्वा अशीतिवर्षाणि जीवति ।

## २७ रेवतीनक्षत्रे

दीक्षितो मिष्टान्नभोजी भवति । आचार्यो भूत्वा विंशति-वर्षाणि जीवति ।

# अथ दीक्षानक्षत्राणि

प्रणम्य शिरसा वीरं जिनेन्द्रममलव्रतम् ।
दीक्षा ऋक्षाणि वक्ष्यन्ते सतां शुभफलाप्तये ।।१।।
भरण्युत्तरफाल्गुन्यौ मघाचित्राविशाखिका ।
पूर्वाभाद्रपदा भानि रेवती मुनिदीक्षणे ।।२।।
रोहिणी चोत्तराषाढा उत्तराभाद्रपत्तथा ।
स्वातिः कृतिकया सार्धं वर्ज्यते मुनिदीक्षणे ।।३।।
अश्विनीपूर्वफाल्गुन्यौ [illegible]पुनर्वसु[illegible]विशाखिकाः ।
मूलं तथोत्तराषाढा श्रवणः शतभिषक् तथा ।।४।।
उत्तराभाद्रपच्चाऽपि दशेति विशदाशयाः ।
आर्यिकाणां व्रते योग्यान्युशन्ति शुभहेतवः ।।५।।
भरण्यां कृतिकायां च पुष्ये श्लेषार्द्रयोस्तथा ।
पुनर्वसौ च नो दद्युरार्यिका व्रतमुत्तमाः ।।६।।
पूर्वाभाद्रपदा मूलं धनिष्ठा च विशाखिका ।
श्रवणश्चैषु दीक्ष्यन्ते क्षुल्लकाः शल्यवर्जिताः ।।७।।

इति दीक्षानक्षत्राणि

# अथ गुरुस्तोत्रम्

शरीरं सुरूपं सदा रोगमुक्तम् ।
यशश्चारुचित्रं धनं मेरुतुल्यम् ।।

गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नम् ।
ततः किं ततः किं ततः किं ततः किम् ॥१॥

कलत्रं धनं पुत्रपौत्रादि सर्वम् ।
गृहं बान्धवाः सर्वमेतद्धि भूयात् ॥
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नम् ।
ततः किं ततः किं ततः किं ततः किम् ॥२॥

विदेशेषु मान्यः स्वदेशेषु धन्यः ।
सदाचारवृत्तेषु सक्तस्तथाऽपि ॥
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नम् ।
ततः किं ततः किं ततः किं ततः किम् ॥३॥

क्षमामण्डलेऽशेषभूपालवृन्दैः ।
सदा सेवितं यस्य पादारविन्दम् ॥
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नम् ।
ततः किं ततः किं ततः किं ततः किम् ॥४॥

यशश्चेद् गतं दिक्षु दानप्रतापात् ।
जगद्वस्तु सर्वं करे यत्प्रसादात् ॥
गुरोरङ्घ्रिपद्मे मनश्चेन्न लग्नम् ।
ततः किं ततः किं ततः किं ततः किम् ॥५॥

सन्तु ते गुरवो नित्यं ये संसारसरित्पतौ ।
रत्नत्रयमहादानात् स्वपरेषां च तारकाः ॥६॥

स जयति गुरुर्गरीयान्, यस्यामलवचनरश्मिभि र्झगिति ।
नश्यति तन्मोहतमो यदविषयं दिनकरादीनाम् ॥७॥

गुरुस्तोत्रकं यः पठेत् पुण्यदेही ।
यतिर्भूपतिर्ब्रह्मचारी च गेही ॥
लभेद् वाञ्छितार्थं पदं ब्रह्मरूपम् ।
गुरोरुक्तवाक्ये मनो यस्य लग्नम् ॥८॥

इति गुरुस्तोत्रम्

सिंहनन्दिविरचितम्

## मङ्गलाष्टकम्

यद्गर्भावतारपूर्वं नितरां मातुर्गृहप्राङ्गणे ।
षण्मासावधिरत्नकाञ्चनमयं, जातं शुभं वर्षणम् ॥
सर्वप्राणिसुखाब्धिसङ्गमकरं मासान् नवान् तु ध्रुवम् ।
भव्याम्भोरुहभानवो जिनवराः कुर्वन्तु नो मङ्गलम् ॥१॥

यज्जन्माभिषवं सुरेन्द्रनिकरा भक्त्युत्कटाः सादरं ।
मेरौ क्षीरमहार्णवस्य सलिलैः सम्पूर्णहेम्नो घटैः ॥
नानानृत्यविचित्रवाद्यनिचयैः सन्मङ्गलैः सम्भृतम् ।
चक्रुस्ते जिनपुङ्गवाः शुचितराः कुर्वन्तु नो मङ्गलम् ॥२॥

श्रीचन्द्रप्रभपुष्पदन्तजिनपौ श्वेतौ च रक्तोत्तरौ ।
श्रीपद्मप्रभवासुपूज्य सुजिनौ कृष्णप्रभाभास्वरौ ॥
श्रीमत्सुव्रतनेमिकौ च हरितौ श्रीपार्श्वमल्लप्रभौ ।
शान्ये षोडश काञ्चनद्युतिभराः कुर्वन्तु नो मङ्गलम् ॥३॥

ये देवेन्द्रप्रवन्दिता नतिकरै र्नागेन्द्रसत्खेचरैः ।
ये पूज्या इह चैव संयमधरा जाता विहायः स्थिराः ॥
यैः कामप्रगजेन्द्रदुर्जयघटा ज्ञानाङ्कुशै र्निर्जिता ।
ते रत्नत्रयमण्डिता जिनवराः कुर्वन्तु नो मङ्गलम् ॥४॥

सद्ध्यानाग्निविदग्धघातिकमहा-कर्मेन्धनाः श्रीजिनाः ।
सम्यक् केवलबोधलोचनधराः सत्प्रातिहार्यैर्युताः ॥
श्रीपादाम्बुजभक्तिरिर्धतविलसत्सर्वेन्द्रमौलिप्रभाः ।
ते संसारसमुद्रतारणपराः कुर्वन्तु नो मङ्गलम् ॥५॥

सद्धर्मामृतपूरतर्जितजगत्-पापप्रतापोत्कराः ।
भव्यप्राणिवितीर्णनिर्मलमहा स्वर्गापवर्गश्रियः ॥
त्यक्त्वाऽशेषनिबन्धनानि नितरां प्राप्ताः श्रियं शाश्वतीम् ।
ते श्रीतीर्थकराः प्रनष्टविधुराः कुर्वन्तु नो मङ्गलम् ॥६॥

निर्दग्धाष्टकठोरकर्मनिकराः सिद्धाः प्रसिद्धिं गताः ।
सर्वक्लेशविनाशशर्मनिलयाः प्रव्यक्तसच्चेतनाः ॥
पञ्चाचारविचित्ररत्ननिचयाः संज्ञानलक्ष्मीयुताः ।
सर्वे सूरिवराः सुमार्गचतुराः कुर्वन्तु नो मङ्गलम् ॥७॥

मिथ्यावादकरीन्द्रयूथदमने निर्दोषकण्ठीरवाः ।
चञ्चच्चारुधियो विशोधनपराः सर्वेऽपि ते पाठकाः ॥
सम्यग्दर्शनसाधुबोधविलसच्चारित्र चेतोहराः ।
सर्वे प्राणिहिताश्च साधुनिकराः कुर्वन्तु नो मङ्गलम् ॥८॥

इत्थं श्रीजिनमङ्गलाष्टकमिदं श्रीमूलसङ्घेऽनघे ।
विद्वद्भिरपिसिंहनन्दिमुनिभि र्भक्त्या सदा भाषितम् ॥
नित्यं ये च पठन्ति निर्मलधियः संप्राप्य सत्सम्पदाम् ।
सौख्यं शाश्वतं भजन्ति नितरां श्रीनेमिदत्तस्तुतम् ॥९॥

इति मङ्गलाष्टकम्

## श्रीमद्भट्टाकलङ्कदेवविरचितं स्वरूपसम्बोधनम्

मुक्तामुक्तैकरूपो यः, कर्मभिः संविदादिना ।
अक्षयं परमात्मानं, ज्ञानमूर्तिं नमामि तम् ॥१॥
सोऽस्त्यात्मा सोपयोगोऽयं, क्रमाद्धेतुफलावहः ।
यो ग्राह्योऽग्राह्यनाद्यन्तः, स्थित्युत्पत्तिव्ययात्मकः ॥२॥
प्रमेयत्वादिभिर्धर्मैरचिदात्मा चिदात्मकः ।
ज्ञानदर्शनतस्तस्माच्चेतनाचेतनात्मकः ॥३॥
ज्ञानाद्भिन्नो न चाभिन्नो, भिन्नाभिन्नः कथञ्चन ।
ज्ञानं पूर्वापरीभूतं, सोऽयमात्मेति कीर्तितः ॥४॥
स्वदेहप्रमितश्चायं, ज्ञानमात्रोऽपि नैव सः ।
ततः सर्वगतश्चाऽयं, विश्वव्यापी न सर्वथा ॥५॥
नानाज्ञानस्वभावत्वा-देकोऽनेकोऽपि नैव सः ॥
चेतनैकस्वभावत्वा–देकानेकात्मको भवेत् ॥६॥
नावक्तव्यः स्वरूपाद्यैर्निर्वाच्यः परभावतः ।
तस्मान्नैकान्ततो वाच्यो, नाऽपि वाचामगोचरः ॥७॥

स स्याद्विधिनिषेधात्मा, स्वधर्मपरधर्मयोः ।
समूर्तिर्बोधमूर्तित्वा–दमूर्तिश्च विपर्ययात् ॥८॥

इत्याद्यनेकधर्मत्वं, बन्धमोक्षौ तयोः फलम् ।
आत्मा स्वीकुरुते तत्तत्कारणैः स्वयमेव तु ॥९॥

कर्त्ता यः कर्मणां भोक्ता, तत्फलानां स एव तु ।
बहिरन्तरुपायाभ्यां, तेषां मुक्तत्वमेव हि ॥१०॥

सद्दृष्टिज्ञानचारित्रमुपायः स्वात्मलब्धये ।
तत्त्वे याथात्म्यसंस्थित्य–मात्मनो दर्शनं मतम् ॥११॥

यथावद् वस्तुनिर्णीतिः, सम्यग्ज्ञानं प्रदीपवत् ।
तत्स्वार्थव्यवसायात्मा, कथञ्चित् प्रमितेः पृथक् ॥१२॥

दर्शनज्ञानपर्याये–ष्वुत्तरोत्तरभाविषु ।
स्थिरमालम्बनं यद्वा, माध्यस्थ्यं सुखदुःखयोः ॥१३॥

ज्ञाता द्रष्टाऽहमेकोऽहं, सुखे दुःखे न चापरः ।
इतीदं भावनादार्ढ्यं, चारित्रमथवा परम् ॥१४॥

तदेतन्मूलहेतोः स्यात् कारणं सहकारकम् ।
यद्बाह्यं देशकालादि, तपश्च बहिरङ्गकम् ॥१५॥

इतीदं सर्वमालोच्य, सौस्थ्ये दौःस्थ्ये च शक्तितः ।
आत्मानं भावयेन्नित्यं, रागद्वेषविवर्जितम् ॥१६॥

कषायैरञ्जितं चेतः, स्तत्त्वं नैवावगाहते ।
नीलीरक्तेऽम्बरे रागो, दुराधेयो हि कौङ्कुमः ॥१७॥

ततस्त्वं दोषनिर्मुक्त्यै, निर्मोहो भव सर्वतः ।
उदासीनत्वमाश्रित्य, तत्त्वचिन्तापरो भव ॥१८॥

हेयोपादेयतत्त्वस्य, स्थितिं विज्ञाय हेयतः ।
निरालम्बो भवान्यस्मा–दुपेये सावलम्बनः ॥१९॥

स्व परं चेति वस्तु त्वं, वस्तुरूपेण भावय ।
उपेक्षाभावनोत्कर्ष–पर्यन्ते शिवमाप्नुहि ॥२०॥

मोक्षेऽपि यस्य नाकाङ्क्षा, स मोक्षमधिगच्छति ।
इत्युक्तत्वाद्धितान्वेषी, काङ्क्षां न क्वापि योजयेत् ॥२१॥

साऽपि च स्वात्मनिष्ठत्वात्, सुलभा यदि चिन्त्यते ।
आत्माधीने सुखे तात,! यत्नं किं न करिष्यसि ॥२२॥

स्वं परं विद्धि तत्राऽपि व्यामोहं छिन्धि किन्त्विमम् ।
अनाकुलस्वसंवेद्ये, स्वरूपे तिष्ठ केवले ॥२३॥

स्वः स्वं स्वेन स्थितं स्वस्मै, स्वस्मात् स्वस्याविनश्वरम् ।
स्वस्मिन् ध्यात्वा लभेत् स्वोत्थ–मानन्दममृतं पदम् ॥२४॥

इति स्वतत्त्वं परिभाव्य वाङ्मयम् ।
य एतदाख्याति शृणोति चादरात् ॥
करोति तस्मै परमार्थसम्पदम् ।
स्वरूपसम्बोधनपञ्चविंशतिः ॥२५॥

इति श्रीमद्भट्टाकलङ्कदेवविरचितं स्वरूपसम्बोधनम् ।

[ श्रीमद् देवनन्द्यपरनाम पूज्यपादाचार्यविरचितः ]

# इष्टोपदेशः

यस्य स्वयं स्वभावाप्ति–रभावे कृत्स्नकर्मणः ।
तस्मै सञ्ज्ञानरूपाय, नमोऽस्तु परमात्मने ॥१॥
योग्योपादानयोगेन, दृषदः स्वर्णता मता ।
द्रव्यादिस्वादिसंपत्तौ, आत्मनोऽप्यात्मता मता ॥२॥
वरं व्रतैः पदं दैवं, नाव्रतैर्वत नारकं ।
छायातपस्थयोर्भेदः, प्रतिपालयतोर्महान् ॥३॥
यत्र भावः शिवं दत्ते, द्यौः कियद् दूरवर्तिनी ।
यो नयत्याशु गव्यूतिं, क्रोशार्द्धे किं स सीदति ॥४॥
हृषीकजमनातङ्कं, दीर्घकालोपलालितम् ।
नाके नाकौकसां सौख्यं, नाके नाकौकसामिव ॥५॥
वासनामात्रमेवैतत् सुखं दुःखं च देहिनां ।
तथाह्युद्वेजयंत्येते, भोगा रोगा इवापदि ॥६॥
मोहेन संवृतं ज्ञानं, स्वभावं लभते न हि ।
मत्तः पुमान् पदार्थानां, यथा मदनकोद्रवैः ॥७॥
वपुर्गृहं धनं दाराः, पुत्रा मित्राणि शत्रवः ।
सर्वथान्यस्वभावानि, मूढः स्वानि प्रपद्यते ॥८॥
दिग्देशेभ्यः खगा एत्य, संवसन्ति नगे नगे ।
स्वस्वकार्यवशाद् यान्ति, देशे दिक्षु प्रगे प्रगे ॥९॥

विराधकः कथं हन्त्रे, जनाय परिकुप्यति ।
त्र्यङ्गुलं पातयन् पद्भ्यां, स्वयं दण्डेन पात्यते ॥१०॥
रागद्वेषद्वयीदीर्घ-नेत्राकर्षणकर्मणा ।
अज्ञानात् सुचिरं जीवः, संसाराब्धौ भ्रमत्यसौ ॥११॥
विपद्भवपदावर्ते, पदिके वातिवाह्यते ।
यावत्तावद्भवन्त्यन्याः, प्रचुरा विपदः पुरः ॥१२॥
दुरर्ज्येनासुरक्षेण, नश्वरेण धनादिना ।
स्वस्थं मन्यो जनः कोऽपि, ज्वरवानिव सर्पिषा ॥१३॥
विपत्तिमात्मनो मूढः, परेषामिव नेक्षते ।
दह्यमानमृगाकीर्णं, वनान्तरतरुस्थवत् ॥१४॥
आयुर्वृद्धिक्षयोत्कर्ष,-हेतुं कालस्य निर्गमम् ।
वाञ्छतां धनिनामिष्टं, जीवितात् सुतरां धनं ॥१५॥
त्यागाय श्रेयसे वित्त-मवित्तः सञ्चिनोति यः ।
स्वशरीरं स पङ्केन, स्नास्यामीति विलिम्पति ॥१६॥
आरम्भे तापकान् प्राप्तौ अतृप्तिप्रतिपादकान् ।
अन्ते सुदुस्त्यजान् कामान् , कामं कः सेवते सुधीः ॥१७॥
भवन्ति प्राप्य यत्सङ्ग-मशुचीनि शुचीन्यपि ।
स कायः संततापायः, तदर्थं प्रार्थना वृथा ॥१८॥
यज्जीवस्योपकाराय, तद्देहस्यापकारकं ।
यद्देहस्योपकाराय, तज्जीवस्यापकारकं ॥१९॥

इतश्चिन्तामणिर्दिव्य, इतः पिण्याकखण्डकं ।
ध्यानेन चेदुभे लभ्ये, क्वाद्रियन्तां विवेकिनः ।।२०।।
स्वसंवेदनसुव्यक्तः, तनुमात्रो निरत्ययः ।
अत्यन्तसौख्यवानात्मा, लोकालोकविलोकनः ।।२१।।
संयम्य करणग्रामं एकाग्रत्वेन चेतसः ।
आत्मानमात्मवान् ध्यायेद्आत्मनैवात्मनि स्थितम् ।।२२।।
अज्ञानोपास्तिरज्ञानं, ज्ञानं ज्ञानिसमाश्रयः ।
ददाति यत्तु यस्याऽस्ति, सुप्रसिद्धमिदं वचः ।।२३।।
परीषहाद्यविज्ञाना–दास्रवस्य निरोधिनी ।
जायतेऽध्यात्मयोगेन, कर्मणामाशु निर्जरा ।।२४।।
कटस्य कर्ताहमिति, सम्बन्धः स्याद् द्वयोर्द्वयोः ।
ध्यानं ध्येयं यदात्मैव, सम्बन्धः कीदृशस्तदा ।।२५।।
बध्यते मुच्यते जीवः, सममो निर्ममः क्रमात् ।
तस्मात् सर्वप्रयत्नेन, निर्ममत्वं विचिन्तयेत् ।।२६।।
एकोऽहं निर्ममः शुद्धो, ज्ञानी योगीन्द्रगोचरः ।
बाह्याः संयोगजा भावा, मत्तः सर्वेऽपि सर्वथा ।।२७।।
दुःखसन्दोहभागित्वं, संयोगादिह देहिनां ।
त्यजाम्येनं ततः सर्वं, मनोवाक्कायकर्मभिः ।।२८।।
न मे मृत्युः कुतो भीतिः न मे व्याधिः कुतो व्यथा ।
नाहं बालो न वृद्धोऽहं, न युवैतानि पुद्गले ।।२९।।

भुक्तोज्झिता मुहुर्मोहान् मया सर्वेऽपि पुद्गलाः ।
उच्छिष्टे-ष्विवतेष्वद्य, मम विज्ञस्य का स्पृहा ॥३०॥
कर्म कर्महिताबन्धि, जीवो जीवहितस्पृहः ।
स्वस्वप्रभावभूयस्त्वे, स्वार्थं को वा न वाञ्छति ॥३१॥
परोपकृतिमुत्सृज्य, स्वोपकारपरो भव ।
उपकुर्वन् परस्याज्ञो, दृश्यमानस्य लोकवत् ॥३२॥
गुरूपदेशादभ्यासात् संवित्तेः स्वपरान्तरं ।
जानाति यः स जानाति, मोक्षसौख्यं निरन्तरम् ॥३३॥
स्वस्मिन् सदाभिलाषित्वा-दभीष्टज्ञापकत्वतः ।
स्वयं हितप्रयोक्तृत्वा-दात्मैव गुरुरात्मनः ॥३४॥
नाज्ञो विज्ञत्वमायाति, विज्ञो नाज्ञत्वमृच्छति ।
निमित्तमात्रमन्यस्तु, गतेर्धर्मास्तिकायवत् ॥३५॥
अभवच्चित्तविक्षेप, एकान्ते तत्त्वसंस्थितिः ।
अभ्यस्येदभियोगेन, योगी तत्त्वं निजात्मनः ॥३६॥
यथा यथा समायाति, संवित्तौ तत्त्वमुत्तमम् ।
तथा तथा न रोचन्ते, विषयाः सुलभा अपि ॥३७॥
यथा यथा न रोचन्ते, विषयाः सुलभा अपि ।
तथा तथा समायाति, संवित्तौ तत्त्वमुत्तमम् ॥३८॥
निशामयति निःशेष-मिन्द्रजालोपमं जगत् ।
स्पृहयत्यात्मलाभाय, गत्वान्यत्रानुतप्यते ॥३९॥

इच्छत्येकान्तसंवासं, निर्जनं जनितादरः ।
निजकार्यवशात् किञ्चिदुक्त्वा विस्मरति द्रुतं ॥४०॥
ब्रुवन्नपि हि न ब्रूते, गच्छन्नपि न गच्छति
स्थिरीकृतात्मतत्त्वस्तु, पश्यन्नपि न पश्यति ॥४१॥
किमिदं कीदृशं कस्य, कस्मात् क्वेत्यविशेषयन् ।
स्वदेहमपि नावैति, योगी योगपरायणः ॥४२॥
यो यत्र निवसन्नास्ते, स तत्र कुरुते रतिं ।
यो यत्र रमते तस्मा–दन्यत्र स न गच्छति ॥४३॥
आगच्छंस्तद्विशेषाणा–मनभिज्ञश्च जायते ।
अज्ञाततद्विशेषस्तु, बद्ध्यते न विमुच्यते ॥४४॥

परः परस्ततो दुःख–मात्मैवात्मा ततः सुखं ।
अत एव महात्मानः तन्निमित्तं कृतोद्यमाः ॥४५॥

अविद्वान् पुद्गलद्रव्यं, योऽभिनन्दति तस्य तत् ।
न जातु जन्तोः सामीप्यं, चतुर्गतिषु मुञ्चति ॥४६॥

आत्मानुष्ठाननिष्ठस्य, व्यवहारबहिःस्थितेः ।
जायते परमानन्दः, कश्चिद्योगेन योगिनः ॥४७॥

आनन्दो निर्दहत्युद्धं, कर्मेन्धनमनारतं ।
न चासौ खिद्यते योगी, बहिर्दुःखेष्वचेतनः ॥४८॥

अविद्याभिदुरं ज्योतिः, परं ज्ञानमयं महत् ।
तत्प्रष्टव्यं तदेष्टव्यं, तद्द्रष्टव्यं मुमुक्षुभिः ॥४९॥

जीवोऽन्यः पुद्गलश्चान्य, इत्यसौ तत्त्वसंग्रहः ।
यदन्यदुच्यते किञ्चित्, सोऽस्तु तस्यैव विस्तरः ॥५०॥
इष्टोपदेशमिति सम्यगधीत्य धीमान् ।
मानापमानसमतां स्वमताद् वितन्य ॥
मुक्ताग्रहो विनिवसन् सजने वने वा ।
मुक्तिश्रियं निरुपमामुपयाति भव्यः ॥५१॥

इति इष्टोपदेशः समाप्तः

श्रीदेवनन्द्यपरनाम पूज्यपादाचार्यविरचितम्

# समाधिशतकं अपरनाम समाधितन्त्रम्

येनात्माऽबुद्धयतात्मैव, परत्वेनैव चापरम् ।
अक्षयानन्तबोधाय, तस्मै सिद्धात्मने नमः ॥१॥

जयन्ति यस्यावदतोऽपि भारती ।
विभूतयस्तीर्थकृतोऽप्यनीहितुः ॥
शिवाय धात्रे सुगताय विष्णवे ।
जिनाय तस्मै सकलात्मने नमः ॥२॥

श्रुतेन लिङ्गेन यथात्मशक्ति ।
समाहितान्तःकरणेन सम्यक् ॥
समीक्ष्य कैवल्यसुखस्पृहाणां ।
विविक्तमात्मानमथाभिधास्ये ॥३॥

बहिरन्तःपरश्चेति, त्रिधात्मा सर्वदेहिषु ।
उपेयात्तत्र परमं, मध्योपायाद् बहिस्त्यजेत् ॥४॥

बहिरात्मा शरीरादौ जातात्मभ्रान्तिरान्तरः ।
चित्तदोषात्मविभ्रान्तिः परमात्माऽतिनिर्मलः ॥५॥

निर्मलः केवलः शुद्धो, विविक्तः प्रभुरव्ययः ।
परमेष्ठी परात्मेति, परमात्मेश्वरो जिनः ॥६॥

बहिरात्मेन्द्रियद्वारै—रात्मज्ञानपराङ्मुखः ।
स्फुरितं स्वात्मनो देह—मात्मत्वेनाध्यवस्यति ॥७॥

नरदेहस्थमात्मान—मविद्वान् मन्यते नरम् ।
तिर्यञ्चं तिर्यगङ्गस्थं, सुराङ्गस्थं सुरं तथा ॥८॥

नारकं नारकाङ्गस्थं, न स्वयं तत्त्वतस्तथा ।
अनन्तानन्तधीशक्तिः, स्वसंवेद्योऽचलस्थितिः ॥९॥

स्वदेहसदृशं, दृष्ट्वा, परदेहमचेतनम् ।
परात्माधिष्ठितं मूढः, परत्वेनाध्यवस्यति ॥१०॥

स्वपराध्यवसायेन, देहेष्वविदितात्मनाम् ।
वर्तते विभ्रमः पुंसां, पुत्रभार्यादिगोचरः ॥११॥

अविद्यासंज्ञितस्तस्मात्, संस्कारो जायते दृढः ।
येन लोकोऽङ्गमेव स्वं, पुनरप्यभिमन्यते ॥१२॥

देहे स्वबुद्धिरात्मानं, युनक्त्येतेन निश्चयात् ।
स्वात्मन्येवात्मधीस्तस्मात्, वियोजयति देहिनं ॥१३॥

देहेष्वात्मधिया जाताः, पुत्रभार्यादिकल्पनाः ।
सम्पत्तिमात्मनस्ताभि-र्मन्यते हा ! हतं जगत् ॥१४॥

मूलं संसारदुःखस्य, देह एवात्मधीस्ततः ।
त्यक्त्वैनां प्रविशेदन्त-र्बहिरव्यापृतेन्द्रियः ॥१५॥

मत्तश्च्युत्वेन्द्रियद्वारैः, पतितो विषयेष्वहम् ।
तान् प्रपद्याऽहमिति मां, पुरा वेद न तत्त्वतः ॥१६॥

एवं त्यक्त्वा बहिर्वाचं, त्यजेदन्तरशेषतः ।
एष योगः समासेन, प्रदीपः परमात्मनः ॥१७॥

यन्मया दृश्यते रूप, तन्न जानाति सर्वथा ।
जानन्न दृश्यते रूपं, ततः केन ब्रवीम्यहम् ॥१८॥

यत्परैः प्रतिपाद्योऽहं, यत्परान् प्रतिपादये ।
उन्मत्तचेष्टितं तन्मे, यदहं निर्विकल्पकः ॥१९॥

यदग्राह्य न गृह्णाति, गृहीतं नाऽपि मुञ्चति ।
जानाति सर्वथा सर्वं, तत्स्वसंवेद्यमस्म्यहम् ॥२०॥

उत्पन्नपुरुषभ्रान्तेः, स्थाणौ यद्वद्विचेष्टितम् ।
तद्वन्मे चेष्टितं पूर्वं, देहादिष्वात्मविभ्रमात् ॥२१॥

यथाऽसौ चेष्टते स्थाणौ, निवृत्ते पुरुषाग्रहे ।
तथा चेष्टोऽस्मि देहादौ, विनिवृत्तात्मविभ्रमः ॥२२॥

येनात्मनाऽनुभूयेऽह-मात्मनैवात्मनात्मनि ।
सोऽहं न तन्न सा नासौ, नैको न द्वौ न वा बहुः ॥२३॥

यदभावे सुषुप्तोऽहं, यद्भावे व्युत्थितः पुनः ।
अतीन्द्रियमनिर्देश्यं, तत्स्वसंवेद्यमस्म्यहम् ॥२४॥

क्षीयन्तेऽत्रैव रागाद्याः, तत्त्वतो मां प्रपश्यतः ।
बोधात्मानं ततः कश्चिन्न मे शत्रुर्न च प्रियः ॥२५॥

मामपश्यन्नयं लोको, न मे शत्रुर्न च प्रियः ।
मां प्रपश्यन्नयं लोको, न मे शत्रुर्न च प्रियः ॥२६॥

त्यक्त्वैवं बहिरात्मान-मन्तरात्मव्यवस्थितः ।
भावयेत् परमात्मानं, सर्वसङ्कल्पवर्जितम् ॥२७॥

सोऽहमित्यात्तसंस्कारः तस्मिन् भावनया पुनः ।
तत्रैव दृढसंस्कारात् लभते, ह्यात्मनि स्थितिम् ॥२८॥

मूढात्मा यत्र विश्वस्तः, ततो नान्य-द्भयास्पदम् ।
यतो भीतस्ततो नान्य-दभयस्थानमात्मनः ॥२९॥

सर्वेन्द्रियाणि संयम्य, स्तिमितेनान्तरात्मना ।
यत्क्षणं पश्यतो भाति, तत्तत्त्वं परमात्मनः ॥३०॥

यः परात्मा स एवाऽहं, योऽहं स परमस्ततः ।
अहमेव मयोपास्यो, नान्यः कश्चिदिति स्थितिः ॥३१॥

प्रच्याव्य विषयेभ्योऽहं, मां मयैव मयि स्थितम् ।
बोधात्मानं प्रपन्नोऽस्मि, परमानन्दनिर्वृतम् ॥३२॥

यो न वेत्ति परं देहा-देवमात्मानमव्ययम् ।
लभते स न निर्वाणं, तप्त्वाऽपि परमं तपः ॥३३॥

आत्मदेहान्तरज्ञान,-जनिताह्लादनिर्वृतः ।
तपसा दुष्कृतं घोरं, भुञ्जानोऽपि न खिद्यते ॥३४॥

रागद्वेषादिकल्लोलै-रलोलं यन्मनो जलम् ।
स पश्यत्यात्मनस्तत्त्वं, तत्तत्त्वं नेतरो जनः ॥३५॥
अविक्षिप्तं मनस्तत्त्वं, विक्षिप्तं भ्रान्तिरात्मनः ।
धारयेत् तदविक्षिप्तं, विक्षिप्तं नाश्रयेत्ततः ॥३६॥
अविद्याभ्याससंस्कारै-रवशं क्षिप्यते मनः ।
तदेव ज्ञानसंस्कारैः, स्वतस्तत्त्वेऽवतिष्ठते ॥३७॥
अपमानादयस्तस्य, विक्षेपो यस्य चेतसः ।
नापमानादयस्तस्य, न क्षेपो यस्य चेतसः ॥३८॥
यदा मोहात् प्रजायेते, रागद्वेषौ तपस्विनः ।
तदैव भावयेत् स्वस्थ-मात्मानं शाम्यतः क्षणात् ॥३९॥
यत्र काये मुनेः प्रेम, ततः प्रच्याव्य देहिनम् ।
बुद्ध्या तदुत्तमे काये, योजयेत् प्रेम नश्यति ॥४०॥
आत्मविभ्रमजं दुःख-मात्मज्ञानात् प्रशाम्यति ।
नायतास्तत्र निर्वान्ति, कृत्वाऽपि परमं तपः ॥४१॥
शुभं शरीरं दिव्यांश्च, विषयानभिवाञ्छति ।
उत्पन्नात्ममतिर्देहे, तत्त्वज्ञानी ततश्च्युतिम् ॥४२॥
परत्राहम्मतिः स्वस्मात् च्युतो बध्नात्यसंशयम् ।
स्वस्मिन्नहम्मतिश्च्युत्वा, परस्मान्मुच्यते बुधः ॥४३॥
दृश्यमानमिदं मूढः त्रिलिङ्गमवबुध्यते ।
इदमित्यवबुद्धस्तु, निष्पन्नं शब्दवर्जितम् ॥४४॥

ज्ञानन्नप्यात्मनस्तत्त्वं, विविक्तं भावयन्नपि ।
पूर्वविभ्रमसंस्काराद्, भ्रान्तिं भूयोऽपि गच्छति ॥४५॥

अचेतनमिदं दृश्य–मदृश्यं चेतनं ततः ।
क्व रुष्यामि क्व तुष्यामि, मध्यस्थोऽहं भवाम्यतः ॥४६॥

त्यागादाने बहिर्मूढः, करोत्यध्यात्ममात्मवित् ।
नान्तर्बहिरुपादानं, न त्यागो निष्ठितात्मनः ॥४७॥

युञ्जीत मनसाऽऽत्मानं, वाक्कायाभ्यां वियोजयेत् ।
मनसा व्यवहारं तु, त्यजेद् वाक्काययोजितम् ॥४८॥

जगद्देहात्मदृष्टीनां, विश्वास्यं रम्यमेव च ।
स्वात्मन्येवात्मदृष्टीनां, क्व विश्वासः क्व वा रतिः ॥४९॥

आत्मज्ञानात् परं कार्यं, न बुद्धौ धारयेच्चिरम् ।
कुर्यादर्थवशात् किञ्चिद्, वाक्कायाभ्यामतत्परः ॥५०॥

यत्पश्यामीन्द्रियैस्तन्मे, नास्ति यन्नियतेन्द्रियः ।
अन्तः पश्यामि सानन्दं, तदस्तु ज्योतिरुत्तमम् ॥५१॥

सुखमारब्धयोगस्य, बहिर्दुःखमथात्मनि ।
बहिरेवासुखं सौख्य–मध्यात्मं भावितात्मनः ॥५२॥

तद्ब्रूयात् तत्परान् पृच्छेत्, तदिच्छेत् तत्परो भवेत् ।
येनाऽविद्यामयं रूपं, त्यक्त्वा विद्यामयं व्रजेत् ॥५३॥

शरीरे वाचि चात्मानं, सन्धत्ते वाक्शरीरयोः ।
भ्रान्तोऽभ्रान्तः पुनस्तत्त्वं, पृथगेषां निबुध्यते ॥५४॥

न तदस्तीन्द्रियार्थेषु, यत्क्षेमङ्करमात्मनः ।
तथाऽपि रमते बाल, स्तत्रैवाज्ञानभावनात् ॥५५॥

चिरं सुषुप्तास्तमसि, मूढात्मानः कुयोनिषु ।
अनात्मीयात्मभूतेषु, ममाहमिति जाग्रति ॥५६॥

पश्येन्निरन्तरं देह–मात्मनोऽनात्मचेतसा ।
अपरात्मधियाऽन्येषा–मात्मतत्त्वे व्यवस्थितः ॥५७॥

अज्ञापितं न जानन्ति, यथा मां ज्ञापितं तथा ।
मूढात्मानस्ततस्तेषां, वृथा मे ज्ञापनश्रमः ॥५८॥

यद् बोधयितुमिच्छामि, तन्नाहं यदहं पुनः ।
ग्राह्यं तदपि नान्यस्य, तत्किमन्यस्य बोधये ॥५९॥

बहिस्तुष्यति मूढात्मा, पिहितज्योतिरन्तरे ।
तुष्यत्यन्तः प्रबुद्धात्मा, बहिर्व्यावृत्तकौतुकः ॥६०॥

न जानन्ति शरीराणि, सुखदुःखान्यबुद्धयः ।
निग्रहानुग्रहधियं, तथाप्यत्रैव कुर्वते ॥ ६१ ॥

स्वबुद्ध्या यावद् गृह्णीयात्, कायवाक्चेतसां त्रयम् ।
संसारस्तावदेतेषां, भेदाभ्यासे तु निर्वृतिः ॥६२॥

घने वस्त्रे यथाऽऽत्मानं, न घनं मन्यते तथा ।
घने स्वदेहेऽप्यात्मानं, न घनं मन्यते बुधः ॥६३॥

जीर्णे वस्त्रे यथाऽऽत्मानं, न जीर्णं मन्यते तथा ।
जीर्णे स्वदेहेऽप्यात्मानं, न जीर्णं मन्यते बुधः ॥६४॥

नष्टे वस्त्रे यथाऽत्मानं, न नष्टं मन्यते तथा ।
नष्टे स्वदेहेऽप्यात्मानं, न नष्टं मन्यते बुधः ॥६५॥

रक्ते वस्त्रे यथात्मानं, न रक्तं मन्यते तथा ।
रक्ते स्वदेहेऽप्यात्मानं, न रक्तं मन्यते बुधः ॥६६॥

यस्य सस्पन्दमाभाति, निःस्पन्देन समं जगत् ।
अप्रज्ञमक्रियाभोगं, स शमं याति नेतरः ॥६७॥

शरीरकञ्चुकेनात्मा, संवृतज्ञानविग्रहः ।
नात्मानं बुध्यते तस्माद्, भ्रमत्यतिचिरं भवे ॥६८॥

प्रविशद्गलतां व्यूहे देहेऽणूनां समाकृतौ ।
स्थितिभ्रान्त्या प्रपद्यन्ते, तमात्मानमबुद्धयः ॥६९॥

गौरः स्थूलः कृशो वाऽह-मित्यङ्गेनाविशेषयन् ।
आत्मानं धारयेन् नित्यं, केवलं ज्ञप्तिविग्रहम् ॥७०॥

मुक्तिरेकान्तिकी तस्य, चित्ते यस्याचला धृतिः ।
तस्य नैकान्तिकी मुक्तिर्यस्य नास्त्यचला धृतिः ॥७१॥

जनेभ्यो वाक् ततः स्पन्दो, मनसश्चित्तविभ्रमाः ।
भवन्ति तस्मात् संसर्गं, जनैर्योगी ततस्त्यजेत् ॥ ७२॥

ग्रामोऽरण्यमिति द्वेधा, निवासोऽनात्मदर्शिनाम् ।
दृष्टात्मनां निवासस्तु, विविक्तात्मैव निश्चलः ॥७३॥

देहान्तरगतेर्बीजं, देहेऽस्मिन्नात्मभावना ।
बीजं विदेहनिष्पत्ते-रात्मन्येवात्मभावना ॥७४॥

नयत्यात्मानमात्मैव, जन्म निर्वाणमेव च ।
गुरुरात्मात्मनस्तस्मान्, नान्योऽस्ति परमार्थतः ॥७५॥

दृढात्मबुद्धिर्देहादौ उत्पश्यन्नाशमात्मनः ।
मित्रादिभिर्वियोगं च, बिभेति मरणाद् भृशम् ॥७६॥

आत्मन्येवात्मधीरन्यां, शरीरगतिमात्मनः ।
मन्यते निर्भयं त्यक्त्वा, वस्त्रं वस्त्रान्तरग्रहम् ॥७७॥

व्यवहारे सुषुप्तो यः, स जागर्त्यात्मगोचरे ।
जागर्ति व्यवहारेऽस्मिन्, सुषुप्तश्चात्मगोचरे ॥७८॥

आत्मानमन्तरे दृष्ट्वा, दृष्ट्वा देहादिकं बहिः ।
तयोरन्तरविज्ञाना-दभ्यासादच्युतो भवेत् ॥७९॥

पूर्वं दृष्टात्मतत्त्वस्य, विभात्युन्मत्तवज्जगत् ।
स्वभ्यस्तात्मधियः पश्चात्, काष्ठपाषाणरूपवत् ॥८०॥

शृण्वन्नप्यन्यतः कामं, वदन्नपि कलेवरात् ।
नात्मानं भावयेद्भिन्नं, यावत्तावन्न मोक्षभाक् ॥८१॥

तथैव भावयेद् देहाद्, व्यावृत्यात्मानमात्मनि ।
यथा न पुनरात्मानं, देहे स्वप्नेऽपि योजयेत् ॥८२॥

अपुण्यमव्रतैः पुण्यं, व्रतैर्मोक्षस्तयोर्व्ययः ।
अव्रतानीव मोक्षार्थी, व्रतान्यपि ततस्त्यजेत् ॥८३॥

अव्रतानि परित्यज्य, व्रतेषु परिनिष्ठितः ।
त्यजेत् तान्यपि संप्राप्य, परमं पदमात्मनः ॥८४॥

यदन्तर्जल्पसंपृक्त-मुत्प्रेक्षाजालमात्मनः ।
मूलं दुःखस्य तन्नाशे, शिष्टमिष्टं परं पदम् ॥८५॥
अव्रती व्रतमादाय, व्रती ज्ञानपरायणः ।
परात्मज्ञानसम्पन्नः, स्वयमेव परो भवेत् ॥८६॥
लिङ्गं देहाश्रितं दृष्टं, देह एवात्मनो भवः ।
न मुच्यन्ते भवात् तस्मात् ते ये लिङ्गकृताग्रहाः ॥८७॥
जातिर्देहाश्रिता दृष्टा, देह एवात्मनो भवः ।
न मुच्यन्ते भवात् तस्मात् ते ये जातिकृताग्रहाः ॥८८॥
जातिलिङ्गविकल्पेन, येषां च समयाग्रहः ।
तेऽपि न प्राप्नुवन्त्येव, परमं पदमात्मनः ॥८९॥
यत्त्यागाय निवर्तन्ते, भोगेभ्यो यदवाप्तये ।
प्रीतिं तत्रैव कुर्वन्ति, द्वेषमन्यत्र मोहिनः ॥९०॥
अनन्तरज्ञः संधत्ते, दृष्टिं पङ्गोर्यथाऽन्धके ।
संयोगात् दृष्टिमङ्गेऽपि, संधत्ते तद्वदात्मनः ॥९१॥
दृष्टभेदो यथा दृष्टिं, पङ्गोरन्धे न योजयेत् ।
तथा न योजयेद् देहे, दृष्टात्मा दृष्टिमात्मनः ॥९२॥
सुप्तोन्मत्ताद्यवस्थैव, विभ्रमोऽनात्मदर्शिनाम् ।
विभ्रमोऽक्षीणदोषस्य, सर्वावस्थाऽऽत्मदर्शिनः ॥९३॥
विदिताशेषशास्त्रोऽपि, न जाग्रदपि मुच्यते ।
देहात्मदृष्टिर्ज्ञातात्मा, सुप्तोन्मत्तोऽपि मुच्यते ॥९४॥

यत्रैवाहितधीः पुंसः, श्रद्धा तत्रैव जायते ।
यत्रैव जायते श्रद्धा, चित्तं तत्रैव लीयते ॥९५॥

यत्रानाहितधीः पुंसः, श्रद्धा तस्मान्निवर्तते ।
यस्मान्निवर्तते श्रद्धा, कुतश्चित्तस्य तल्लयः ॥९६॥

भिन्नात्मानमुपास्यात्मा, परो भवति तादृशः ।
वर्तिर्दीपं यथोपास्य, भिन्ना भवति तादृशी ॥९७॥

उपास्यात्मानमेवात्मा, जायते परमोऽथवा ।
मथित्वाऽऽत्मानमात्मैव, जायतेऽग्निर्यथा तरुः ॥९८॥

इतीदं भावयेन्नित्य–मवाचां गोचरं पदम् ।
स्वत एव तदाप्नोति, यतो नावर्तते पुनः ॥९९॥

अयत्नसाध्यं निर्वाणं, चित्तत्वं भूतजं यदि ।
अन्यथा योगतस्तस्मान् न दुःखं योगिनां क्वचित् ॥१००॥

स्वप्ने दृष्टे विनष्टेऽपि, न नाशोऽस्ति यथात्मनः ।
तथा जागरदृष्टेऽपि, विपर्यासाऽविशेषतः ॥१०१॥

अदुःखभावितं ज्ञानं, क्षीयते दुःखसन्निधौ ।
तस्माद् यथाबलं दुःखै–रात्मानं भावयेन्मुनिः ॥१०२॥

प्रयत्नादात्मनो वायु–रिच्छाद्वेषप्रवर्तितात् ।
वायोः शरीरयन्त्राणि, वर्तन्ते स्वेषु कर्मसु ॥१०३॥

तान्यात्मनि समारोप्य, साक्षाण्यास्तेऽसुखं जडः ।
त्यक्त्वाऽरोपं पुनर्विद्वान्, प्राप्नोति परमं पदम् ॥१०४॥

मुक्त्वा परत्र परबुद्धिमहंधियं च,
संसारदुःखजननीं जननाद्विमुक्तः ।
ज्योतिर्मयं सुखमुपैति परात्मनिष्ठः,
तन्मार्गमेतदधिगम्य समाधितन्त्रम् ॥१०५॥

इति समाधिशतकं अपरनाम समाधितन्त्रम्

महाकविश्रीमल्लिषेणविरचितम्

# सज्जनचित्तवल्लभम्

नत्वा वीरजिनं जगत्त्रयगुरुं, मुक्तिश्रियो वल्लभम् ।
पुष्पेषुक्षयनीतबाणनिवहं, संसारदुःखापहम् ॥
वक्ष्ये भव्यजनप्रबोधजननं, ग्रन्थं समासादहम् ।
नाम्ना सज्जनचित्तवल्लभमिमं, शृण्वन्तु सन्तो जनाः ॥१॥

रात्रिश्चन्द्रमसा विनाऽब्जनिवहै, र्नो भाति पद्माकरो ।
यद्वा पण्डितलोकवर्जितसभा, दन्तीव दन्तं विना ॥
पुष्पं गन्धविवर्जितं मृतपतिः, स्त्री चेह तद्वन्मुनिः ।
चारित्रेण विना न भाति सततं, यद्यप्यसौ शास्त्रवान् ॥२॥

किं वस्त्रत्यजनेन भो ! मुनिरसा–वेतावता जायते ।
क्ष्वेडेन च्युतपन्नगो गतविषः, किं जातवान् भूतले ॥
मूलं किं तपसः क्षमेन्द्रियजयः, सत्यं सदाचारता ।
रागादींश्च बिभर्ति चेन्न स यति, र्लिङ्गी भवेत् केवलं॥३॥

देहे निर्ममता गुरौ विनयता, नित्यं श्रुताभ्यासता ।
चारित्रोज्ज्वलता महोपशमता, संसारनिर्वेगता ॥
अन्तर्बाह्यपरिग्रहत्यजनता धर्मज्ञता साधुता ।
साधो ! साधुजनस्य लक्षणमिदं, संसारविच्छेदणम् ॥४॥

किं दीक्षाग्रहणेन ते यदि धना—काङ्क्षा भवेच्चेतसि ।
किं गार्हस्थ्यमनेन वेषधरणे—नासुन्दरं मन्यसे ।
द्रव्योपार्जनचित्तमेव कथय—त्यभ्यन्तरस्थाङ्गना ।
नोचेदर्थपरिग्रहग्रहमति, भिक्षो ! न सम्पद्यते ॥५॥

योषापण्डकगोविवर्जितपदे, संतिष्ठ भिक्षो ! सदा, ।
भुक्त्वाऽऽहारमकारितं परगृहे, लब्धं यथासम्भवम् ॥
षड्भावश्यकसत्क्रियासु निरतो, धर्मानुरागं वहन् ।
सार्द्धं योगिभिरात्मभावनपरो, रत्नत्रयालङ्कृतः ॥६॥

दुर्गन्धं वदनं वपुर्मलभृतं, भिक्षाटनाद्भोजनं ।
शय्या स्थण्डिलभूमिषु प्रतिदिनं कट्यां न ते कर्पटं ॥
मुण्डं मुण्डितमर्द्धदग्धशववत् त्वं दृश्यते भो जनैः, ।
साधो ! ऽद्याप्यबलाजनस्य भवतो, गोष्ठी कथं रोचते ॥७॥

अङ्गं शोणितशुक्रसंभवमिदं, मेदोऽस्थिमज्जाकुलं ।
बाह्ये माक्षिकपत्रसन्निभमहो, चर्मावृतं सर्वतः ॥
नो चेत् काकबकादिभिर्वपुरहो, जायेत भक्ष्यं ध्रुवं ।
दृष्ट्वाऽद्याऽपि शरीरसद्मनि कथ, निर्वेगता नास्ति ते ॥८॥

दुर्गन्धं नवभिर्वपुः प्रवहति, द्वारैरिदं सन्ततं ।
तद्दृष्ट्वाऽपि च यस्य चेतसि पुन, र्निर्वेगता नास्ति चेत् ॥
तस्माद्यद्भुवि वस्तु कीदृशमहो, तत्कारणं कथ्यतां ।
श्रीखण्डादिभिरङ्गसंस्कृतिरियं, व्याख्याति दुर्गन्धतां ॥९॥

स्त्रीणां भावविलासविभ्रमगतिं, दृष्ट्वाऽनुरागं मनाग् ।
मागास्त्वं विषवृक्षपक्वफलवत् सुस्वादवन्त्यस्तदा ॥
ईषत्सेवनमात्रतोऽपि मरणं, पुंसां प्रयच्छन्ति भो ! ।
तस्माद् दृष्टिविषाहिवत् परिहर, त्वं दूरतो मृत्यवे ॥१०॥

यद्यद्वाञ्छति तत्तदेव वपुषे, दत्तं सुपुष्टं त्वया ।
सार्द्धं नैति तथाऽपि ते जडमते, ! मित्रादयो यान्ति किं ॥
पुण्यं पापमितिद्वयं च भवतः, पृष्ठे न यातीह ते ।
तस्मान् मास्म कृथा मनागपि भवान् , मोहं शरीरादिषु॥११॥

शोचन्ते न मृतं कदाऽपि वनिता, यद्यस्ति गेहे धनं ।
तच्चेन्नास्ति रुदन्ति जीवनधिया, स्मृत्वा पुनः प्रत्यहम् ॥
कृत्वा तद्दहनक्रियां निजनिज–व्यापारचिन्ताकुलाः ।
तन्नामाऽपि च विस्मरन्ति कतिभिः, संवत्सरैर्योषितः ॥१२॥

अष्टाविंशतिभेदमात्मनि पुरा, संरोप्य साधो ! व्रतं ।
साक्षीकृत्य जिनान् गुरूनपि कियत्, कालं त्वया पालितं ॥
भक्तुं वाञ्छसि शीतवातविहतो, भूत्वाऽधुना तद्व्रतं ।
दारिद्रोपहतः स्ववान्तिमशनं, भुङ्क्ते क्षुधार्तोऽपि किम्॥१३॥

अन्येषां मरणं भवानिगणयन् , स्वस्यामरत्वं सदा ।
देहिन् ! चिन्तयतीन्द्रियद्विपवशी, भूत्वा परिभ्राम्यसि ॥
अद्य श्वः पुनरागमिष्यति यमो, न ज्ञायते तत्त्वतः ।
तस्मादात्महितं कुरु त्वमचिराद्, धर्मं जिनेन्द्रोदितं ॥१४॥

सौख्यं वाञ्छसि किं त्वया गतभवे, दानं तपो वा कृतं ।
नो चेत् त्वं किमिहैवमेव लभसे, लब्धं तदत्रागतम् ॥
धान्यं किं लभते विनाऽपि वपनं, लोके कुटुम्बीजनो ।
देहे कीटकभक्षितेक्षुसदृशे, मोहं वृथा मा कृथाः ॥१५॥

आयुष्यं तव निद्रयार्द्धमपरं, चायुस्त्रिभेदादहो ।
बालत्वे जरया कियद् व्यसनतो, यातीति देहिन् ! वृथा ॥
निश्चित्यात्मनि मोहपाशमधुना, संछिद्य बोधासिना ।
मुक्तिश्रीवनितावशीकरणसच्-चारित्रमाराधय ॥१६॥

यत्काले लघुपात्रमण्डितकरो, भूत्वा परेषां गृहे ।
भिक्षार्थं भ्रमसे तदा हि भवतो, मानापमानेन किं ॥
भिक्षो ! तापसवृत्तिः कदशनात्, किं तप्यसेऽहर्निशं ।
श्रेयोऽर्थं किल सह्यते मुनिवरैः, बाधा क्षुधाद्युद्भवा ॥१७॥

एकाकी विहरत्यनस्थितबली-वर्दो यथा स्वेच्छया ।
योषामध्यरतस्तथा त्वमपि भो !, त्यक्त्वाऽऽत्मयूथं यते ! ॥
तस्मिश्चेदभिलाषता न भवतः, किं भ्राम्यसि प्रत्यहम् ।
मध्ये साधुजनस्य तिष्ठसि न किं, कृत्वा सदाचारताम् ॥१८॥

क्रीतान्नं भवता भवेत् कदशनं, रोषस्तदा श्लाघ्यते ।
भिक्षायां यदवाप्यते यतिजनैस्तद्भुज्यतेऽत्यादरात् ॥
भिक्षो ! भाटकसद्मसन्निभतनोः, पुष्टिं वृथा मा कृथाः ।
पूर्णे किं दिवसावधौ क्षणमपि, स्थातुं यमो दास्यति ॥१९॥

लब्ध्वार्थं यदि धर्मदानविषये, दातुं न यैः शक्यते ।
दारिद्रोपहतास्तथाऽपि विषया–सक्तिं न मुञ्चन्ति ये ॥
धृत्वा ये चरणं जिनेन्द्रगदितं, तस्मिन् सदाऽनादराः ।
तेषां जन्म निरर्थकं गतमजा–कण्ठे स्तनाकारवत् ॥२०॥

लब्ध्वा मानुषजातिमुत्तमकुलं, रूपं च नीरोगतां ।
बुद्धिर्धीधनसेवनं सुचरणं, श्रीमज्जिनेन्द्रोदितम् ॥
लोभार्थं वसुपूर्णहेतुभिरलं, स्तोकाय सौख्याय भो ! ।
देहिन् देहसुपोतकं गुणभृतं, भंक्तु किमिच्छाऽस्ति ते ॥२१॥

वेतालाकृतिमर्द्धदग्धमृतकं, दृष्ट्वा भवन्तं यते ! ।
यासां नास्ति भयं त्वया सममहो, जल्पन्ति तास्त्पुनः ॥
राक्षस्यो भुवने भवन्ति वनिता, मा मा गतं भक्षितुं ।
मावैवं प्रपलाप्यतां मृतिभयात्त्वं तत्र मा स्थाः क्षणम्॥२२॥

मागास्त्वं युवतीगृहेषु सततं, विश्वासतां संशयो ।
विश्वासे जनवाच्यतां भवति ते, नश्येत् पुमर्थं ह्यतः ॥
स्वाध्यायानुरतो गुरूक्तवचनं शीर्षे समारोपयन् ।
तिष्ठ त्वं विकृतिं पुनर्व्रजसि चेद् यासि त्वमेव क्षयम् ॥२३॥

किं संस्कारशतेन विट् जगति भोः !, काश्मीरजं जायते ।
किं देहः शुचितां भजेदनुदिनं, प्रक्षालनादम्भसा ॥
संस्कारो नखदन्तवक्त्रवपुषां, साधो ! त्वया युज्यते ।
नाकामी किल मण्डनप्रिय इति, त्वं व्यर्थकं मा कृथाः ॥२४॥
वृत्तैर्विंशतिभिश्चतुर्भिरधिकैः । सल्लक्षणेनान्वितै-
र्ग्रंथसज्जनचित्तवल्लभमिमं, श्रीमल्लिषेणोदितम् ॥
श्रुत्वाऽऽत्मेन्द्रियकुञ्जरान् समटतो रुन्धन्तु ते दुर्जरान् ।
विद्वांसो विषयाटवीषु सततं संसारविच्छित्तये ॥२५॥

इति महाकविश्रीमल्लिषेणविरचितम्
सज्जनचित्तवल्लभं सम्पूर्णम्

श्रीमद्राजर्षिरमोघवर्षकृता

# प्रश्नोत्तररत्नमालिका

प्रणिपत्य वर्धमानं प्रश्नोत्तररत्नमालिकां वक्ष्ये ।
नागनरामरवन्द्यं देवं देवाधिपं वीरम् ॥१॥
कः खलु नालं क्रियते, दृष्टादृष्टार्थसाधनपटीयान् ।
कण्ठस्थितया विमलप्रश्नोत्तररत्नमालिकया ॥२॥
भगवन् ! किमुपादेयं, गुरुवचनं हेयमपि च किमकार्यम् ।
को गुरुरधिगततत्त्वः, सत्त्वहिताभ्युद्यतः सततम् ॥३॥
त्वरितं किं ? कर्त्तव्यं, विदुषा संसारसन्ततिच्छेदः ।
किं मोक्षतरोर्बीजं, सम्यग्ज्ञानं क्रियासहितम् ॥४॥

किं ? पथ्यदनं धर्मः, कः शुचिरिह यस्य मानसं शुद्धम् ।
कः पण्डितो विवेकी, किं ? विषमवधीरिता गुरवः ॥५॥
किं ? संसारे सारं, बहुशोऽपि विचिन्त्यमानमिदमेव ।
मनुजेषु दृष्टतत्त्वं, स्वपरहितायोद्यतं जन्म ॥६॥
मदिरेव मोहजनकः कः, स्नेहः के ? च दस्यवो विषयाः ।
का भववल्ली तृष्णा, को वैरी नन्वनुद्योगः ॥७॥
कस्माद् भयमिह मरणाद्, अन्धादपि को विशिष्यते रागी ।
कः शूरो यो ललना–लोचनबाणैर्न च व्यथितः ॥८॥
पातुं कर्णाञ्जलिभिः किममृतमिव बुध्यते सदुपदेशः ।
किं ? गुरुताया मूलं, यदेतदप्रार्थनं नाम ॥९॥
किं ? गहनं स्त्रीचरित्रं, कश्चतुरो यो न खण्डितस्तेन ।
किं ? दारिद्र्यमसन्तोष, एव किं ? लाघवं याच्ञा ॥१०॥
किं ? जीवितमनवद्यं, किं जाड्यं पाटवेऽप्यनभ्यासः ।
को जागर्ति विवेकी, का निद्रा मूढता जन्तोः ॥११॥
नलिनीदलगतजललव–तरलं किं ? यौवनं धनमथायुः ।
के शशधरकरनिकरा–नुकारिणः सज्जना एव ॥१२॥
को नरकः परवशता, किं ? सौख्यं सर्वसङ्गविरतिर्या ।
किं ? सत्यं भूतहितं, किं ? प्रेयः प्राणिनामसवः ॥१३॥
किं ? दानमनाकाङ्क्षं, किं ? मित्रं यन्निवर्तयति पापात् ।
कोऽलङ्कारः शीलं, किं वाचां मण्डनं सत्यम् ॥१४॥

किमनर्थफलं मानस–मसङ्गतं का सुखावहा मैत्री ।
सर्वव्यसनविनाशे, को दक्षः सर्वथा त्यागः ॥१५॥
कोऽन्धो योऽकार्यरतः, को बधिरो यः शृणोति न हितानि ।
को मूको यः काले, प्रियाणि वक्तुं न जानाति ॥१६॥
किं मरणं मूर्खत्वं, किञ्चानर्घं यदवसरे दत्तम् ।
आमरणात् किं ? शल्यं, प्रच्छन्नं यत् कृतमकार्यम् ॥१७॥
कुत्र विधेयो यत्नो, विद्याभ्यासे सदौषधे दाने ।
अवधीरणा क्व कार्या, खलपरयोषित्परधनेषु ॥१८॥
काऽहर्निशमनुचिन्त्या, संसारासारता न च प्रमदा ।
का प्रेयसी विधेया, करुणा दाक्षिण्यमपि मैत्री ॥१९॥
कण्ठगतैरप्यसुभिः, कस्यात्मा नो समर्प्यते जातु ।
मूर्खस्य विषादस्य च, गर्वस्य तथा कृतघ्नस्य ॥२०॥
कः पूज्यः सद्वृत्तः, कमधनमाचक्षते चलितवृत्तम् ।
केन जितं जगदेतत्, सत्यतितिक्षावता पुंसा ॥२१॥
कस्मै नमः सुरैरपि, सुतरां क्रियते दयाप्रधानाय ।
कस्माद् उद्विजितव्यं, संसारारण्यतः सुधिया ॥२२॥
कस्य वशे प्राणिगणः, सत्यप्रियभाषिणो विनीतस्य ।
क्व स्थातव्यं न्याय्ये, पथि दृष्टादृष्टलाभाय ॥२३॥
विद्युद् विलसितचपलं, किं ? दुर्जनसङ्गतं युवतयश्च ।
कुलशीलनिष्प्रकम्पाः, के ? कलिकालेऽपि सत्पुरुषाः ॥२४॥

किं शौच्यं कार्पण्यं, सति विभवे किं प्रशस्यमौदार्यम् ।
तनुतरवित्तस्य तथा, प्रभविष्णोर्यत् सहिष्णुत्वम् ॥२५॥
चिन्तामणिरिव दुर्लभमिह, किं ? ननु कथयामि चतुर्भद्रम् ।
किं तद् वदन्ति भूयो, विधूततमसो विशेषेण ॥२६॥
दानं प्रियवाक्यसहितं, ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागसहितं च वित्तं, दुर्लभमेतच्चतुष्टयं लोके ॥२७॥
इति कण्ठगता विमला, प्रश्नोत्तररत्नमालिका येषां ।
ते मुक्ताभरणा अपि, विभान्ति विद्वत्समाजेषु ॥२८॥
विवेकात् त्यक्तराज्येन राज्ञेयं रत्नमालिका ।
रचिताऽमोघवर्षेण सुधियां सदलङ्कृतिः ॥२९॥

इति श्रीमद्राजर्षिरमोघवर्षकृता प्रश्नोत्तररत्नमालिका

## अपरा प्रश्नोत्तररत्नमालिका

किमिहाराध्यं भगवन् ! रत्नत्रयतेजसा प्रतपमानम् ।
शुद्धं निजात्मतत्त्वं जिनरूपं सिद्धचक्रं च ॥१॥
को देवो निखिलज्ञो निर्दोषः किं श्रुतं तदुद्दिष्टम् ।
को गुरुरविषयवृत्ति निर्ग्रन्थः स्वस्वरूपस्थः ॥२॥
किं दुर्लभं नृजन्म प्राप्येदं भवति किं च कर्तव्यम् ।
आत्महितमहितसङ्ग–त्यागो रागश्च गुरुवचने ॥३॥
का मुक्ति रखिलकर्मक्षतिरस्याः प्रापकश्च को मार्गः ।
दृष्टिज्ञान वृत्तं कियत् सुखं तत्र चानन्तम् ॥४॥

किं हिंसाया मूलं कोपः काऽऽऽत्माऽन्यवञ्चिका माया ।
कोऽत्र गुरुष्वपि पूजाऽतिक्रमहेतुः खलो मानः ॥५॥
किमनर्थस्य निदानं लोभः किं मण्डनं च शुचि शीलम् ।
को महिमा विद्वत्ता विवेकिता का व्रताचरणम् ॥६॥
मनसाऽपि किं न चिन्त्यं परदाराः परधनं परापकृतिः ।
कीदृग्वचो न वाच्यं परुषं पीडाकरं कटुकम् ॥७॥
किं हातव्यं सततं पैशून्यं व्यसनिता च मात्सर्यम् ।
किमकरणीयं यत्पर–लोकविरुद्धं मनोऽनिष्टम् ॥८॥
शम्पेव चञ्चला का सम्पत् काव्यमिव किमनवद्यम् ।
जीवितमधर्मरहितं कलङ्कमुक्तं यशोयुक्तम् ॥९॥
किं दिनकृत्यं जिनपतिपूजासामायिकगुरूपास्तिः ।
त्रिविध शुचि पात्रदानं शास्त्राध्ययनं च सानन्दम् ॥१०॥

इत्यपरा प्रश्नोत्तररत्नमालिका

## श्रमणप्रशंसा

न च राजभयं न च चौरभयं इहलोकसुखं परलोकहितम् ।
वरकीर्तिकरं नरदेवनुतं श्रमणत्वमिदं रमणीयतरम् ॥१॥

## द्रव्यश्रमणस्य लक्षणम्

मदमदनकषायारातयो नोपशान्ताः ।
न च विषयविमुक्ति र्जन्मदुःखाद्भीतिः ॥
न तनुसुखविरागो विद्यते यस्य जन्तोः ।
भवति जगति दीक्षा तस्य भुक्त्यै न मुक्त्यै ॥१॥

श्रीयोगीन्द्रदेवविरचितम्

# ज्ञानाङ्कुशस्तोत्रम्

शुद्धात्मानं परं ज्ञात्वा, ज्ञानरूपं निरञ्जनम् ।
वक्ष्ये संक्षेपतो योगं, संसारच्छेदकारणम् ॥१॥

कायप्रमाणमात्मानं, व्योमरूपं निरञ्जनम् ।
चैतन्यं भावयेन्नित्यं, ज्ञानं प्राप्नोति निश्चयम् ॥२॥

शुभाशुभात्मकं कर्म, देहिनां भवधारिणाम् ।
भावे शुभाशुभे नष्टे, देहो नश्यति देहिनाम् ॥३॥

भावक्षये समुत्पन्ने, कर्म नश्यति निश्चयात् ।
तस्माद्भावक्षयं कृत्वा, न किञ्चिदपि चिन्तयेत् ॥४॥

ध्यानं स्थिरमनश्चैव, फलं स्यात् कर्मनिर्जरा ।
एवंविधविचारेण, योगं निश्चयमाचरेत् ॥५॥

सङ्कल्प एव जन्तूनां, कारणं बन्धमोक्षयोः ।
वीतरागोऽपवर्गस्य सरागो बन्धकारणम् ॥६॥

अभावभावनं चैव, भावं कृत्वा निराश्रयम् ।
निश्चलं हि मनः कृत्वा, न किञ्चिदपि चिन्तयेत् ॥७॥

आत्मा हि ज्ञानमित्युक्तं, ज्ञानात्मानौ विकल्पकम् ।
ज्ञानेन ज्ञानमालम्ब्य, योगिन् ! कर्मक्षयं कुरु ॥८॥

गृहस्थो यदि वा लिङ्गी, ब्रह्मचारी विशेषतः ।
ध्यानं करोति शुद्धात्मा, मुच्यते नात्र संशयः ॥९॥

पदार्थो अन्यथा लोके, शास्त्रं स्यादिदमन्यथा ।
अन्यथा मोक्षमार्गश्च, लोकः क्लिश्यति चान्यथा ॥१०॥
वर्णातीतं कलातीतं, गन्धातीतं विनिर्दिशेत् ।
पूर्वं द्वन्द्वविनिर्मुक्तं ध्यायेदर्हत्सदा शिवम् ॥११॥
गच्छन् वा यदि वा भुञ्जन्, स्वकार्यं चापि भोजनम् ।
कुर्वन्नाप्नोति तद्ध्यानं, येनात्मा लभते शिवम् ॥१२॥
यो नरः शुद्धात्मानं, ध्यायेत् कृत्वा मनः स्थिरम् ।
स एव लभते सौख्यं, निर्वाणं शाश्वतं पदम् ॥१३॥
पदस्थं मन्त्रवाक्यस्थं, पिण्डस्थं स्वात्मचिन्तनम् ।
रूपस्थं सर्वचिद्रूपं, रूपातीतं निरञ्जनम् ॥१४॥
कषायं नोकषायं च, कर्म नोकर्म एव च ।
मनोऽतीन्द्रियसर्वस्वं, त्यक्त्वा योगी समाचरेत् ॥१५॥
आत्मा सत्यं परिज्ञाय, सर्वकर्म परित्यजेत् ।
आत्मानन्तत्वबद्धार्थं, ज्ञानकर्म समाचरेत् ॥१६॥
तस्मात् कर्म परित्यज्य, स्वात्मतत्त्वं समाचरेत् ।
आचरितात्मतत्त्वश्च, स्वयमेव परो भवेत् ॥१७॥
पापकर्म परित्यज्य, पुण्यकर्म समाचरेत् ।
भावयेदशुभं कर्म, त्यक्त्वा योगी समाचरेत् ॥१८॥
अनन्तज्ञानमेवाहं, मनोवाक्कायवर्जितम् ।
अत्ययविकलं शुद्धं, तत्पदं शुद्धसंपदाम् ॥१९॥

सम्यग्दर्शनसज्ज्ञान—चारित्रत्रितयात्मकम् ।
तेनात्मदर्शनं नित्यं, रत्नत्रितयभावना ॥२०॥

मतिश्रुतावधिश्चेति, मनःपर्ययकेवलम् ।
ज्ञानात्मा मुक्तिरित्युक्तं, पञ्चादिपरमेष्ठिनाम् ॥२१॥

देहं चैत्यालयं प्राहुः, देही चैत्यं तथोच्यते ।
तद्भक्तिश्चैत्यभक्तिश्च, प्रशस्या भववर्जिता ॥२२॥

यथा च काञ्चनं शुद्धं, दग्ध्वा पिण्डस्य बन्धनम् ।
जीवोऽपि हि बद्धाभूतं, ध्यानयोगेन शुद्ध्यति ॥२३॥

प्रपञ्चरहितं शास्त्रं, प्रपञ्चरहितो गुरुः ।
प्रपञ्चरहितो मोक्षो, दृश्यते जिनशासने ॥२४॥

नास्ति ध्यानसमो बन्धुः नास्ति ध्यानसमो गुरुः ।
नास्ति ध्यानसमं मित्रं, नास्ति ध्यानसमं तपः ॥२५॥

परात्मा द्विविधः प्रोक्तः, सकलो निष्कलस्तथा ।
सकलोऽर्हत्स्वरूपो हि, सिद्धो निष्कल उच्यते ॥२६॥

श्रूयते ध्यानयोगेन, संप्राप्तं पदमव्ययम् ।
तस्मात् सर्वप्रयत्नेन, कुर्याद् ध्यानं बुधोत्तमः ॥२७॥

पक्षपातविनिर्मुक्तं, लाभालाभविवर्जितम् ।
मायामनःपरित्यक्तं, तत्त्वं भवति योगिनः ॥२८॥

गर्भिणी च यथा नारी, पश्यत्यन्तःस्थसत्त्वकम् ।
एवं योगी स्वदेहस्थं, स्वं पश्येद् रेचकादिभिः ॥२९॥

न जापेन न होमेन, नाक्षसूत्रस्य धारणात् ।
प्राप्यते तत्परं तत्त्वं, प्राप्यं स्वात्मविचिन्तनात् ॥२०॥
प्रभातं योगिनो नित्यं, ज्ञानादित्यो हृदि स्थितः ।
इतरेषां नराणां च, न प्रभातं कदाचन ॥२१॥
देहाज्जीवं पृथक् कृत्वा, चिन्तयेत्तद्विचक्षणः ।
देहस्थैव च देहित्वे, ध्यानं तत्र विनिष्फलम् ॥२२॥
आत्मकर्म परित्यज्य, परदृष्टिं विशोधयेत् ।
यतीनां ब्रह्मनिष्ठानां, किं तया परचिन्तया ॥२३॥
चिन्तया नश्यते ज्ञानं, चिन्तया नश्यते बलम् ।
चिन्तया नश्यते बुद्धि, र्व्याधिर्भवति चिन्तया ॥२४॥
अन्यच्छरीरमन्योऽह–मन्ये सम्बन्धिबान्धवाः ।
एवं स्वं च परं ज्ञात्वा, स्वात्मानं भावयेत् सुधीः ॥२५॥
अत्यन्तमलिनो देहो, देही चात्यन्तनिर्मलः ।
उभयोरन्तरं दृष्ट्वा, कस्य शौचं विधीयते ॥२६॥
एकः करोति कर्माणि, भुङ्क्ते चैकोऽपि तत्फलम् ।
एकोऽपि जायते नून–मेको याति भवान्तरम् ॥२७॥
ऊर्ध्वश्वासविनिर्मुक्त–मधःश्वासविवर्जितम् ।
मध्यशून्यं पदं कृत्वा, न किञ्चिदपि चिन्तयेत् ॥२८॥
यावत्प्रवर्तते चिन्ता, तावत्पारं न गच्छति ।
विद्यते हि परं तत्त्वं, मनोऽपोहितकायवत् ॥२९॥

अरिषड्वर्गमाश्रित्य, भूपोऽपि न च भूपतिः ।
अरिषड्भर्ममाश्रित्य योगी योगी न योगिनाम् ॥४०॥
आर्त्तरौद्रं परित्यज्य, धर्म्यशुक्लं समाचरेत् ।
ताभ्यां परतरं नास्ति, परमात्मप्रभाषितम् ॥४१॥
वैराग्यं तत्त्वविज्ञानं, नैर्ग्रन्थ्यं समभावना ।
जयः परीषहाणां च, पञ्चैते ध्यानहेतवः ॥४२॥
ज्ञानाङ्कुशमिदं चित्त प्रमत्तकरिणाङ्कुशम् ।
योऽधीतेऽनन्यचेतस्कः, सोऽभ्युपैति परं पदम् ॥४३॥

इति ज्ञानाङ्कुशस्तोत्रम्

## पुरुषप्रशंसा

स ना स कुल्यः स प्राज्ञः स बलश्रीसहायवान् ।
स सुखी चेह चामुत्र यो नित्यं धर्ममाचरेत् ॥

श्रीविशालकीर्तिविरचिता

## श्रीवैराग्यमणिमाला

आनन्दचिन्मयसुधारसपानतृप्तः ।
शुद्धोपयोगमहिमानमुपागतश्च ॥
कैवल्यबोधभरिताद्भुतधामधन्यः ।
पायात् पवित्रितजगत् परमात्मराजः ॥१॥

चिद्रूपामृतवाहिनीपरिलसत्कैवल्यसत्कैरवं ।
शुद्धध्यानमरन्दबिन्दुलहरीलीलालसत्कर्णिकम् ॥
सत्सम्यक्त्वमृणालमण्डितवपुश्चारित्रनालाञ्चितं ।
योगीन्द्रभ्रमरौघसेवितमिदं पायादपायात् सदा ॥२॥

ज्योतिश्चिन्मयकौमुदीप्रणयिनी सद्दृष्टिहज्जृम्भते ।
शुद्धध्यानसुधासरित्प्रविलस-त्यानन्दसंदायिनी ॥
चारित्रामृतवार्धिवीचिपटली संवर्धते मोदिनी ।
चिद्रूपामृतदीधितेरुदयतो योगीन्द्रपूर्वाचले ॥३॥

भेदज्ञानसुधासरित्प्रणयिनीं संवर्धयन् सर्वदा ।
चिद्रूपामृतचन्द्रिकां दिशि दिशि प्रोल्लासयन्नञ्जसा ॥
योगिन्द्राम्बुधबोधिकैरवलतां प्रोत्फुल्लयन्नादरात् ।
शुद्धानन्तचतुष्टयामृतनिधिः प्रोज्जृम्भते पार्वणः ॥४॥

ज्योतिश्चिन्मयबोधिकैरवलताप्रोल्लासिनीं कुर्वता ।
चैतन्यामृततेजसा विदधता मुक्त्यापगामञ्जसा ॥
कैवल्यामृतवार्धिवर्धनविधिं सन्धित्सता सर्वदा ।
शुद्धध्यानमहीधरे विजयते चिद्रूपचन्द्रोदयः ॥५॥

पायं पायमपायभावरहितां चैतन्यरूपां सुधां ।
नायं नायमनन्तशान्तिपदवीं चेतः स्थिरं सर्वदा ॥
ध्यायं ध्यायमलक्ष्यबोधविशदं चिद्रूपमत्यद्भुतं ।
योगिन् ! योगविलासरञ्जितधिया साम्यं समालम्बय ।६।

यादृग् निर्मलमूर्तिरेष वसति स्वात्मोपलब्धौ सदा ।
नित्यानन्दविशुद्धचिन्मयवपुर्देहेऽपि तादृग्विधः ॥
भेदं मा कुरु भद्र ! चित्तकमले सूक्ष्मेक्षया लोकय ।
प्राप्तानन्तचतुष्टयामृतनिधिं स्वं शुद्धमत्यद्भुतम् ॥७॥

रे चित्त ! किं भ्रमसि भूरिविकल्पजाले ।
कार्यं कियत् तव समस्ति भवान्धकूपे ॥
किं खिद्यसे विविधमानसजातदुःखैः ।
चिद्रूपमन्वहमुपैहि सुखामृताय ॥८॥

जीव ! त्वमेहि निजमन्दिरयोग्यवासं ।
किं खिद्यसे परगृहे स्वनिवासशून्यम् ॥
किं ताम्यसि त्वमनिशं परवासमक्तः ।
चिद्रूपमाविश निजोत्तमधाम रम्यम् ॥९॥

स्वप्नेऽपि नोपशमतामुपयासि मूढ ! ।
भ्रान्त्वाऽऽजवंजववने वत मोहभावात् ॥
भो मित्र ! मोहमवमुञ्च भजस्व शान्तिम् ।
शुद्धोपयोगमुपयाहि कुरु स्वकार्यं ॥१०॥

भ्रातः ! किं कुशलं तवास्ति सततं संसारघोरार्णवे ।
त्वाशासातकरालवाडवलसद्-धूमध्वजे मज्जतः ॥
कालक्रूरमहातिमिङ्गिलगिलत्कुत्कारघोरीकृते ।
भेदज्ञानविशिष्टबोधमचिरा-दालम्ब्य तीरं व्रज ॥११॥

संसारे भ्रमता त्वयाऽतिसुचिरं किं साधितं ब्रूहि मे ।
मूढाऽद्याऽपि विशिष्टबोधनिलयो दुःखार्णवान्नोद्धृतः ॥
भोगक्रूरभुजङ्गवक्त्रकुहरे स्थातुं पुनर्वाञ्छसि ।
शुक्लध्यानसुधाम्बुधौ न रमसे संसारदुःखापहे ॥१२॥

कामोन्मादमहाभुजङ्गभयदे मिथ्यात्वमोहोदके,
क्रोधाद्युग्रतिमिव्रजप्रविततै तृष्णान्धकूपे चिरम् ।
किं मग्नोऽसि सखे ! समस्तभुवनं यत्राणुमात्रोपमं,
तस्मान्निर्गमनं समस्ति न पुनः सन्तोषयन्त्रं विना ॥१३॥

अनादौ संसारे चिरपरिचितं विश्वमखिलम्,
त्वया धीमन् ! मोहोदयपरतया नात्मचरितम् ।
वदामः किं भ्रातस्तव निपुणबुद्धेर्निपुणतां,
चिदानन्दात्मानं परममपहायात्र रमसे ॥१४॥

अन्तस्तापविजृम्भणेन सततं कामोद्भवेनाधुना,
नो जानासि हिताहितं जड़मते ! तत्रैव सक्तोऽसि किम् ?
अन्तःशान्तिसुधां पिब हि मुञ्च जड़तां सम्भावय स्वात्मताम्,
नित्यं चेतसि चिन्मयप्रविमलं चिद्रूपमेकं परम् ॥१५॥

हंहो चित्त ! विशालसंसृतिवने तृष्णादवाग्न्युत्कटे ।
कामक्रोधकरालकेसरिकुले मूर्च्छामदाष्टापदे ॥
क्रूरस्फारफणालकोलभुजगे मृत्य्वन्धकूपाकुले ।
भ्रान्त्वा तत्र चिरं तवाऽस्ति कुशलं किं भेदबोधं विना ॥१६॥

सर्वत्राशुचिसप्तधातुकलिते बद्धे स्नसाजालकैः ।
बीभत्सान्त्रसमाकुले, कृमिकुलाकीर्णे त्रिदोषाविले ॥
कालक्रूरबिडालपोतभयदे खेदावहे पञ्जरे ।
संसक्तोऽत्र कथं शुक ! व्रज सखे ! चैतन्यचूतद्रुमम् ॥१७॥

हंहो भव्यशिरोमणे ! भ्रमसि किं संसारकान्तारके ।
हित्वा बोधविशिष्टरत्नममलं सर्वार्थसंसाधकम् ॥
कामादिप्रभवां प्रपीय मदिरां मोहाभिधां मा पुनः ।
तत्पानं कुरु जातुचिद् गुणनिधे! मोक्षाभिलाषोऽस्तिचेत्॥१८

भ्रात ! स्तत्त्वकुतूहली किल भवन् सर्वाणि तत्त्वान्यहो ।
सम्भुक्तानि सदा त्वयैकपरमं चिद्रूपतत्त्वं विना ॥
चिद्रूपामृतसेवने कुरु रतिं सौख्याभिलाषोऽस्ति चेत् ।
लोके नूतनतत्त्वसङ्गतिरतिं बध्नाति कौतूहली ॥१९॥

हंहो हंस ! विवेकता तव भुवि प्रख्यातिमुद्भासिनी ।
वैशद्यं सकलातिशायि भुवने वस्त्वन्तरे दुर्लभम् ॥
चातुर्यं चतुराननस्य भवतो भो मित्र ! किं ब्रूमहे ।
शुद्धं चिन्मयमानसं शिवपदं हित्वा वृथा मुह्यसे ॥२०॥

हंहो चित्त–भ्रमर ! भवता भ्राम्यता भ्रान्तिभावाद्,
भोगासक्त्या, भववनभवद्भूरितृष्णालतासु ।
ताभ्यद्गन्धद्विषमविषयप्रीतिपुष्पव्रजेषु ।
नीत्वा कालं चिरमनवधि श्वभ्रदुःखं प्रपेदे ॥२१॥

श्रान्तोऽसि संसृतिवने परितो भ्रमेण ।
भो मित्र ! मोहवशतो विषयानुसङ्गात् ॥
श्वभ्रादिदुःखमनुभूयमनन्तावारं ।
निःश्रेयसाय समुपैहि समाधिभावम् ॥२२॥

प्रोत्तुङ्गाचलमस्तके वनलताकुञ्जोदरे गह्वरे ।
नद्यास्तीरसमस्थले धनवने स्थित्वा समाधौ रतः ॥
चिन्मुद्राङ्कितशुद्धभावविलसत्कैवल्यबोधोदयः ।
सञ्जातोऽस्मि यदा तदा शमनिधिर्धन्योऽस्मि धन्यात्मनाम् ॥२३

मूलं शुद्धोपयोगः परमसमरसीभावदृक्स्कन्धबन्धः ।
शाखासम्यक्चरित्रं प्रसृमरविलसत्पल्लवाः क्षान्तिभावाः ॥
छाया शान्तिःसमन्तात्सुरभितकुसुमः श्रीचिदानन्दलीला,
भूयात्तापोपशान्त्यै शिवसुखफलिनः संश्रयो योगिगम्यः ॥२४॥

सिद्धिश्रीसङ्गसौख्या-मृतरसभरितः सच्चिदानन्दरूपः ।
प्राप्तः पारं भवाब्धेर्गुणमणिनिकरोद्भूरिरत्नाकरोऽपि ॥
चैतन्योल्लासिलीला-समयमुपगतः प्राप्तसम्पूर्णशर्मा ।
योगीन्द्रैर्बोधिलब्ध-परमसमरसी-भावगम्यः सुरम्यः ॥२५॥

चिन्मयभावरूपचिद्रूपसुधारसपूर्णकुम्भमयम् ।
कैवल्यबोधविशदसुरसिन्धुविजृम्भणघनोदयम् ॥
परमानन्दचन्द्रकिरणोज्ज्वलशान्तरसौघमन्दिरम् ।
भावय भव्य ! चित्कौमुदवनबोधकरं चिदात्मकम् ॥२६॥

समयसारसुधारसवाहिनी, समयसारसुधाकरकौमुदी ।
समयसारसुद्रुममञ्जरी, विजयते जिनराजसमाकृतिः ॥२७

स्वच्छन्दं नवशल्लकीकवलनं पम्पासरोमज्जनम् ।
रेवाशोणविगाहनं वनलताकुञ्जोदरे क्रीडनम् ॥

सानन्दं गजयूथपेन गमनं मात्रा करिण्या समं ।
ध्यायेद् बालगजो यथा जिनपदद्वन्द्वं तथा मानसे ॥२८॥

जन्मनि जन्मनि जिनवर ! रमताम् त्वत्पादपद्मयुगलेऽस्मिन
भक्तिभ्रमरी निभृतं चिद्रूपामोदबोधकिञ्जलके ॥२९॥

श्रीमद्देवेन्द्रकीर्तिप्रभुगुणमहितः, स्वामिविद्यादिनन्दो ।
धीमान् श्रीपूज्यपादो गुणनिधिरुदयप्राप्तकैवल्यबोधः ॥
मुक्तिश्रीसौख्यसम्पत्प्रवरगुरुगणोल्लासिरत्नत्रयात्मा ।
जीयात्तीर्थेश्वरोऽयं जिनपतिरखिलं शान्ति लोकं स नोऽव्यात्

वैराग्यमणिमालेयं रचिता सदलङ्कृतिः ।
विशालकीर्तियतिना विद्यानन्ददयार्थिना ॥३१॥

इति वैराग्यमणिमाला

श्रीश्रुतसागरसूरिविरचिता

# द्वादशानुप्रेक्षा

अध्रौव्यं भुवने न कोऽपि शरणं, दृष्टो भवश्चैकता ।
जन्तोरन्यतयाऽशुचिस्तनुरियं, कर्मास्रवः संवरः ॥
सारं निर्जरणं विधेरसुखकृत् लोको दुरापा भवे ।
बोधेर्दुर्लभधर्म एव सदनु–प्रेक्षा इति द्वादश ॥१॥

१ अनित्यानुप्रेक्षा

सद्दृग्बोधचरित्ररत्ननिचयं, मुक्त्वा शरीरादिकं, ।
न स्थेयोऽभ्रतडित्सुरेन्द्रधनुरम्भोबुद्बुदाभं क्वचित् ॥

एवं चिन्तयतोऽभिषङ्गविभमः, स्याद् भुक्तमुक्ताशने ।
यद्वत्तद्विलयेऽपि नोचितमिदं, संशोचनं श्रेयसे ॥२॥

२ अशरणानुप्रेक्षा

नो कश्चिच्छरणं नरस्य मरणे, जन्मादिदुःखोत्करे ।
व्याधाघ्रातमृगात्मजस्य विजने, वाब्धौ पतत्रेरिव ॥
पोताद् भ्रष्टतनोर्धनं तनुरमा, जीवेन पुत्रादयो ।
नो यान्त्यन्यभवं परन्तु शरणं, धर्मः सदामर्हतः ॥३॥

३ संसारानुप्रेक्षा

जीवः कर्मवशाद् भ्रमन् भववने भूत्वा पिता जायते ।
पुत्रश्चाऽपि निजेन मातृभगिनी, भार्यादुहित्रादिकः ॥
राजा पत्तिरसौ नृपः पुनरिहा-प्यन्यत्र शैलूषवत् ।
नानावेषधरः कुलादिकलितो, दुःख्येव मोक्षादृते ॥४॥

४ एकत्वानुप्रेक्षा

संसारप्रभवं सुखासुखमथो, निर्वाणजं सच्छिवं ।
भुञ्जेऽहं खलुकेवलो न च परो, बन्धुः श्मशानात्परम् ॥
नायात्येव सहायतां व्रजति मे, धर्मः सुशर्मद्रुमः ।
स्फूर्जज्जीवनदः सदाऽस्तु महता-मेकत्वमेतच्छ्रिये ॥५॥

५ अन्यत्वानुप्रेक्षा

नो नित्यंजडरूपमैन्द्रियकमा, धन्ताश्रितं वर्ष्म यत् ।
सोऽहं तानि बहूनि चाश्रयमयं, खेदोऽस्ति सक्षादतः ॥

नीरक्षीरवदङ्गतोऽपि यदि मेऽन्यत्वं ततोऽन्यस्पृशं ।
साक्षात् पुत्रकलत्रमित्रगृहरै, रत्नादिकं मत्परम् ।।६।।

६ अशुचित्वानुप्रेक्षा

अङ्गं शोणितशुक्रसम्भवमिदं, विण्मूत्रपात्रं न च ।
स्नानालेपनधूपनादिभिरदः, पूतं भवेज्जातुचित् ।।
कर्पूरादिपवित्रमत्र निहितं, तच्चापवित्रं यथा ।
पीयूषं विषमङ्गनाधरगतं, रत्नत्रयं शुद्धये ।।७।।

७ आस्रवानुप्रेक्षा

स्पर्शाद्भामवती रसात् तिमिरगाद्, गन्धात् क्षयं षट्पदो ।
रूपाच्चैव पतङ्गको मृगतति, गीतात् कषायापदां ।।
शर्वो दोर्बलिधर्मपुत्रचमरा, दृष्टान्तभाजः क्रमाद् ।
हिंसादेर्धनसम्पदादिकगणः, कर्मास्रवः किं मुदे ।।८।।

८ संवरानुप्रेक्षा

वाराशौ जलयानपात्रविवर,–प्रच्छादने तद्गतो ।
यद्वत् पारमियर्ति विघ्नविगतः, सत्संवरः स्यात्तथा ।।
संसारान्तगतश्चरित्रनिचयाद् धर्मादनुप्रेक्षणाद् ।
वैराग्येण परीषहक्षमतया, संपद्यतेऽसौ चिरात् ।।९।।

९ निर्जरानुप्रेक्षा

स्वभ्रादौ विधियोगतो भवति या, पापानुबन्धा च सा ।
तामाप्नोति कुधीरबुद्धिकलितः, पुण्यानुबन्धा परा ।।

गुप्त्यादिश्च परीषहादिविजयाद्, या सत्तपोभिः कृता।
सद्भिः सा प्रविधीयते मुनिवरैः, चेत्थं द्विधा निर्जरा ।।१०।

१० लोकानुप्रेक्षा

पाताले नरका निकोतनिलयो, मध्ये त्वसंख्ये मताः।
सद्द्वीपमहार्णवाश्च गिरयो, नद्यो मनुष्यादयः ।।
सूर्याचन्द्रमसादयश्च गगने, देवा दिवीत्थं त्रिधा।
लोको वातनिवेशितोऽस्ति न कृतो, रुद्रादिभिःशाश्वतः ।।११

११ बोधिदुर्लभानुप्रेक्षा

सिद्धानन्तगुणा निकोतवपुषि स्युः प्राणिनः स्थावरैः।
लोकोऽयं निचितस्त्रसत्वचरपञ्चाक्षत्वदेशान्वयम् ।।
दुःप्रापं खविरुक् सुधर्मविषया, भावं विरागं तपो।
धर्मं योतसुखामुमोचनमियं, बोधिर्भवेद् दुर्लभा ।।१२।।

१२ धर्मानुप्रेक्षा

लक्ष्म प्राणिदयादिसद्विनयता, मूलं क्षमादिस्मृतम्।
स्वालम्बस्तु परिग्रहत्यजनता, धर्मस्य सोऽयं जिनैः ।।
प्रोक्तोऽनेन विना भ्रमन्ति भविनः, संसारघोरार्णवे।
तस्मिन्नभ्युदयं भजन्ति सुधियो निःश्रेयसं जाग्रति ।।१३।।

एता द्वादशभावना विरचिता वैराग्यसंवृद्धये।
विद्यानन्दिगुरोऽनुरागवशतो, धर्मस्य धीमच्छ्रिये ।।
दोषज्ञश्रुतसागरेण विदुषा, दोषौघविच्छित्तये।
येऽन्तःसम्यगनुस्मरन्ति मुनयो, नित्यं पदं यान्ति ते ।१४।

इति द्वादशानुप्रेक्षा

श्रीवादीभसिंहसूरिविरचिता

# द्वादशानुप्रेक्षा

## १ अनित्यानुप्रेक्षा

जाताः पुष्टाः पुनर्नष्टाः, इति प्राणभृतां गणाः ।
न स्थिता इति तत्कुर्याः, स्थायिन्यात्मन् ! पदे मतिम् ॥१॥
स्थायीति क्षणमात्रं वा, ज्ञायते नहि जीवितम् ।
कोटेरप्यधिकं हन्त, जन्तूनां हि मनीषितम् ॥२॥
अवश्यं यदि नश्यन्ति, स्थित्वाऽपि विषयाश्चिरम् ।
स्वयं त्याज्यास्तथा हि स्यात् , मुक्तिः संसृतिरन्यथा ॥३॥
अनश्वरसुखावाप्तौ, सत्यां नश्वरकायतः ।
किं वृथैव नयस्यात्मन् ! क्षणं वा सफलं नय ॥४॥

## २ अशरणानुप्रेक्षा

पयोधौ नष्टनौकस्य, पतत्रेरिव जीव ! ते ।
सत्यपाये शरण्यं न, तत्स्वास्थ्ये हि सहस्रधा ॥५॥
आयुधीयैरतिस्निग्धैर्बन्धुभिश्चाभिसंवृतः ।
जन्तुः संरक्ष्यमाणोऽपि, पश्यतामेव नश्यति ॥६॥
मन्त्रयन्त्राद्योऽप्यात्मन् ! स्वतन्त्रं शरणं न ते ।
किन्तु सत्येव पुण्ये हि, नो चेत्के नाम तैः स्थिताः ॥७॥

## ३ संसारानुप्रेक्षा

नटवन्नैकवेषेण, भ्रमस्यात्मन् ! स्वकर्मतः ।
तिरश्चि निरये पापात्, दिवि पुण्याद् द्वयान्नरे ॥८॥

पञ्चानन इवामोक्षा–दसि पञ्जर आहितः ।
क्षणोऽपि दुःसहे देहे, देहिन् ! हन्त कथं वसेः ॥९॥

तन्नास्ति यन्न वै भुक्तं, पुद्गलेषु मुहुस्त्वया ।
तत्क्लेशस्तव किं तृप्त्यै, बिन्दुपीताम्बुधेरिव ॥१०॥

भुक्तोज्झितं तदुच्छिष्टं, भोक्तुमेवोत्सुकायसे ।
अभुक्तं मुक्तिसौख्यं त्व–मतुल्यं हन्त नेच्छसि ॥११॥

संसृतौ कर्म रागाद्यै–स्ततः कायान्तरं ततः ।
इन्द्रियानिन्द्रियद्वारा, रागाद्याश्चक्रकं पुनः ॥१२॥

सत्यनादौ प्रबन्धेऽस्मिन्, कार्यकारणरूपके ।
येन दुःखायते नित्य–मथ चात्मन् ! विमुञ्च तत् ॥१३॥

## ४ एकत्वानुप्रेक्षा

त्यक्तोपात्तशरीरादिः, स्वकर्मानुगुणं भ्रमन् ।
त्वमात्मन् ! एक एवाऽसि, जनने मरणेऽपि च ॥१४॥

बान्धवो हि श्मशानान्ता, गृह एवार्जितं धनम् ।
भस्मने गात्रमेकं त्वां, धर्म एव न मुञ्चति ॥१५॥

पुत्रमित्रकलत्राद्य–मन्यदप्यन्तरालजम् ।
नानुयायीति नाश्चर्यं, नन्वङ्गं सहजं तथा ॥१६॥

त्वमेव कर्मणां कर्ता, भोक्ता च फलसन्ततेः ।
भोक्ता च तात ! किं मुक्तौ, स्वाधीनायां न चेष्टते ॥१७॥

अज्ञातं कर्मणैवात्मन् ! स्वाधीनेऽपि सुखोदये ।
नेहसे तदुपायेषु, यतसे दुःखसाधने ॥१८॥

### ५ अन्यत्वानुप्रेक्षा

देहात्मकोऽहमित्यात्मन् ! जातु चेतसि मा कृथाः ।
कर्मतो ऽपृथक्त्वं ते, त्वं निचोलाऽसिसन्निभः ॥१९॥
अध्रुवत्वा–दमेध्यत्वा–दचित्त्वाच्च नान्यदङ्गकम् ।
चित्वनित्यत्वमेध्यत्वै–रात्मन् ! नन्योऽसि कायतः ॥२०॥
द्वये स्वयं मती बुद्धिर्यत्नेनाप्यसती शुभे ।
तद्धेतु कर्म तद्धन्त–मात्मानमपि साधयेत् ॥२१॥

### ६ अशुचित्वानुप्रेक्षा

मेध्यानामपि वस्तूनां, यत्सम्पर्कादमेध्यता ।
तद्गात्रमशुचीत्येतत्, किं नाल्पमलसंभवम् ॥२२॥
अस्पष्टं दृष्टमङ्गं हि, सामर्थ्याद् कर्मशिल्पिनः ।
रम्यमूहे किमन्यत् स्यान्, मलमांसास्थिमज्जतः ॥२३॥
दैवादन्तःस्वरूपं चेद्, बहिर्देहस्य किं परैः ।
आस्तामनुभवेच्छेय–मात्मन् ! को नाम पश्यति ॥२४॥
एवं पिशितपिण्डस्य, क्षयिणोऽक्षयशंकृतः ।
गात्रस्यात्मन् ! क्षयात् पूर्वं, तत्फलं प्राप्य तत्यज ॥२५॥
आत्तसारं वपुः कुर्यात्, तथात्मंस्तत्क्षयेऽप्यभीः ।
आत्तसारेक्षुदाहेऽपि, नहि शोचन्ति मानवाः ॥२६॥

### ७ आस्रवानुप्रेक्षा

अजस्रमास्रवन्त्यात्मन्, ! दुर्मोचाः कर्मपुद्गलाः ।
तैः पूर्णस्त्वमधोऽधः स्या-ज्जलपूर्णो यथा प्लवः ॥२७॥
तन्निदानं तवैवात्मन्, ! योगभावौ सदातनौ ।
तौ विद्धि सपरिस्पन्दं, परिणामं शुभाशुभं ॥२८॥
आस्रवोऽयममुष्येति, ज्ञात्वात्मन् ! कर्मकारणे ।
तन्निमित्तैर्धुर्या—दपवाह्योर्ध्वगो भव ॥२९॥

### ८ संवरानुप्रेक्षा

संरक्ष्य समितिं गुप्ति—मनुप्रेक्षापरायणः ।
तपःसंयमधर्मात्मा, त्वं स्या जितपरीषहः ॥३०॥
एवं च त्वयि सत्यात्मन्, ! कर्मास्रवनिरोधनात् ।
नीरन्ध्रपोतवद्भूया, निरपायो भवाम्बुधौ ॥३१॥
विकथादिविमुक्तस्त्व—मात्मभावनयान्वितः ।
त्यक्तबाह्यस्पृहो भूया, गुप्त्याद्यास्ते करस्थिताः ॥३२॥
एवमक्लेशगम्येऽस्मिन्, —नात्माधीनतया सदा ।
श्रेयोमार्गे मतिं कुर्याः, किं बाह्ये तापकारिणि ॥३३॥
शुष्कनिर्ग्रन्थतो बाह्ये, मुह्यतस्तव हृद्व्यथा ।
प्रत्याक्षितैव न्वात्मन् !, प्रत्यक्षनिरयोचिता ॥३४॥

### ९ निर्जरानुप्रेक्षा

रत्नत्रयप्रकर्षेण, बद्धकर्मक्षयोऽपि ते ।
आध्मातः कथमप्यग्नि—र्दाह्यं किं वावशेषयेत् ॥३५॥

क्षयादनास्रवाच्चात्मन् ! कर्मणामसि केवली ।
निर्गमे चाप्रवेशे च, धाराबन्धे कुतो जलम् ॥३६॥
रत्नत्रयस्य पूर्तिश्च, त्वयाऽऽत्मन् ! सुलभैव सा ।
मोहक्षोभविहीनस्य, परिणामो हि निर्मलः ॥३७॥
परिणामविशुद्ध्यर्थं, तपो बाह्यं विधीयते ।
न हि तण्डुलपाकः स्यात्, पावकादिपरिक्षये ॥३८॥
परिणामविशुद्धिश्च, बाह्ये स्यान्निःस्पृहस्य ते ।
निःस्पृहत्वं तु सौख्यं तद्, बाह्ये मुह्यसि किं मुधा ॥३९॥
गुप्तेन्द्रियः क्षणं वात्मन्, ! नात्मन्यात्मानमात्मना ।
भावयन् पश्य तत्सौख्य,-मात्मनो निःश्रेयसादिकम् ॥४०॥
अनन्तं सौख्यमात्मोत्थ-मस्तीत्यत्र हि सा प्रमा ।
शान्तस्वान्तस्य या प्रीतिः, स्वसंवेदनगोचरा ॥४१॥

## १० लोकानुप्रेक्षा

प्रसारिताङ्घ्रिणा लोकः, कटिनिक्षिप्तपाणिना ।
तुल्यः पुंसोर्ध्वमध्याधो, त्रिभागस्त्रिमरुद्धृतः ॥४२॥
जन्ममृत्योः पदे ह्यात्मन् !, असंख्यातप्रदेशके ।
लोके नायं प्रदेशोऽस्ति, यस्मिन्नाभूरनन्तशः ॥४३॥
सत्यज्ञाने पुनश्चात्मन् ! पूर्ववत् संसरिष्यसि ।
कारणेऽजृम्भमाणेऽपि नहि कार्यपरिक्षयः ॥४४॥

यतस्व तत्तपस्यात्मन्, ! मुक्त्वा मुग्धोचितं सुखम् ।
चिरस्थाय्यन्धकारोऽपि, प्रकाशे हि विनश्यति ॥४५॥

११ बोधिदुर्लभानुप्रेक्षा

भव्यत्वं कर्मभूजन्म, मानुष्यं स्वक्षवश्यता ।
दुर्लभं ते क्रमादात्मन् !, समवायस्तु किं पुनः ॥४६॥

व्यर्थः स समवायोऽपि, तवात्मन् ! धर्मधीर्न चेत् ।
कणिशोद्गमवैधुर्ये, कैदारादिगुणेन किम् ॥४७॥

तदात्मन् ! दुर्लभं गात्रं, धर्मार्थं मूढ ! कल्प्यताम् ।
भस्मने दहतो रत्नं, मूढ ! कः स्यात् परो जनः ॥४८॥

देवता भविता श्वाऽपि, देवः श्वा धर्मपापतः ।
तं धर्मं दुर्लभं कुर्या, धर्मो हि भुवि कामधुक् ॥४९॥

भव्यस्य बाह्यचित्तस्य, सर्वसत्त्वानुकम्पिनः ।
करणत्रयशुद्धस्य, तवात्मन् ! बोधिरेधताम् ॥५०॥

१२ धर्मानुप्रेक्षा

पश्यात्मन् ! धर्ममाहात्म्यं, धर्मकृत्यो न शोचति ।
विश्वैर्विश्वस्यते चित्रं, स हि लोकद्वये सुखी ॥५१॥

तवात्मन् ! आत्मनीनेऽस्मिन् जैनधर्मेऽतिनिर्मले ।
स्थवीयसी रुचिः स्थेया,-दामुक्तेर्मुक्तिदायिनी ॥५२॥

इति द्वादशानुप्रेक्षाः

श्रीसोमदेवसूरिविरचिता

# द्वादशानुप्रेक्षाः

## अनित्यानुप्रेक्षा १

उत्सृज्य जीवितजलं बहिरन्तरेते ।
रिक्ता विशन्ति महतो जलयन्त्रकल्पाः ॥
एकोद्यमं जरति यूनि महत्यणौ च ।
सर्वंकषः पुनरयं यतते कृतान्तः ॥१॥

लावण्ययौवनमनोहरणीयताद्याः ।
कायेष्वमी यदि गुणाश्चिरमावसन्ति ॥
सन्तो न जातु रमणीरमणीयसारं ।
संसारमेनमवधीरयितुं यतन्ते ॥२॥

उच्चैःपदं नयति जन्तुमधः पुनस्तं ।
वात्येव रेणुनिचयं चपला विभूतिः ॥
आमन्त्यतीव जनता वनितासुखाय ।
ताः सूतवत् करगता अपि विप्लवन्ते ॥३॥

शूरं विनीतमिव सज्जनवत् कुलीनं ।
विद्यामहान्तमिव धार्मिकमुत्सृजन्ती ॥
चिन्ताज्वरप्रसवभूमिरियं हि लोके ।
लक्ष्मीः खलक्षणसखी कलुषीकरोति ॥४॥

वाचि प्रबोधंशि गता-वलकावलीषु ।
यासां मनःकुटिलतास्तटिनीतरङ्गाः ॥
अन्तर्न मान्त इव दृष्टिपथे प्रयाताः ।
कस्ताः करोतु सरला, स्तरलायताक्षीः ॥५॥
संहारबद्धकलस्य यमस्य लोके ।
कः पश्यतोहरविधेरवधिं प्रयातः ॥
यस्माज्जगत्त्रयपुरीपरमेश्वरोऽपि ।
तत्राऽहितोद्यमगुणो विधुराबभानः ॥६॥
इत्थं क्षणक्षयहुताशमुखे पतन्ती ।
वस्तूनि वीक्ष्य परितः सुकृती यतात्मा ॥
तत्कर्म किञ्चिदनुसर्तुमयं यतेत ।
यस्मिन्नसौ नयनगोचरतां न याति ॥७॥

अशरणानुप्रेक्षा २

दक्षोदयेऽर्थनिचये हृदये स्वकार्यं ।
सर्वः समाहितमतिः पुरतः समास्ते ॥
जाते त्वपायसमयेऽम्बुपतौ पतत्रेः ।
पोतादिव द्रुततरः शरणं न तेऽस्ति ॥८॥
बन्धुव्रजैः सुभटकोटिभिरामवर्गै- ।
मन्त्रास्त्रतन्त्रविधिभिः परिरक्ष्यमाणः ॥
जन्तुर्बलादधिबलोऽपि कृतान्तदूतै- ।
रानीयते यमवशाय वराक एकः ॥९॥

संसीदतस्तव न जातु समस्ति शास्ता ।
त्वत्तः परः परमवाप्तसमग्रबोधे: ॥
तस्यां स्थिते त्वयि यतो दुरितोपताप-।
सेनेयमेव सुविधे ! विधुराश्रया स्यात् ॥१०॥

संसारानुप्रेक्षा ३

कर्मार्पितं क्रमगतिः पुरुषः शरीरम् ।
एकं त्यजत्यपरमाभजते भवाब्धौ ॥
शैलूषयोषिदिव संसृतिरेवमेषा ।
नाना विडम्बयति चित्रकरैः प्रपञ्चैः ॥११॥
दैवाद्धनेष्वधिगतेषु पटुर्न कायः ।
काये पटौ न पुनरायुरवाप्तवित्तम् ॥
इत्थं परस्परहतात्मभिराप्तधर्मैः ।
लोकं सुदुःखयति जन्मकरः प्रबन्धः ॥१२॥
आस्तां भवान्तरविधौ सुविपर्ययोऽयम् ।
अत्रैव जन्मनि नृणामधरोच्चभावः ॥
अल्पः पृथुः पृथुरपि क्षणतोऽल्प एव ।
स्वामी भवत्यनुचरः स च तत्पदार्हः ॥१३॥
वैचित्र्यमित्थमनुभूय भवाम्बुराशेः ।
आतङ्कताण्डवविडम्बितजन्तुपारेः ॥
को नाम जन्मविषपादपपुष्पकल्पैः ।
स्वं मोहयेन् मृगदृशां कृतधीः कटाक्षैः ॥१४॥

## एकत्वानुप्रेक्षा ४

एकस्त्वमाविशसि जन्मनि संक्षये च ।
भोक्तुं स्वयं स्वकृतकर्मफलानुबन्धम् ॥
अन्यो न जातु सुखदुःखविधौ सहायः ।
स्वाजीवनाय मिलितं विटपेटकं ते ॥१५॥

बाह्यः परिग्रहविधिस्तव दूरमास्तां ।
देहोऽयमेति न समं सहसम्भवोऽपि ॥
किं ताम्यसि त्वमनिशं क्षणदृष्टनष्टैः ।
दारात्मजद्रविणमन्दिरमोहपाशैः ॥१६॥

संशोच्य शोकविवशो दिवसं तमेकम्
अन्येद्युरादरपरः स्वजनस्तवार्थे ॥
कायोऽपि भस्म भवति प्रचयाच्चिताग्नेः ।
संसारयन्त्रघटिकाघटने त्वमेकः ॥१७॥

एष स्वयं त्वचिचलैर्नुकर्मजालैः ।
लूतेव वेष्टयति नष्टमतिः स्वमेकः ॥
पुण्यात् पुनः प्रशमतन्तुकृतावलम्बः ।
तद्धाम धावति विधूतसमस्तबाधम् ॥१८॥

## पृथक्त्वानुप्रेक्षा ५

देहात्मकोऽहमिति चेतसि मा कृथास्त्वम् ।
त्वत्तो यतोऽस्य वपुषः परमो विवेकः ॥

त्वं धर्मशर्मवसतिः परितोऽवसायः ।
कायः पुनर्जडतया गतधीनिकायः ॥१९॥
आसीदति त्वयि सति प्रतनोति कायः ।
क्रान्ते तिरोभवति भूपवनादिरूपैः ॥
भूतात्मकस्य मृतवच्च सुखादिभावः ।
तस्मात् कृती करणतः पृथगेव जीवः ॥२०॥
सानन्दमव्ययमनादिमनन्तशक्तिम् ।
उद्द्योतिनं निरुपलेपगुणं प्रकृत्या ॥
कृत्वा जडाश्रयमिमं पुरुषं समुद्राः ।
सन्तापयन्ति रसवद्दुरिताग्नयोऽमी ॥२१॥
कर्मास्रवानुभवनात् पुरुषः परोऽपि ।
प्राप्नोति पातमशुभासु भवावनीषु ॥
तस्मात्तयोः परमभेदविदो विदग्धाः ।
श्रेयस्तदा दधतु यत्र न जन्मयोगः ॥२२॥

अशुच्यनुप्रेक्षा ६

आधीयते यदिह वस्तु गुणाय कान्तम् ।
काये तदेवमुहुरेत्यपवित्रभावम् ॥
छायाप्रतारितमतिर्मलरन्ध्रबन्धम् ।
किं जीव ! लालयसि भङ्गुरमेतदङ्गम् ॥२३॥
योषिद्भिरादृतकरं कृतमण्डनश्रीः ।
यः कामचामररुचिस्तव केशपाशः ॥

सोऽयं त्वयि श्रवणगोचरतां प्रपन्ने ।
प्रेतावनीषु वनवायसवासगोऽभूत् ॥२४॥
अन्तर्बहिर्यदि भवेद् वपुषः शरीरम् ।
दैवात् तदानुभवनं ननु दूरमास्ताम् ॥
कौतूहलादपि यदीक्षितुमुत्सहेत ।
कुर्यात्सदाभिरतिमत्र भवान् शरीरे ॥२५॥
तस्मान्निसर्गमलिनादपि लब्धतत्त्वाः ।
कीनाशकेलिमनवाप्तधियोऽचिराय ॥
कायादतः किमपि तत्फलमर्जयन्तु ।
यस्मादनन्तसुखसस्यविभूतिरेषा ॥२६॥

आस्रवानुप्रेक्षा ७

अन्तःकषायकलुषोऽशुभयोगसङ्गात् ।
कर्माण्युपार्जयसि बन्धनिबन्धनानि ॥
रज्जूः करेणुवशगः करटी यथैताः ।
त्वं जीव ! मुञ्च तदिमानि दुरीहितानि ॥२७॥
संकल्पकल्पतरुसंश्रयणात्त्वदीयं ।
चेतो निमज्जति मनोरथसागरेऽस्मिन् ॥
तत्रार्थतस्तव चकास्ति न किञ्चनाऽपि ।
पक्षे परं भवसि कल्मषसंश्रयस्य ॥२८॥
सेर्ष्यं विभूतिषु मनीषितसंश्रयाणाम् ।
चक्षुर्भवेत्तव निजार्चिषु मोघवाञ्छम् ॥

पापागमाय परमेव भवेद् विमूढ ! ।
कामात् कुतः सुकृतदूरभसां हितानि ॥२९॥
दौर्विध्यदग्धमनसोऽन्तरुपात्तभुक्तेः ।
चित्तं यथोल्लसति ते स्फुरितोत्तरङ्गम् ॥
धाम्नि स्फुरेद् यदि तथा परमात्मसंज्ञे ।
कौतस्कुती तव भवेद्विफला प्रसूतिः ॥३०॥

संवरानुप्रेक्षा ८

आगच्छतोऽभिनवकार्मणरेणुराशेः ।
जीवः करोति यदवस्खलनं वितन्द्रः ॥
सच्छत्रचामरधरैः प्रणिधानहस्तैः ।
सन्तो विदुस्तमिह संवरमात्मनीनम् ॥३१॥
यस्त्वां विचिन्तयति सञ्चरते विचारैः ।
क्षान्तिं चिनोति परिमुञ्चति चण्डभावम् ॥
चेतो निकुञ्चति समञ्चति कुञ्चमुच्चैः ।
स क्षेत्रनाथ ! निरुणद्धि कृती रजांसि ॥३२॥
नीरन्ध्रसन्धिरवधीरितनीरपूरः ।
पोतः सरित्पतिमपैति यथानपायः ॥
जीवस्तथा क्षपितपूर्वतमःप्रतानः ।
क्षीणास्रवश्च परमं पदमाश्रयेत ॥३३॥

निर्जरानुप्रेक्षा ९

आपातरम्यरचनैर्विरसावसानैः ।
जन्मोद्भवैः सुखलवैः स्खलितान्तरङ्गः ॥

दुःखानुषङ्गकरमर्जितवान् यदेनः ।
तदेव सहस्व हतजीव ! नवप्रयातम् ॥२४॥
कालुष्यमेषि यदिह स्वयमात्मकामो ।
जागर्ति तत्र ननु कर्म पुरातनं ते ॥
योऽहिं विवर्धयति कोऽपि विमुग्धबुद्धिः ।
स्वस्योदयाय स नरः प्रवरः कथं स्यात् ? ॥२५॥
आतङ्कपावकशिखाः सरसावलेखाः ।
स्वस्थे मनाग् मनसि ते लघु विस्मरन्ति ॥
तत्कालजातमतिविस्फुरितानि पश्चात् ।
जीवान्यथा यदि भवन्ति कुतोऽप्रियं ते ॥२६॥

लोकानुप्रेक्षा १०

मध्याधरोर्ध्वरचनः पवनत्रयान्तः ।
तुल्यः स्थितेन जघनस्थकरेण पुंसा ॥
एकस्थितिस्तव निकेतनमेष लोकः ।
त्रस्यप्रकीर्णजठरोऽग्रनिषण्णमोक्षः ॥२७॥
कर्ता न तावदिह कोऽपि धियेच्छया वा ।
दृष्टोऽन्यथा कटकृतावपि स प्रसङ्गः ॥
कार्यं किमत्र सदनादिषु तक्षकाद्यैः ।
आहृत्य चेत् त्रिभुवनं पुरुषः करोति ॥२८॥
त्वं कल्मषावृतमतिर्निरये तिरश्चि ।
पुण्योचितो दिवि नृषु द्वयकर्मयोगात् ॥

इत्थं निषीदसि जगत्त्रयमन्दिरेऽस्मिन् ।
स्वैरं प्रचारविधये तव लोक एषः ॥३९॥
अत्राऽस्ति जीव ! न च किञ्चिदभुक्तमुक्तम् ।
स्थानं त्वया निखिलतः परिशीलनेन ॥
तत्केवलं विगलिताऽखिलकर्मजालम् ।
स्पृष्टं कुतूहलधियाऽपि न जातु धाम ॥४०॥

बोध्यनुप्रेक्षा १०

संसारसागरमिमं भ्रमता नितान्तम् ।
जीवेन मानवभवः समवापि दैवात् ॥
तत्राऽपि यद् भुवनमान्यकुले प्रसूतिः ।
सम्यक्कृतिश्च तदिहान्धकवर्तकीयम् ॥४१॥
कृच्छ्राद्वनस्पतिगतेश्च्युत एष जीवः ।
श्वभ्रेषु कल्मषवशेन पुनः प्रयाति ॥
तेभ्यः परस्परविरोधि मृगप्रसूता–
वस्याः पशुप्रतिनिभेषु कुमानवेषु ॥४२॥
संसारयन्त्रमुदयास्तघटीपरीतं ।
सातानतामसगुणं भृतमाधितोयैः ॥
इत्थं चतुर्गतिसरित्परिवर्तमध्यम् ।
आत्राहयेत् स्वकृतकर्मफलानि भोक्तुम् ॥४३॥
आतङ्कशोकभयभोगकलत्रपुत्रैः ।
यः खेदयेन् मनुजजन्म मनोरथाप्तम् ॥

नूनं स भस्मकृतधीरिह रत्नराशिम् ।
उद्दीपयेद्-तनुमोहमलीमसात्मा ॥४४॥
बाह्यप्रपञ्चविमुखस्य शमोन्मुखस्य ।
भूतानुकम्पनरुचः प्रियतत्त्ववाचः ॥
प्रत्यक् प्रवृत्तहृदयस्य जितेन्द्रियस्य ।
भव्यस्य बोधिरियमस्तु पदाय तस्मै ॥४५॥

धर्मानुप्रेक्षा १२

श्रद्धाऽभिसन्धिरवधूतबहिःसमीहः ।
तत्त्वावसायसलिलाहितमूलबन्धः ॥
आत्मायमात्मनि तनोति फलद्वयार्थी ।
धर्मं तमाहुरमृतोपमसस्यमाशाः ॥४६॥
मैत्रीदयादमशमागमनिर्वृतानां ।
बाह्येन्द्रियप्रसरवर्जितमानसानाम् ॥
विद्याप्रभाप्रहतमोहमहाग्रहाणां ।
धर्मः परापरफलः सुलभो नराणाम् ॥४७॥
इष्टाः फलैः कलयति प्ररुणद्धि बाधाः ।
सृष्टेरसाम्यविभुरभ्युदयादिभिर्यः ॥
ज्योतींषि द्रवयति चात्मसमीहितेषु ।
धर्मः स शर्मनिधिरस्तु सतां हिताय ॥४८॥
देहोपहारकृतपैः स्वपरोपतापैः ।
कृत्वाऽध्वरेश्वरमिषं विदलन् मनीषाः ॥

धर्मैषिणो य इह केचन मान्द्यभाजः ।
ते जातजीवितधियो विषमापिबन्ति ॥४९॥

येऽन्यश्च मन्त्रमहिमेक्षणमुग्धबोधाः ।
शर्वैषिणः पुनरतः शिवतां गृणन्ति ॥

ते नावितारणदृशो दृषदोऽवलम्ब्य ।
दुष्पारमम्बुधिजलं परिलङ्घयन्ति ॥५०॥

धर्मश्रुतेरिह परत्र च येऽविचाराः ।
संदिह्य तामसदृशः सततं यतन्ते ॥

दुग्धाभिधानसमताविलबुद्धयस्ते ।
नूनं गवार्करसपानपरा भवन्तु ॥५१॥

अज्ञस्य शक्तिरसमर्थविधेर्निबोधः ।
तौ चारुचेरियममू तुदती न किञ्चित् ॥

अन्धाङ्घ्रिहीनहतबाञ्छितमानसानाम् ।
दृष्टा न जातु हितभूरिरनन्तराया ॥५२॥

चार्व्यां रुचौ तदुचिताचरणे च नृणाम् ।
दृष्टार्थसिद्धिरगदादिनिषेवणेषु ॥

तस्मात् परापरफलप्रदधर्मकामाः ।
सन्तस्त्रयावगमनीतिपरा भवन्तु ॥५३॥

इति द्वादशानुप्रेक्षा

# पूज्यपादविरचिता द्वादशानुप्रेक्षा

सदा द्रष्टव्यानुप्रेक्षा दिध्यासुर्धर्म्यमुत्तमम् ।
पारिकर्मितास्तस्य शुभा द्वादशभावनाः ॥

अनित्यभावना—इमानि शरीरेन्द्रियविषयोपभोगपरिभोगद्रव्याणि, समुदायरूपाणि, जलबुद्बुदवदनवस्थितस्वभावानि, गर्भादिष्ववस्थाविशेषेषु, सदोपलभ्यमानसंयोगविपर्ययाणि, मोहादत्राज्ञो नित्यतां मन्यते । न किञ्चित् संसारे समुदितं ध्रुवमस्ति आत्मनो ज्ञानदर्शनोपयोगस्वभावादन्यदिति चिन्तनम् अनित्यतानुप्रेक्षा ॥ एवं ह्यस्य चिन्तयतस्तेष्वभिष्वङ्गाभावाद् भुक्तोज्झितगन्धमाल्यादिष्विव वियोगकालेऽपि विनिपातो नोत्पद्यते ॥१॥

अशरणभावना—यथामृगशावस्यैकान्ते बलवता क्षुधितेनामिषैषिणा व्याघ्रेणाभिभूतस्य न किञ्चिच्छरणमस्ति तथा जन्मजरामृत्युव्याधिप्रभृतिव्यसनमध्ये परिभ्रमतो जन्तोः शरणं न विद्यते ॥ परिपुष्टमपि शरीरं भोजनं प्रति सहायीभवति न व्यसनोपनिपाते । यत्नेन सञ्चितोऽर्थोऽपि न भवान्तरमनुगच्छति । संविभक्तसुखदुःखाः सुहृदोऽपि न मरणकाले परित्रायन्ते । बान्धवाः समुदिताश्च रुजा परीतं न परिपालयन्ति ॥ अस्ति चेत्सुचरितो धर्मो व्यसनमहार्णवे तारणोपायो भवति । मृत्युना नीयमानस्य सहस्रनयनादयोऽपि न शरणम् । तस्माद्

भवव्यसनसङ्कटे धर्म एव शरणं सुहृदर्थोऽप्यनपायी, नान्यत् किञ्चिच्छरणमिति भावना अशरणानुप्रेक्षा। एवं ह्यस्याध्यवस्यतो नित्यमशरणोऽस्मीति भृशमुद्विग्नस्य सांसारिकेषु भावेषु ममत्वनिरासो भवति। भगवदर्हत्सर्वज्ञप्रणीत एव मार्गे प्रतिपन्नो भवति ॥२॥

संसारभावना—कर्मविपाकवशादात्मनो भवान्तरावाप्तिः संसारः। स पुरस्तात् पञ्चविधपरिवर्तनरूपेण व्याख्यातः। तस्मिन्ननेकयोनिकुलकोटिबहुशतसहस्रसङ्कटे संसारे परिभ्रमन् जीवः कर्मयन्त्रानुप्रेरितः पिता भूत्वा भ्राता पुत्रः पौत्रश्च भवति। माता भूत्वा भगिनी भार्या दुहिता च भवति। स्वामी भूत्वा दासो भवति। दासो भूत्वा स्वाम्यपि भवति, नट इव रङ्गे। अथवा किं बहुना स्वयमात्मनः पुत्रो भवतीत्येवमादिसंसारस्वभावचिन्तनं संसारानुप्रेक्षा। एवं ह्यस्य भावयतः संसारदुःखभयादुद्विग्नस्य ततो निर्वेदो भवति। निर्विण्णश्च संसारप्रहाणाय प्रतियतते ॥३॥

एकत्वभावना—जन्मजरामरणानुवृत्तिमहादुःखानुभवं प्रति एक एवाऽहं, न कश्चिन्मे स्वः परो वा विद्यते। एक एव जायेऽहम्। एक एव म्रिये। न मे कश्चित् स्वजनः परजनो वा व्याधिजरामरणादीनि दुःखान्यपहरति। बन्धुमित्राणि श्मशानं नातिवर्तन्ते। धर्म एव मे सहायः सदा अनपायीति चिन्तनमेकत्वानुप्रेक्षा। एवं ह्यस्य भावयतः स्वजनेषु प्रीत्यनुबन्धो न

भवति । परजनेषु च द्वेषानुबन्धो नोपजायते । ततो निःसङ्गता-मभ्युपगतो मोक्षायैव घटते ॥४॥

अन्यत्वभावना—शरीरादन्यत्वचिन्तनमन्यत्वानुप्रेक्षा । तद्यथा बन्धं प्रत्येकत्वे सत्यपि लक्षणभेदादन्योऽहमैन्द्रियकं शरीर मनिन्द्रियोऽहमज्ञं शरीरं ज्ञोऽहमनित्यं शरीरं नित्योऽहमाद्य-न्तवच्छरीरमनाद्यन्तोऽहं, बहूनि मे शरीरशतसहस्राण्यतीतानि संसारे परिभ्रमतः । स एवाहमन्यस्तेभ्य इत्येवं शरीरादप्यन्यत्वं मे किमङ्ग ! पुनर्बाह्येभ्यः परिग्रहेभ्य इत्येवं ह्यस्य मनः समा-दधानस्य शरीरादिषु स्पृहा नोत्पद्यते । ततस्तत्त्वज्ञानभावना-पूर्वके वैराग्यप्रकर्षे सति आत्यन्तिकस्य मोक्षसुखस्याप्ति-र्भवति ॥५॥

अशुचिभावना—शरीरमिदमत्यन्ताशुचियोनि, शुक्रशोणि-ताशुचिसंवर्धितमवस्करवदशुचिभाजनं, त्वङ्मात्रप्रच्छादितमति-पूतिरसनिष्यन्दिस्रोतोबिलमङ्गारवदात्मभावमाश्रितमप्याश्वेवा-पादयति । स्नानानुलेपनधूपप्रघर्षवासमाल्यादिभिरपि न शक्य-मशुचित्वमपहर्तुमस्य । सम्यग्दर्शनादि पुनर्भाव्यमानं जीवस्या-त्यन्तिकीं शुद्धिमाविर्भावयतीति तत्त्वतो भावनमशुचित्वानुप्रेक्षा। एवं ह्यस्य संस्मरतः शरीरनिर्वेदो भवति । निर्विण्णश्च जन्मो-दधितरणाय चित्तं समाधत्ते ॥६॥

आस्रवभावना—आस्रवसंवरनिर्जराः पूर्वोक्ता अपि इहो-पन्यस्यन्ते तद्गतगुणदोषभावनार्थं । तद्यथा-आस्रवा इहामुत्रापा-

यमुक्ता महानदीस्रोतोवेगतीक्ष्णा इन्द्रियकषायाव्रतादयः। तत्रेन्द्रियाणि तावत्स्पर्शनादीनि वनगजवायसपन्नगपतङ्गहरिणादीन् व्यसनार्णवमवगाहयन्ति। तथा कषायादयोऽपीह वधबन्धनपरिक्लेशादीन् जनयन्ति अमुत्र च नानागतिषु बहुविधदुःखप्रज्वलितासु भ्रमयन्तीत्येवमास्रवदोषानुचिन्तनमास्रवानुप्रेक्षा॥ एवं ह्यस्य चिन्तयतः क्षमादिषु श्रेयस्त्वबुद्धिर्न प्रच्यवते। सर्व एते आस्रवदोषाः कूर्मवत्संवृतात्मनो न भवन्ति ॥७॥

संवरभावना—यथा महार्णवे नावो विवरपिधानेऽसति क्रमात् स्रुतजलाभिप्लवे सति तदाश्रयाणां विनाशोऽवश्यम्भावी, छिद्रपिधाने च निरुपद्रवमभिलषितदेशान्तरप्रापणं तथा कर्मागमद्वारसंवरणे सति नास्ति श्रेयः प्रतिबन्ध इति संवरगुणानुचिन्तनं संवरानुप्रेक्षा। एवं ह्यस्य चिन्तयतः संवरे नित्योद्युक्तता भवति। ततश्च निःश्रेयसपदप्राप्तिरिति ॥८॥

निर्जराभावना—निर्जरा वेदनाविपाकजा इत्युक्तम्। सा द्वेधा-अबुद्धिपूर्वा कुशलमूला चेति। तत्र नरकादिषु गतिषु कर्मफलविपाकजा अबुद्धिपूर्वा सा अकुशलानुबन्धा। परीषहजये कृते कुशलमूला सा शुभानुबन्धा निरनुबन्धा चेति। इत्येवं निर्जराया गुणदोषभावनं निर्जरानुप्रेक्षा। एवं ह्यस्यानुस्मरतः कर्मनिर्जरायै प्रवृत्तिर्भवति ॥९॥

लोकभावना—लोकसंस्थानादिविधिर्व्याख्यातः। समन्तादनन्तस्यालोकाकाशस्य बहुमध्यदेशभाविनो लोकस्य संस्था-

नादिविधिव्यपिक्ष्यातः। तत्स्वभावानुचिन्तनं लोकानुप्रेक्षा। एवं ह्यस्याध्यवस्यतस्तत्त्वज्ञानविशुद्धिर्भवति ॥१०॥

बोधिदुर्लभभावना—एकस्मिन्निगोतशरीरे जीवाः सिद्धानामनन्तगुणाः एवं सर्वलोको निरन्तरं निचितः स्थावरैरतस्तत्र त्रसता बालुकासमुद्रे पतिता वज्रसिकताकणिकेव दुर्लभा। तत्र च विकलेन्द्रियाणां भूयिष्ठत्वात् पञ्चेन्द्रियता गुणेषु कृतज्ञता इव कृच्छ्रलभ्या। तत्र च तिर्यक्षु पशुमृगपक्षिसरीसृपादिषु बहुषु सत्सु मनुष्यभावश्चतुष्पथे रत्नराशिरिव दुरासदः। तत्प्रच्यवे च पुनस्तदुपपत्तिर्दग्धतरुपुद्गलतद्भावोपपत्तिवद्दुर्लभा। तल्लाभे च देशकुलेन्द्रियसम्पन्नीरोगत्वान्युत्तरोत्तरतोऽतिदुर्लभानि। सर्वेष्वपि तेषु लब्धेषु सद्धर्मप्रतिलम्भो यदि न स्यात् व्यर्थं जन्म, वदनमिव दृष्टिविकलं। तमेवं कृच्छ्रलभ्यं धर्ममवाप्य विषयसुखे रञ्जनं भस्मार्थं चन्दनदहनमिव विफलम् ॥ विरक्तविषयसुखस्य तु तपोभावनाधर्मप्रभावनासुखमरणादिलक्षणः समाधिर्दुरवापः ॥ तस्मिन् सति बोधिलाभः फलवान् भवतीति चिन्तनं बोधिदुर्लभानुप्रेक्षा। एवं ह्यस्य भावयतो बोधिं प्राप्य प्रमादो न कदाचिदपि भवति ॥११॥

धर्मभावना—अयं जिनोपदिष्टो धर्मोऽहिंसालक्षणः सत्याधिष्ठितो विनयमूलः क्षमाबलो ब्रह्मचर्यगुप्त, उपशमप्रधानो, नियतिलक्षणो, निष्परिग्रहतालम्बनः। तस्यालाभादनादिसंसारे जीवाः परिभ्रमन्ति दुष्कर्मविपाकजं दुःखमनुभवन्तः। अस्य

पुनः प्रसिद्धमे निर्विधास्सुदक्षणादिर्दृष्टा निःश्रेयसोपलब्धि-र्नियतेति चिन्तनं धर्मस्वाख्यातत्वानुप्रेक्षा । एवं ह्यस्य चिन्तयतो धर्मानुरागात् सदा प्रतियत्नपरो भवति ॥१२॥

इति द्वादशानुप्रेक्षाः

## श्रीवीरनन्द्याचार्यप्रणीताः द्वाविंशतिपरीषहाः

क्षुत्तृट्शीतमलोष्णदंशमशकै-र्यारोगशय्यातृण-
स्पर्श[1]क्लेशवधानलाभमरतिं, निर्दर्शनं स्त्रीक्लमं[2] ।
प्रज्ञाऽज्ञानभवौ सनाग्न्यशयनान् सत्कारयाञ्चानिष-
द्योद्भूतांश्च परीषहान् विजयते, यो वीर्यचर्यो[3] यतिः ॥१॥

१ क्षुधादिपरीषहजातक्लेशः । २ परीषहं । ३ वीर्याचारवान् ।

### १ क्षुधापरीषहः

क्षुत्तीक्ष्णानशनादिजाक्षनिकरं, स्वज्ञेयवीक्षाक्षमं[1] ।
स्वान्तं भ्रान्ततरं करोति बलवत् प्राणान् प्रयाणोन्मुखान् ॥
याऽन्याधीनजनैऽफलाऽतिसफला, [2]त्यागात् तपःपुष्टये,
तस्या[3]धृत्यमृताशनेन शमनं, कुर्वन् व्रती क्षुज्जयः ॥२॥

१ रूपादिकं ज्ञातुमसमर्थं । २ आहारनिवृत्तेः । ३ धैर्य ।

### २ तृषापरीषहः

चण्डश्चण्डकरः स्थलस्थितपयः, सञ्चारिणः प्राणिनो ।
भ्रष्टप्लुष्टतनूंस्तनोति नितरां, यस्मिंस्तपे[1] तापने ॥

१ ग्रीष्मे ।

तस्मिन् स्निग्धविरुद्धभोजनरुजा, ऽऽतापादिपुष्यत्तृषां ।
[2]त्यक्ते निःस्पृहतामृतेन कृतधी[3], र्मुष्णाति[4] तृष्णाजयः ॥३॥

२ परित्यक्तवस्तुनि । ३ कृते पुण्ये धीर्बुद्धिर्यस्य । ४ अपहरति ।

३ शीतपरीषहः

प्रोत्कम्पाद्धिमभीमशीतपवन, स्पर्शप्रभिन्नाङ्गिनो[1] ।
[2]यस्मिन् यान्त्यतिशीतखेदमवशाः, प्रालेयकालेऽङ्गिनः ॥
तस्मिन्नस्मरतः पुरा प्रियतमा,–श्लेषादिजातं सुखं,
योगागारनिरस्तशीतविकृते, [3]र्निर्वाससस्तज्जयः[4] ॥४॥

१ स्फुटितावयवाः । २ शिशिरकाले । ३ निर्ग्रन्थस्य । ४ शीत-परीषहजयः ।

४ मलपरीषहः

[1]प्राणाघातविभीतितस्तनुरति, त्यागाच्च भोगास्पृहः[2] ।
स्नानोद्वर्तनलेपनादिविगमात् प्रस्वेदपांशूदितम्[3] ॥
लोकानिष्टमनिष्टमात्मवपुष, यामादिमूलं मलं ।
[4]गात्रत्राणमिवादधाति वृजिनं[5], जेतुं [6]मलक्लेशजित् ॥५॥

१ प्राणिहिंसा । २ भोगेष्वस्पृहा यस्य स भोगास्पृहः । ३ घर्म-धूलि जातम् । ४ कवचं । ५ पापं । ६ स इत्यध्याहारः ।

५ उष्णपरीषहः

ग्रीष्मे शुष्यदशेषदेहिनिकरे, मार्तण्डचण्डांशुभिः ।
सन्तप्तात्मतनुस्तृषानशनरुक्क्लेशादिजातोष्णजं ॥
[1]शोषस्वेदविदाहखेद[2]अवशो,–नाप्तं पुराऽपि स्मरन् ।
तन्मुक्त्यै [3]निजभावभावनरतिः, स्यादुष्णजिष्णुर्व्रती ॥६॥

१ तालुशोषण । २ परवशेन । ३ स्वस्वरूपं ।

६ दंशमशकपरीषहः

शून्यागारदरीगुहादिशुचिनि, स्थाने विविक्ते स्थितः ।
तीक्ष्णैर्मत्कुणकीटदंशमशका, द्यैश्चण्डतुण्डैः कृतां ॥
स्वाङ्गार्तिपरदेहजार्चिमिव तां, यो मन्यमानो मुनिः ।
निःसङ्गःस सुखी च दंशमशक,-क्लेशक्षमी तं नुमः ॥७॥

७ चर्यापरीषहः

शार्दूलैर्मिलितेऽच्छभल्लभुजगाऽऽभोगे भयङ्कास्पदे ।
गन्धान्धद्विरदोत्करे करिरिपु, क्रीडैकनीडे घने ॥
स्वैरं कण्टककर्कारादिपरुषे[1], ऽप्यत्राणपाद[2]श्चरन् ।
एकः सिंह इवार्तिभीतिविजयी, [3]व्रज्यार्तिजित् संयमी ॥८॥

१ निष्ठुरे । २ पादत्राणरहितः । ३ ईर्यापरीषहजयी स्यात् ।

८ रोगपरीषहः

कण्डूया[1]गलगण्डपाण्डुदवथु[2],-ग्रन्थिज्वरश्लीपद[3]-।
श्लेष्मोदुम्बरकुष्ठपित्तपवन, श्वासादिरोगार्दितः[4] ॥
भिक्षुः क्षीणबलोऽपि भेषजसुहृन् मन्त्रानपेक्षः क्षमी ।
दुःकर्मारिविनिर्मितार्तिविजयी, स्याद् व्याधिबाधाजयः ॥९॥

१ गण्डमाला । २ दाह । ३ वल्मीकपादः । ४ पीडितः ।

९ शय्यापरीषहः

[1]झंझावातहतार्तकौशिक[2]शिवा[3],-फेत्कारघोरस्वरां ।
[4]शंपाक्रूररदां स्फुरद्रुचितडिज्-जिह्वां [5]क्षपाराक्षसीम् ॥

१ वृष्टिसहितः वायु झञ्झावातः । २ उलूकः ३ जम्बुकः ।
४ अशनिः । ५ रात्रि ।

यो तां द्वाग्गमयत्यसौ शयनजा–तायासजिद्वीरधीः ।
[6]ध्वान्तात्यन्त[7]करालभूधरदरी–देशे प्रसुप्तः क्षणम् ॥१०॥

६ अन्धकारः । ७ रौद्रपर्वततले ।

१० तृणस्पर्शपरीषहः

अन्तःसन् [1]श्रुतभावनानशनसद्, ध्यानाध्व[2]यानादिभिः ।
स्तोकं कालमतिश्रमापहृतये, शय्यानिषद्ये भजन् ॥
शुद्धोर्वीतृणपत्रसंस्तरशिला–पट्टेषु तत्पीडनः ।
कण्डूयादिसहोनयेदिह्ह्तृण–स्पर्शासही संयमी ॥११॥

१ स्वाध्यायः । २ मार्गगमनं ।

११ वधपरीषहः

दुष्टैः पूर्वभवापकारकलनात्, तज्जन्मवैरात् खलैः ।
म्लेच्छैर्निःकरुणैरकारणगुण–द्वैषैश्च पापात्मकैः ॥
देहच्छेदनभेदनादिविधिना, यो मार्यमाणोऽप्यलं ।
देहात्मा[1]त्मविभेदवेदनभव–क्षान्तिर्वधार्तिक्षमी ॥१२॥

१ शरीरात्मस्वरूपभेदज्ञानजनितक्षमावान् ।

१२ अलाभपरीषहः

[1]हंहो देह ! सहायतां तव समु–द्दिश्यैव पोष्यो मया ।
[2]वृद्धौमत्तपसो गृहावलिमतो[3], भ्रान्त्वाऽप्यनाप्तेऽशने ॥
[4]दोषः कोऽपि न विद्यते मम पुन, र्लाभादलाभे[5] क्षमा ।
[6]तां पूर्तिं प्रतनोत्यतः [7]प्रियतमैषैवेत्यलाभक्षमा ॥१३॥

१ भोः २ वृद्धौ । ३ कारणात् । ४ उपेक्षादिदोषः । ५ आहाराप्राप्ते । ६ तपोवृद्धि । ७ समाचीना

१३ अरतिपरीषहः

दुर्वारेन्द्रियषण्दरोगनिकर–क्रूरादेवाभोत्करैः[१] ।
प्रोद्भूतामरतिं व्रतोत्करपरि–[२]त्राणे गुणोत्पोषणे[३] ॥
[४]मंक्षु क्षीणतरां करोत्यरतिजिद्, वीरः स वन्द्यः सतां ।
यो दण्डत्रयदण्डनाहित[५]मतिः, सत्यप्रतिज्ञो व्रती ॥१४॥

१ समूहैः । २ रक्षायां । ३ विवर्धने । ४ शीघ्रं । ५ स्वीकृत ।

१४ अदर्शनपरीषहः

वर्ण्यन्ते बहवस्तपोऽतिशयजाः, सप्तर्द्धिपूजादयः ।
प्राप्ताः पूर्वतपोधनैरिति वचो, मात्रं तदद्याऽपि यत् ॥
तत्त्वज्ञस्य ममाऽपि तेषु नहि कोऽपीत्यार्तिसङ्गोज्झिता ।
चेतोवृत्तिरदर्शनपरीषहजयः, सम्यक्त्वसंशुद्धितः ॥१५॥

१५ स्त्रीपरीषहः

जेता चिरभवस्त्रयस्य जगतां, यासामपाङ्गेषुभिः ।
ताभिर्मत्तनितम्बिनीभिरभितः, [१]संलोभ्यमानोऽपि यः ॥
[२]तत्फल्गुत्वमवेत्य नैतिविकृतिं, तं [३]वर्ण्यधैर्येन्दिरम् ।
वन्दे स्त्र्याख्यजयं जयन्तमखिला–नर्थं कृतार्थं यतिम् ॥१६॥

१ लोभमुत्पाद्यमानः । २ तासामन्तःसाररहितत्वं । ३ श्रेष्ठधैर्यस्य लक्ष्मीर्यस्य ।

१६ प्रज्ञापरीषहः

प्रत्यक्षाऽक्रम[१]विश्ववस्तुविषय–ज्ञानात्मनःस्वात्मनो ।
गर्वः सर्वमतश्रुतज्ञ इति यः, प्राप्ते परोक्षे श्रुते ॥

१ युगपत् ।

सर्वस्मिन्नपि नो तनोति हृदये, लज्जां स किं[२]तामिति ।
प्रज्ञोत्कर्षमदापनोदनपरः, प्रज्ञार्तिजित्तत्त्ववित् ॥१७॥

२ अनिर्वचनीयां ।

१७ अज्ञानपरीषहः

ज्ञानध्यानरता मतिर्मम तप,-स्तीव्रं न चोत्पद्यते ।
ज्ञानं पूर्णमयं जडः पशुरिति, श्रोतुं वचोऽहं क्षमः ॥
नेत्यज्ञानपरीषहं स सहते, [१]प्रव्यक्तवस्तुस्थितिः ।
यः कार्यं[२] भवति स्वहेतुयुगले[३], सत्येव नेत्यन्यथा ॥१८॥

१ सुष्ठुज्ञातवस्तुस्वरूपः । २ प्रयोजन । ३ अन्तरङ्गबहिरङ्गकारणे

१८ नाग्न्यपरीषहः

[१]भूषा[२]वेश[२]विकार[३]शस्त्रसिचय[४]त्यागात् प्रशस्ताकृतेः ।
बालस्येव मनोजजातविकृति, श्चिरास्य लज्जेति ताम् ॥
हित्वा मातृसमानमेव सकलं, कान्ताजनं पश्यतः, ।
पूज्यो नाग्न्यपरीषहस्य विजय, स्तत्त्वज्ञता[५]प्तोदयः ॥१९॥

१ आभरणं २ केशादीनांसंस्कारः । ३ लोचनादीनांशृंगारचेष्टा ।
४ वस्त्रं । ५ वस्तुस्वरूपपरिज्ञानजाताभिवृद्धिः ।

१९ आक्रोशपरीषहः

[१]वर्णी कर्णहृदां [२]विदारणकरान्, क्रूराशयैः प्रेरितान् ।
[३]आक्रोशान् [४]घनगर्जतर्जनखरान्, शृण्वन्नशृण्वन्निव ॥
शक्त्यात्युत्तम[५]संपदाऽपि सहितः शान्ताशयश्चिन्तयन् ।
यो [६]बाल्यं खलसंकुलस्य [७]शपनक्लेशक्षमी तं स्तुवे ॥२०॥

१ यतिः । २ भेदन । ३ शपनानि । ४ बहुले । ५ अत्युत्कृष्टसाम-
र्थ्यवत्या । ६ अज्ञानित्वं । ७ दुर्वचनं ।

### २० सत्कारपुरस्कारपरीषह:

ख्यातोऽहं तपसा श्रुतेन च पुरस्कारं प्रशंसां नतिं ।
भक्त्या मे न करोति कोऽपि यतिषु ज्येष्ठोऽहमेवेति य: ॥
ग्लानिं मानकृतां न याति स मुनिः सत्कारजातार्तिजिद् ।
दोषा मे न गुणा भवन्ति न गुणा दोषा:स्युरित्यन्यतः[१]॥२१॥

१ अन्यजनात् ।

### २१ याञ्चापरीषह:

प्राज्यं राज्यमुदस्य[१] शाश्वतपद-प्राप्त्यै तपोबृंहणे[२] ।
देहो हेतुरयं हि भुक्त्यनुगता, चास्य स्थितिस्तत्कृत: ॥
भिक्षार्थं भ्रमणं ह्रियः पदमिदं, यस्मान् महार्थास्पदं ।
नीचैर्वृत्तिरनिन्दितेति [३]विचरन् याञ्चाजयः स्यान् मुनिः॥२२॥

१ त्यक्त्वा । २ वृद्धौ । ३ चर्यांगच्छन् ।

### २२ निषद्यापरीषह:

[१]सर्वाशाशमहान्धकारपुञ्जाऽऽयामां [२]त्रियामां यमी ।
योगैर्योगमपत्यवार्यमहिमाऽऽभोगै[३]र्मुहूर्तं यथा ॥
क्षेत्रे स्त्रीजनपश्वबधरहिते, ह्यये निषद्यास्थित: ।
सन्नत्युग्रनिशाचराप्रतिहत-ध्यानो निषद्याजयी ॥२३॥

१ सर्वादिग्भक्षकतीव्रतमबहलदीर्घा । २ रात्रि । ३ अवार्य-महिम्ना आभोग: परिपूर्णतायेषां तैः ।

इति श्रीवीरनन्दिप्रणीतद्वाविंशतिपरीषहा: सम्पूर्णा: ।

## द्वाविंशतिपरीषहाः

क्षुधापरीषहः—भिक्षोः शुद्धाहारान्वेषिणः तदलाभे ईषल्लाभे च दुस्तरेयं वेदना महांश्च कालो दीर्घोहेति विषादमकुर्वतोऽकाले देशे च भिक्षामगृह्णतः आवश्यकहानिं मनागप्यनिच्छतः स्वाध्यायध्यानरतस्योदीर्णक्षुद्वेदनस्यापि लाभादलाभमधिकं मन्यमानस्य क्षुद्बाधाप्रत्ययचिन्तनं क्षुद्विजयः ॥१॥

पिपासापरीषहः—अतीवोत्पन्नपिपासां प्रति प्रतीकारमकुर्वतो भिक्षाकालेऽपीङ्गिताकारादिभिरपि योग्यमपि पानमप्रार्थयतो धैर्यप्रज्ञाबलेन पिपासासहनं ॥२॥

शीतपरीषहः—शैत्यहेतुसन्निधाने तत्प्रतीकारानभिलाषस्य देहे निर्ममस्य पूर्वानुभूतोष्णमस्मरतो विषादरहितस्य संयमपालनार्थं शीतक्षमा ॥३॥

उष्णपरीषहः—दाहप्रतीकाराकाङ्क्षारहितस्य शीतद्रव्यप्रार्थनानुस्मरणोपेतस्य चारित्ररक्षणमुष्णसहनं ॥४॥

दंशादिबाधापरीषहः—दंशमशकादिभिर्भक्षमाणस्याचलितचेतसः कर्मविपाकं स्मरतो निवृत्तप्रतीकारस्य शस्त्रघातादिपराङ्मुखस्य दंशादिबाधासहनं ॥५॥

नग्नतापरीषहः—स्त्रीरूपाणि नित्याशुचिबीभत्सकुणपभावेन पश्यतो यथाजातरूपमसंस्कृतविकारमभ्युपगतस्य वैराग्यमापन्नस्य नग्नमुत्तमं ॥६॥

अरतिपरीषहः—क्षुधाश्चद्युत्पन्नामरतिं निवार्य धृतिबलात् संयमरतिमावनस्य विषयसुखरतिं विषसमानं चिन्तयतो दृष्टश्रुतानुभूतरतिस्मरणकथाश्रवणरहितस्यारतिपरीषहजयस्तेनचक्षुरादीनां सर्वेषामरतिहेतुत्वात् पृथगरतिग्रहणमयुक्तं कदाचित् क्षुदाद्यभावेऽपि कर्मोदयात् संयमे अरतिरुपजायते ॥७॥

स्त्रीपरीषहः—स्त्रीदर्शनस्पर्शनालापाभिलापादिनिरुत्सुकस्य तदक्षिवक्त्रभ्रूविकारशृङ्गाराकाररूपगतिहासलीलाविजृम्भितपीनोन्नतस्तनजघनोरुमूलकक्षानाभिनिरीक्षणादिभिरावकृतचेतसस्त्यक्तवंशगीतादिश्रुतेः स्त्रीपरीषहजयः ॥८॥

चर्यापरीषहः—देवादिवन्दनाद्यर्थं गुरुणानुज्ञातगमनस्य संयमाविघातिमार्गेण गच्छतोऽटव्यादिषु सहायानपेक्षस्य शर्करादिभिर्जातखेदस्यापि पूर्वोचितयानादिकमस्मरतश्चर्यापरीषहजयः ॥९॥

निषद्यापरीषहः—श्मशानादिस्थितस्य सङ्कल्पितवीरासनाद्यन्यतमासनस्य प्रादुर्भूतोपसर्गस्यापि तत्प्रदेशादविचलतोऽकृतमंत्रविद्यादिप्रतीकारस्य अनुभूतमृद्वास्तरणादिकमस्मरतश्चित्तविकाररहितस्य निषद्यातितिक्षा ॥१०॥

शय्यापरीषहः—स्वाध्यायादिना खेदितस्य विषमादिशीतादिषु भूमिषु निद्रां मौहूर्तिकीमनुभवतः एकपार्श्वादिशायिनो जातबाधस्याप्यस्पन्दिनो व्यन्तरादिभिर्वित्रस्यमानस्यापि

त्यक्तपरिवर्तनपलायनस्य शार्दूलादिसहितोऽयं प्रदेशोऽचिरादतो निर्गमः श्रेयान् कदा रात्रिं विरमतीत्यकृतविषादस्य मृदुशयनमस्मरतः शयनादप्रच्यवतः शय्यासहनं ॥११॥

आक्रोशपरीषहः—परं भस्मासात् कर्तुं शक्तस्याप्यनिष्टवचनानि शृण्वतः परमार्थावहितचेतसः स्वकर्मणो दोषं प्रयच्छतोऽनिष्टवचनसहनमाक्रोशजयः ॥१२॥

वधपरीषहः—चौरादिभिः क्रुद्धैः शस्त्राग्न्यादिभिर्मार्यमाणस्याप्यनुत्पन्नवैरस्य मम पुराकृतकर्मफलमिदमिति इमे वराकाः किं कुर्वन्ति शरीरमिदं स्वयमेव विनश्वरं दुःखदमेतैर्हन्यते न ज्ञानादिकमिं इति भावयतो वधपरिषहक्षमा ॥१३॥

याचनापरीषहः—क्षुदध्वश्रमतपोरोगादिभिः प्रच्यावितवीर्यस्यापि शरीरसंदर्शनमात्रव्यापारस्य प्राणात्ययेप्याहारवसतिभेषजादीनभिधानमुखवैवर्ण्याङ्गसंज्ञादिभिरयाचमानस्य याचनसहनं ॥१४॥

अलाभपरीषहः—एकभोजनस्य मूर्तिमात्रदर्शनपरस्यैकत्र ग्रामे अलब्ध्वा ग्रामान्तरान्वेषणनिरुत्सुकस्य पाणिपुटपात्रस्य बहुदिवसेषु बहुषु च गृहेषु भिक्षामनवाप्यापि असंक्लिष्टचेतसो व्यपगतदातृविशेषपरीक्षस्य लाभादप्यलाभो मे परं तप इति सन्तुष्टस्य अलाभविजयः ॥१५॥

रोगपरीषहः—स्वशरीरमन्यशरीरमिव मन्यमानस्य शरीरयात्राप्रसिद्धये व्रणलेपवदाहारमाचरतो जल्लौषधाद्यनेक

तपोविशेषर्धियोगेऽपि शरीरनिस्पृहत्वात् व्याधिप्रतीकारानपेक्षिणः फलमिदमनेनोपायेनानृणी भवामीति चिन्तयतो रोगसहनं।१६।

तृणस्पर्शपरीषहः—तृणग्रहणमुपलक्षणं तेन शुष्कतृणपत्र-भूमिकण्टकफलकशिलादिषु प्रासुकेष्वसंस्कृतेषु व्याधिमार्गशीतादिजनितश्रमविनोदार्थं शय्यां निषद्यां वा भजमानस्य गमनमकुर्वतः शुष्कतृणपरुषशर्कराकण्टकनिशितमृत्तिकादिबाधितमूर्तेरुत्पन्नकण्डूविकारस्य दुःखं मनस्यचिन्तयतस्तृणस्पर्शसहनं ॥१७॥

मलपरीषहः—रविकिरणजनितप्रस्वेदलवसंलग्नपांसुनिचयस्य सिध्मकच्छूदद्रुभूतकायत्वादुत्पन्नायामपि कण्डूवां कण्डूयनमर्दनादिरहितस्य स्नानानुलेपनादिकमस्मरतः स्वमलापचये परमलोपचये चाप्रणिहितमनसो मलधारणं केशलुञ्चासंस्काराभ्यामुत्पन्नखेदसहनं मलसामान्यसहनेऽन्तर्भवतीति न पृथगुक्तं ॥१८॥

सत्कारपुरस्कारपरीषहः—

सत्कारः पूजाप्रशंसात्मकः पुरस्कारः क्रियारम्भादिष्वग्रतःकरणं चिरोषितब्रह्मचर्यस्य महातपस्विनः स्वपरसमयज्ञस्य हितोपदेशकथामार्गकुशलस्य बहुतस्वपरवादिविजयिनः प्रणामभक्तिसंभ्रमासनप्रदानादीनि न मे कश्चित् करोति वरं मिथ्यादृशः स्वसमयगतमज्ञमपि सर्वज्ञसम्भावनया सम्मान्य स्वसमयप्रभावनां कुर्वन्ति व्यन्तरादयः पुराऽत्युग्रतपसां प्रत्यग्रपूजां निर्वर्तयन्तीति यदि न मिथ्याश्रुतिस्तदा कस्मादस्माऽदृशां एते समयगता अनादरं कुर्वन्ति इति प्रणिधानरहितचित्तस्य

मानापमानयोस्तुल्यस्य सत्कारपुरस्कारपरीषहजयः ॥१९॥

प्रज्ञापरीषहः—अङ्गपूर्वप्रकीर्णकविशारदस्य अनुत्तरवादिनो मम पुरस्तादितरे भास्करप्रभाभिभूतोद्यतखद्योतवन्नितरामवभासन्ते इति ज्ञानमदनिरासः प्रज्ञापरीषहजयः ॥२०॥

अज्ञानपरीषहः—अज्ञोऽयं न किञ्चिदपि वेत्ति पशुसमः इत्याद्यधिक्षेपवचनं सहमानस्य सततमध्ययनरतस्य निवृत्तानिष्टमनोवाक्कायचेष्टस्य महोपवासाद्यनुष्ठायिनोऽद्यापि मे ज्ञानातिशयो नोत्पद्यते इत्यनभिसन्दधतो अज्ञानपरीषहजयः ॥२१॥

अदर्शनपरीषहः—दुष्करतपोऽनुष्ठायिनो वैराग्यभावनापरस्य ज्ञातसकलतत्त्वस्य चिरन्तनव्रतिनो अद्याऽपि मे ज्ञानातिशयो नोत्पद्यते महोपवासाद्यनुष्ठायिनां प्रातिहार्यविशेषाः प्रादुरभूवन्निति प्रलापमात्रमनर्थिकेयं प्रव्रज्या विफलं व्रतपालनमित्येवमचिन्तयन्तोदर्शनविशुद्धियोगाददर्शनपरीषहसहनम् ॥२२॥

इति द्वाविंशतिपरीषहाः

पण्डितपन्नालालसाहित्याचार्यकृत्

# धर्मकुसुमोद्यानम्

देवाङ्घ्रिपङ्कजयुगं हतपापपुञ्जम् ।
मञ्जुप्रभं निभृतभक्तिभरेण नत्वा ॥
अज्ञानगाढतमसा हृतनेत्रजालं ।
बालप्रबोधविषये निदधामि यत्नम् ॥१॥

धर्मस्य लक्षणम्

संसारसागरनिमग्नशरीरिवृन्द-।
मुद्धृत्य यो धरति मोक्षनिकेतनाग्रे ॥
सज्ज्ञानभानुविदिताखिलवस्तुतत्त्वैः
प्रोक्तो जिनैरखिलसौख्यकरः स धर्मः ॥२॥

धर्मस्य भेदाः

क्षान्ति मृदुत्वमृजुता शुचिता च सत्यम् ।
संशोभितो यमभरस्तपसां चयश्च ॥
त्यागोऽपरिग्रहभवो वरब्रह्मचारिता च ।
ज्ञेया इमे दशविधाः खलु धर्मभेदाः ॥३॥

अथ क्षमाधर्मः

कालुष्यस्य ह्यनुत्पत्तिः सत्यपि क्रोधकारणे ।
क्षमा जिनैर्जितक्रोध-दानवैर्गदिताऽऽगमे ॥४॥
क्षमते सर्वशत्रूणामपराधशतानि यः ।
सर्वत्र शं स लभते मानवो रिपुभञ्जनः ॥५॥
क्षमाचिन्तामणि नित्यं वर्तते यस्य सन्निधौ ।
त्रिलोक्यामपि किं तस्य दुर्लभं ब्रूहि वर्तते ॥६॥
यस्य पाणौ क्षमाखड्गः तीक्ष्णधारो हि विद्यते ।
किं कुर्युः तस्य सैन्यानि शत्रूणां समराङ्गणे ॥७॥
पुरुषः शर्मनित्यं यो निजचेतसि लिप्सति ।
कोपवैश्वानरज्वालां क्षमातोयैः स वारयेत् ॥८॥

क्षमावर्मपरीतोऽस्ति विग्रहो यस्य देहिनः ।
किं कुर्वन्ति शराः तस्य शत्रुसंघातमोचिताः ॥९॥
अवगाहनमात्रेण परमानन्दप्रदं शिवं ददती ।
भागीरथीव विमला कलिमलसंहारिणी क्षमा जयति ॥१०॥
अविरलजनसन्तापं दूरादेव क्षणेन वै जगताम् ।
ज्योत्स्नेव संहरन्ती क्षमा विजयते परं लोके ॥११॥
उन्नपलचपलतुरङ्गैर्मत्तगजेन्द्रैर्भटैर्युता सेना ।
नालं यं च विजेतुं क्षमा क्षणार्धेन तं जयति ॥१२॥
या भव्यजीवान् भुवि भावुकानां ।
सङ्गं सवित्रीव सदा ब्रवीति ॥
दुर्जेयजन्तून् क्षणतो विजेतु—
मही क्षमां तामहमर्चयामि ॥१३॥
ॐ ह्रीं उत्तमक्षमाधर्माङ्गाय नमः
इति क्षमाधर्मः
अथ मार्दवधर्मः

मृदोर्मर्त्यस्य यो भावो मार्दवः सोऽभिधीयते ।
मार्दवमन्तरामर्त्यो लभते नैव मङ्गलम् ॥१४॥
मार्दवोऽयमलङ्कारो वर्तते यस्य सन्निधौ ।
तस्य पुरुषरत्नस्य प्रवश्या मुक्तिमानिनी ॥१५॥
मार्दवमण्डिते मर्त्ये प्रसीदन्ति जगज्जनाः ।
विपुला कमला तेन जायते तस्य भूतले ॥१६॥

खरतरखरकर बिम्बोत्-तुलितसहस्रारचक्रचारेण ।
आयत्तीकृतसागर–वासो वसुधस्य चक्रिरत्नस्य ॥१७॥
यत्राखर्वो गर्वो जातः खर्वः कनिष्ठसोदर्यात् ।
तत्राऽन्येषां गर्वो न भवेत् खर्वःकिमत्र वै ब्रूहि ॥१८॥
विद्याविभवयुक्तोऽप्य–हङ्कारी जनतेश्वरः ।
दूरादेव जनैः त्याज्यो, मणियुक्तफणीन्द्रवत् ॥१९॥
मृदुतानौकानिचयो, नूनं यस्येह विद्यते पुंसः ।
तस्य भवः पाथोधिः, निस्तीर्णोऽपि च कियानस्ति ॥२०॥
मृदुतागुणपरिशोभित–चित्ते, प्रतिफलति भारती जैनी ।
दर्पणतल इव विपुले, मरीचिमाला दिनेशस्य ॥२१॥
मार्दवघनाघनोऽयं, मानदावाग्निप्रदीप्तभवकक्षम् ।
सत्प्रीतिवारिधारां मुञ्चन् निमिषेण सान्त्वयति ॥२२॥
सर्वत्र सद्भावविशोभमानं, मानच्युतौ जातमिहातिमानम् ।
तं मार्दवं मानवधर्ममार्य ! प्राप्यं प्रवन्दे शतधा प्रभक्त्या॥२३॥

ॐ ह्रीं उत्तममार्दवधर्माङ्गाय नमः
इति मार्दवधर्मः

अथ आर्जवधर्मः

ऋजो र्नरस्य यो भाव आर्जवः सोऽभिधीयते ।
आर्जवमन्तरा पुंसां न श्रेयः सन्निधिर्भवेत् ॥२४॥
कर्मबन्धाद् विभीतोऽसि, यदि तन्मुञ्च वक्रताम् ।
मनसो वक्रतैवेयं कर्मबन्धनकारणम् ॥२५॥

भवजलधेरावर्तो माया मोक्तुं समस्ति यदि ते धीः ।
आर्जवधर्मसुपोतं तर्हि अविलम्बं समालम्बय ॥२६॥

मायाविषधरीदष्ट–मूर्च्छिताऽखिलसंमृतौ ।
समुक्ता वीरवैद्येन, आर्जवोऽयं महौषधिः ॥२७॥

मायाशङ्कुसुपरिते–चेतसि पुंसः सरस्वती जैनी ।
पादक्षतेर्भियेव दधाति पादं न कुत्रचिल्लोके ॥२८॥

पन्नगवेष्टितवित्तं, यथा न लाभाय कल्पते पुंसां ।
मायाचारयुतस्य तथा, न विद्या धनं चापि ॥२९॥

मायापरिपत्पूरित चेतः, सङ्गं ह्यवाप्य धीः शुभ्रा ।
कालिन्दीजलतुलिता, मलिना निमिषेण संभवति ॥३०॥

अयमार्जवः सुधर्मः, कुरुते चेतःप्रसादमतिविमलं ।
तेन च कर्माभावः क्षणेन संजायते लोके ॥३१॥

अयमाश्रितस्तु येन, आर्जवधर्मो जिनेन्द्रचन्द्रोक्तः ।
तस्य न निबिडे कुटिले, भवकान्तारे परिभ्रमणम् ॥३२॥

मनोवचःकायकदम्बकानाम् ।
समानता यस्य समस्तलक्ष्म ॥
तमार्जवं सन्ततमर्जनीयम् ।
यतीन्द्रपूज्यं परिपूजयामः ॥३३॥

ॐ ह्रीं उत्तमार्जवधर्माङ्गाय नमः

इति आर्जवधर्मः

अथ शौचधर्मः

शुचे र्भावं शौचं निगदति तरां सूरिनिचयः ।
भवेल्लोभाभावे स च किल निजाधीनमनसाम् ॥
ऋते शौचात् पुंसां नहि नहि भवेन् मुक्ति वसतिः ।
ह्यजस्रं तत् दृष्ट्या कलयतु जगच्छौचसुगुणम् ॥३४॥
आशाख्यशाकिनीग्रस्ते, लोके दुर्ललिते सति ।
सन्तोषः परमं मन्त्रं शासितं जिनसूरिभिः ॥३५॥
सन्तोषमेकं परिहाय लोकाः, शैले वने व्योमनि भूमिगर्भे ।
अब्धौ रणे वन्हिचयेऽपि वाप्यां, प्राणाभिलाषा विरता भ्रमन्ति ।३६।
तृष्णा हि वल्लरी सैवा, त्रिलोकयाततपल्लवा ।
सन्तोषेण कुठारेण, छिन्द्यतां सुखलिप्सुभिः ॥३८॥
सन्तोषामृततुष्टाः, त्रिलोकराज्यं तृणाय मन्यन्ते ।
अपि भो ! कष्टसहस्रं, पतिता दुःखं लभन्ते न ॥३७॥
एकस्येह करस्थं, त्यक्तं वस्तु प्रवर्तते वाञ्छा ।
इतरो गगननिषण्णं वाञ्छति चन्द्रं स्ववसात् कर्तुं ॥३९।
अयमेव शौचधर्मः स्वात्मबलं संददाति लोकेभ्यः ।
यदखिलकार्यकलापे, निमित्तमाद्यं प्रभण्यते सद्भिः ॥४०।
चित्ते यस्य न वासः, शौचगुणास्याऽस्ति भूलोके ।
सकलमुखानुप्रेक्षी, दीनतरोऽसावितस्ततो भ्रमति ॥४१॥
चित्तं परमपुनीतं, सकलकलानां कुलालयं भवति ।
दूषितहृदयावसथात्, कला विलीना भवन्ति ता एव ॥४२।

कस्याऽपि यत्राऽस्ति न काचिदिच्छा ।
पवित्रधर्मसन्दिरमिन्द्रवन्द्यम् ॥
तं लोभलोपे किल जातमात्म्यम् ।
धर्मं सदा शौचमहं नमामि ॥४३॥
आत्मा नदी संयमपुण्यतीर्था ।
सत्योदका शीलतटा दयोर्मिः ॥
तत्राभिषेकं कुरु पाण्डुपुत्र ! ।
न वारिणा शुद्ध्यति चान्तरात्मा ॥

ॐ ह्रीं शौचधर्माङ्गाय नमः

इति शौचधर्मः

अथ सत्यधर्मः

असदभिधानत्यागः, सत्यं सञ्चक्ष्यते सुधीसङ्घैः ।
अयमेव सत्यवादो, निशङ्कं प्राणिनं कुरुते ॥४४॥
सत्येन नरो लोके, धवलां विमलामुपैति सत्कीर्तिम् ।
कीर्त्या च मुदितचित्तो, भवति निरन्तरं नूनम् ॥४५॥
सत्यादृते न कश्चिज्जगत्प्रसिद्धो वसुः क्षमापालः ।
अगमन्नरकागारं, हृथहो दुरन्तो मृषावादः ॥४६॥
यश्चैकं किल सत्यं पूर्णं सम्भाषते सदा लोकः ।
तेन हिंसादिपापात्, कृता निवृत्तिहृच नायासात् ॥४७॥
संसारसिन्धुतरणे, सत्यं पोतायते चिरं पुंसाम् ।
सत्येन विना लोका, ध्रुवं ब्रुडन्तीह भवसिन्धौ ॥४८॥

कथञ्चिदेतद्यदि सत्यतत्त्वं, भवेत् विलुप्तं जगतीतलाद् भो ?
तदा व्यवस्था व्यवहारहीनं, क्षणेन शीर्येत जगत्समस्तम् ॥४९॥

कायक्लेशकरैः किम्वा, तपोभिर्बहुभिः कृतैः ।
यदि सत्यलतान्तेन, न स्वान्त सुरभीकृतम् ॥५०॥

असत्याहिगरावेग,-मूर्च्छिते जनचेतसि ।
नालं सुखेन सद्भावाः, क्षणं स्थातुं भवन्ति हि ॥५१॥

सत्यहिमानीमण्डित, निखिलशरीरोऽपवाददावाग्नौ ।
लभते परमानन्दं, तदितरजनदुर्लभं लोके ॥५२॥

सत्येन मुक्तिः सत्येनः भुक्तिः स्वर्गोऽपि सत्येन पदप्रसक्तिः ।
सत्यात् परं नास्ति यतः सुतत्त्वं, सत्यं ततो नौमि सदा सभक्तिः ॥५३

ॐ ह्रीं उत्तमसत्यधर्माङ्गाय नमः

इति सत्यधर्मः ।

अथ संयमधर्मः ।

संयमो मनसोऽक्षाणां, भूरोः संयमनं मतः ।
प्राणीन्द्रियविभेदेन, स तु द्वेधा विभिद्यते ॥५४॥

भूजलानलवायूनां, तरूणां चरतां तथा ।
हिंसनाद्विरतिः प्राणि-संयमः षड्विधो मतः ॥५५॥

इन्द्रियाणां सचित्तानां विषयेष्वप्रवर्तनम् ।
इन्द्रियसंयमः प्रोक्तः षोढा कोविदसम्मतः ॥५६॥

द्वादशविधः स एवं, मुक्त्यै भणितः सुसंयमः सद्भिः ।
गतसंयमो जनोऽयं, चिरं विहिण्डति भवाटवीमध्ये ॥५७॥

विषयदानवमण्डलदण्डिते,   विविधदुःखचयं समुपाश्रिते ।
जगति दुर्ललिते सति संयमो, ह्युदभवत्किल राममहीपतिः ।५८।
संयमो मुनिजनानुरञ्जनः,   संयमो   भवरजःप्रभञ्जनः ।
संयमो निजहितस्य बोधकः, संयमो निखिलकर्मरोधकः ।५९।
संयमो यदि भवेत् न जगत्यां, प्राणिवर्गपरिरक्षणदक्षः ।
तन्निगोदनरकादिनिवासे, कः पतज्जनततिं प्रतिरुन्ध्यात् ।६०।
संयमसहिता यतयः, सुरनरपतिभिः सदा प्रणम्यन्ते ।
अपि च लभन्तेऽमुत्रामन्दानन्दस्य वै कन्दम् ।।६१।।
संयमिजनवरहृदये, दयास्रवन्ती ह्यनारतं वहति ।
अविरलकलरवनिचयं, कुर्वाणा प्रेमरसपूर्णा ।।६२।।

षट्कायजीवपरिपालनसम्प्रवीण- ।
मक्षप्रसारहरणेऽपि नदीष्णमेतम् ।।
तं संयमं सुरकदम्बकदुर्लभं वै ।
चित्ते दधामि सततं वरभक्तिभावात् ।।६३।।

ॐ ह्रीं संयमधर्माङ्गाय नमः

इति संयमधर्मः

अथ तपोधर्मः

इच्छानां विनिरोधस्तपः प्रगीतं महर्षिसंघातैः ।
बाह्याभ्यन्तरभेदात् द्वेधा तद्भिद्यते मुनिभिः ।।६४।।
षोढा षोढा विभिद्येते तपसी ते द्विधोदिते ।
उपवासादिभेदेन प्रायश्चित्तादिभेदतः ।।६५।।

इदं तपो: महत्तत्त्वं मुनिनाथानुमोदितम् ।
आत्मवल्कर्मसंघात-घातकं भवनाशनम् ॥६६॥

प्रचण्डवैश्वानरमध्यलीनं, यथा विशुद्धं भवतीह भर्म ।
तथा तपोदीप्तिचयप्रदीप्तः, स्वयं निजात्मा भवति प्रशुद्धः ॥६७॥

उत्कटमनोऽश्वरोधस्तप:खलीनेन जायते नियमात् ।
उन्मत्तेन्द्रियदमनं तपोऽन्तरा नैव जायते पुंसाम् ॥६८॥

त्रिदिवे त्रिदिवरमाभिः, रन्तुं साकं समस्ति यदि ते धीः ।
एकं तपसामुपचय-मुपचिनुहि निरन्तरं तद् भो ! ॥६९॥

मुक्तिरमावरसङ्गमे नोत्कं चेतो हि वर्तते यदि ते ।
तर्ह्यविलम्बं तपसां, सद्रूपं रत्नानि संचिनुहि ॥७०॥

तीव्रं तपःप्रभावं, दृष्ट्वा जैनेतरे जना सर्वे ।
जायन्ते जगतीह क्षणेन वै जैनत्वसम्पश्चाः ॥७१॥

प्रावृषि वज्राघातैर्गिरिशिखराणीव कर्मनिगडानि ।
पुंसां तपोभिरत्र क्षणेन चूर्णानि जायन्ते ॥७२॥

इच्छानिरोधः खलु यस्य लक्ष्म । सर्वत्र संव्यापकमस्ति तस्य ॥
ध्यानादिभिन्नस्य हतभ्रमस्य । मदा हृदाऽहं तपसः स्मरामि ॥७३॥

ॐ ह्रीं तपोधर्माङ्गाय नमः

इति तपोधर्मः

अथ त्यागधर्मः ।

सद्भाजनेषु भक्त्या, योग्यपदार्थप्रदानमिह यत् सः ।
त्यागो भणितो मुनिभिः, निजपरकल्याणकन्दाय ॥७४॥

आहाराभयबोधौषधिप्रभेदैः हि भिद्यते स पुनः ।
त्यागश्चतुःप्रकारः श्रेयःसम्पत्तिसंहेतुः ॥७५॥

चतुर्विधाहारो यत्तपस्विनिचयाय दीयते भक्त्या ।
आहारत्यागोऽसौ यतिपतिभिः शस्यते बहुशः ॥७६॥

प्रवचनपरप्रसारैः बहूपकारं करोति किल लोके ।
एकः प्रवीणभिक्षुः, निजयोग्याहारमादाय ॥७७॥

विषवेदनरक्षय–शस्त्रग्रहणसंक्लेशभावेन । !
नश्यद्प्राणिदुःखाऽभयदानमिहोच्यते मुनिभिः ॥७८॥

काञ्चनगिरिसमकाञ्चन-दानसंजनितसुपुण्यमानं हि ।
एकप्राणिसुरक्षा-जनितसुकृतमानतो हीनं ॥७९॥

सूर्यांमुखदुर्भेद्य-ध्वान्तविलोचनजगज्जनानाञ्च ।
सद्बोधदिव्यभानु-प्रकाशदानं तृतीयं स्यात् ॥८०॥

अपि भो ! जगतां देहि ज्ञानमनन्तं निरन्तरं सद्यः
ज्ञानमिदमेकमेव भवसागरतरणसंतरणिः ॥८१॥

श्वासादिवेदनाचय-दुःखितवपुषां निरन्तरं पुंसां ।
योग्यचिकित्सादानं-चौषधदानं प्रचक्षते सद्भिः ॥८२॥

हंहो गुणधर ! जलधर ! ह्यन्यन्यशरणं विहाय सारङ्गम् !
वर्षसि भूधरशिखरे, पयोधिपूरे च किं नित्यं ॥८३॥

किमिति कठोरं गर्जसि, सलिलस्य शीकरं नैव ।
मा मा वर्षाऽम्भोधर ! त्यजतु कठोरं तु गर्जनं सद्यः ॥८४॥

तृष्णादानवपीडित-विपद्यमानं नरं पुरो दृष्ट्वा ।
जलधे ! चपलतरङ्गैः विनर्तमानो न लज्जसे कस्मात् ॥८५॥
हंहो मलयज ! मूले, सदा निषण्णान् भुजङ्गमान् वारय ।
येन तव सुरभिसारं, भोक्तुं शक्नोति जगदेतत् ॥८६॥
मा कुरु मा कुरु शोकं, रत्नसमूहव्यये च हे रोहण ! ।
झगिति पयोधररावो दास्यति रत्नानि ते बहुशः ॥८७॥
रे खर्जूरानोकुह ! किमेवमुत्तुङ्गमानमुद्वहसि ।
छायापि ते न शोभ्या पान्थानां किं करोषि ॥८८॥

त्यागं विना नैव भवेच्च मुक्तिः ।
त्यागादृते नास्ति हितस्य पन्थाः ॥
त्यागो हि लोकोत्तरमस्ति तत्त्वं ।
यस्मात्ततोऽहं किल तं नमामि ॥८९॥

ॐ ह्रीं त्यागधर्माङ्गाय नमः

इति त्यागधर्मः

अथ आकिञ्चन्यधर्मः

यस्य किञ्चन नास्तीहाऽकिञ्चनः स जनो मतः ।
तस्य भावो भवेन्नून-माकिञ्चन्यं मुनिप्रियं ॥९०॥
परिग्रहोऽयं द्विविधः समुक्तः । बाह्यस्तथाभ्यन्तरसङ्गतश्च ॥
बाह्यस्य मोक्षेण न तत्र लाभो । बाह्येतरं तेन विमुञ्च पूर्वम् ॥९१॥
परिग्रहग्राहनिपीडितो जनः, क्वचिज्जगत्यां लभते न मङ्गलम् ।
अतो महामङ्गलसङ्गलिप्सुभिः, विहायतामेष परिग्रहो ग्रहः ॥९२॥

यथा पलं व्योमचरैं विहायसि ।
पयश्चरै र्वारिणि भूमिगोचरैः ॥
भुवीह नित्यं परिभुज्यते तथा ।
सदा धनी सर्वजनैश्च सर्वतः ॥९३॥

भवेत् तवेच्छा यदि मुक्तिकामिनी ।
मुखाब्जपानाथमिहैव वीक्षितुम् ।
विमुञ्चतां तर्हि सुमूर्छिकां प्रियां ।
यतोऽन्यसूया सहिताः प्रिया भवेत् ॥९४॥

अकिञ्चनत्वोपयुताः तपस्विनः, सुतोषपीयूषपयोधिपूरगाः ।
वने गृहे शैलचये सरित्पतौ, सदाऽऽनुवन्त्येव निजात्मजं सुखं ।
सहस्रमध्येसमुदारघोषणामिमां समक्षं प्रतिपक्षिणां ब्रूवे ।
परिग्रहो नैव जनस्य चेद् भवेत्, तर्ह्ययं दुःखलवं लभते न हि ।९६।
यथा प्रवातोज्झितमध्यभूमौ, मध्याह्नकाले तरवः समस्ताः ।
निजस्वरूपे ह्यचला भवन्ति, तथा जनाः सङ्गसमूहहीनाः ।९७।
इतिस्थिते पण्डितमानिनो नराः परिग्रहे चाऽपि सुखं दिशन्ति ये
कथं न ते नाम विषेण मज्जतं, वदन्ति दुग्धं बहुजीवि कारणम् ।
आत्मानमेतं परितः प्रभावात्, गृह्णाति यस्माद्धि परिग्रहोऽयम् ।
तस्मादरं तं परिमुच्य पूर्ण-मकिञ्चनत्वं मनसा स्मरामः ॥९९॥

ॐ ह्रीं आकिञ्चन्यधर्माङ्गाय नमः

इति आकिञ्चन्यधर्मः

### अथ ब्रह्मचर्यधर्मः

दूरादेव समुज्झित्वा नारीं नरकपद्धतिम् ।
ब्रह्मणि चर्यते यत्तद् ब्रह्मचर्यं समुच्यते ॥१००॥

नारीमात्रपरित्यागी निखिलब्रह्मचर्यवान् ।
स्वस्त्रीसन्तोषमापन्नो, देशतो ब्रह्मचर्यवान् ॥१०१॥

मुक्तिस्त्रीप्रीतिसम्प्राप्त्यै, मनीषा यदि वर्तते ।
तर्हि त्यज झगित्येव, नारीं व्रतविदूषिकाम् ॥१०२॥

ब्रह्मचर्यस्य सम्प्राप्त्यै भामिनीमभिधानतः ।
चेतसो गतिमारुध्य, स्वात्मध्यानपरो भव ॥१०३॥

दुःशीलजनसंसर्गं कापथस्य प्रवर्तकम् ।
त्यज ब्रह्मव्रतप्राप्त्यै अहिसङ्गमिव द्रुतम् ॥१०४॥

चित्तं संक्षुभ्य षण्ढं ह्यनुनयनिपुणं प्रेषितं मानिनीषु ।
कष्टं भो तत्तु तत्रानवरतमखिलास्वेव सक्तं समासीत् ॥
हं हो प्रज्ञापतीनां प्रवर ! तव मतेः पाणिने ! विभ्रमः कः
येन त्वं मर्त्यरूपे मनसि दिशसि हा संततं षण्ढभावं ।१०५।

त्यक्त्वैकं ब्रह्मचर्यं, जगति खलु जनाः राजयक्ष्मादिबाधां ।
क्षोणीपालैः प्रदत्तां कठिनतरमहादण्डनं लोकनिन्दाम् ॥
मत्वा श्वभ्रालयेषु ज्वलनवितपनं क्षारपानीयसेकम् ।
शाल्मल्यारोहणं वा बहुविधविपुलं दुःखमेवाप्नुवन्ति ।१०६।

चिरवर्धितोऽपि संयम-विटपी ब्रह्मव्रतं विना पुंसाम् ।
स्वर्गामृतफलनिचयं, फलति न कालत्रये त्रिलोकेऽपि ।१०७।
पलपूतिरुधिररचिते, योषिद्गात्रे विमुच्य ये प्रीतिम् ।
आत्मनि निजे रमन्ते, त एव धन्याः महामान्याः ॥१०८॥

ये ब्रह्मचर्येण युता भवन्ति ।
भवन्ति ते नागनरेन्द्रमान्याः ॥
योगीन्द्रवन्द्यं सरणिं शिवस्य ।
नमामि तद् धर्मधरापतिं तम् ॥१०९॥

ॐ ह्रीं ब्रह्मचर्यधर्माङ्गाय नमः

इति ब्रह्मचर्य धर्मः

इति धर्मकुसुमोद्यानम्

## गृहवासनिन्दा

क्वचन भजति धर्मं क्वाप्यधर्मं दुरन्तम् ।
क्वचिदुभयमनेकं शुद्धबोधोऽपि गेही ॥
कथमिति गृहवासः शुद्धिकारी मलाना-।
मिति विमलमनस्कैस्त्यज्यते स त्रिधाऽपि ॥१॥
सर्वं धर्ममयं क्वचित् क्वचिदपि प्रायेण पापात्मकम् ।
क्वाप्येतद् द्वयवत् करोति चरितं प्रज्ञाधनानामपि ॥
तस्मादेव तदन्धरज्जुवलनं स्नानं गजस्याऽथवा ।
मत्तोन्मत्तविचेष्टितं न हि हितो गेहाश्रमः सर्वथा ॥२॥

निरन्तरार्तानलदाहदुर्गमे । कुवासनाध्वान्तविलुप्तलोचने ।।
अनेकचिंताज्वरजिह्मितात्मनाम् । नृणां गृहे नात्महितं प्रसिध्यति।।३
प्रतिक्षणं द्वन्द्वशतार्तचेतसां । नृणां दुराशाग्रहपीडितात्मनाम् ।
नितम्बिनीलोचनचौरसङ्कटे । गृहाश्रमे नात्महितं प्रसिध्यति।।४।।

नप्रमादजयंकर्तुं धीधनैरपि पार्यते ।
महाव्यसनसङ्कीर्णे गृहवासेऽतिनिन्दिते ।।५।।
शक्यते न वशीकर्तुं गृहिभि श्चपलं मनः ।
अतश्चित्तप्रशान्त्यर्थं सद्भिस्त्यक्ता गृहस्थितिः ।।६।।
दह्यमाने जगत्यस्मिन् महता मोहवह्निना ।
प्रमादमदमुत्सृज्य निष्क्रांता योगिनः परम् ।।७।।

पण्डितपन्नालालसाहित्याचार्यरचितम्

## महावीरस्तवनम्

वसन्ततिलका छन्दः

हे वीर ! हे गुणनिधे ! त्रिशलातनूज ! ।
मज्जन्तमत्र भववारिनिधौ दयालो ! ।।
दत्त्वावलम्बनमतः कुरु मां विदूरम् ।
मुक्त्वा भवन्तमिह कं शरणं व्रजानि ।।१।।
पापप्रचण्डवनवह्निशमे नदीष्णम् ।
सन्चातकावलितृषापरिहारदक्षम् ।।
सन्मानसस्य परिशुद्धिकरं समन्तात् ।
तं वीरवारिदमहं विनमामि सम्यक् ।।२।।

आनन्दमन्दिरममन्दमनिन्द्यमाद्यम् ।
वन्दारुवृन्दपरिवन्द्यपदारविन्दम् ॥
कुन्दातिसुन्दरयशोविजितेन्दु बिम्बम् ।
वन्दे मुदा जिनपतिं वरवीरनाथम् ॥३॥
गन्धर्वगीतगुणगौरवगीयमानम् ।
सबोधदिव्यमहसा महता सुयुक्तम् ॥
वन्दे जिनं जितभवं खलु वर्धमानम् ।
संवर्धमानमहिमानमुदारमोदात् ॥४॥
नीहारहारहरहासमहासकाश— ।
संकाशकीर्तिमतिवीरमुदारबोधम् ॥
देवेन्द्रवृन्दपरिवन्दितपादपद्मम् ।
वन्दे विभुं जिनपतिं त्रिशलातनूजम् ॥५॥

शार्दूलविक्रीडितछन्दः

यद्गर्भस्थ महोत्सवे सुरवरैराकाशसंपातितैः ।
नानावर्णधरैर्विचित्रमणिभिः संछादितं भूतलम् ॥
शुम्भद्रूपधरैस्तदीयसुगुणै रेजे यथा लाञ्छितम् ।
स श्रीवीरवरो वितुन्नहृदयः पायात् सदा नः प्रभुः ॥६॥
प्रोत्तुङ्गे गिरिराजरम्यशिखरे क्षीरोदधेराहृतैः ।
चञ्चच्चन्द्रकलाकलापतुलितैरम्भोभिरानन्दिताः ॥
जातं यं परिमङ्गलाः सुरवराः संसिक्तवन्तः स्वयम् ।
स श्रीवीरवरो वितुन्नहृदयः पायात्सदा नः प्रभुः ॥७॥
मो नित्यं जगतीतले किमपि हा हा विद्यते कुत्रचित् ।

सर्वं कालकरालकण्ठकलितं सर्वत्र संदृश्यते ।
इत्थं भोगशरीरशून्यहृदयो यः काननेष्वातपत् ।
स श्रीवीरवरो वितुङ्गहृदयः पायात्सदा नः प्रभुः ॥८॥
यस्य ज्ञानदिवाकरेण दलितं संतामसं संततम् ।
नो लेभे वसुधातले क्वचिदपि स्थानं भ्रमत्सन्ततम् ।
लोकालोक पदार्थं बोधनकरः सद्देशनातत्परः ।
स श्रीवीरवरो वितुङ्गहृदयः पायात्सदा नः प्रभुः ॥९॥
ध्यानासिप्रहताखिलारिनिचयः स्वाधीनतां प्राप्नुवन् ।
स्वच्छाकाशनिकाशचेतनगुणं चासाद्य यः स्वात्मना ।
लेभेऽनन्तमनश्वरं सुखवरं स्वात्मोद्भवं स्वात्मनि ॥
स श्रीवीरवरो वितुङ्गहृदयः पायात्सदा नः प्रभुः ॥१०॥

मालिनीछन्दः

उदधिरिव गभीरः पापधूलीसमीरः ।
सकलमनुजहीरः कर्मशत्रुप्रवीरः ॥
विपदि परमधीरः प्राप्तजन्माब्धितीरः ।
जयति जयति वीरस्तीर्णदुःखौघनीरः ॥११॥
निखिलगुणनिधानं सर्वलोकप्रधानम् ।
विहृतविधिवितानं संगतं सन्निधानम् ॥
विहितहितवितानं ख्यातसत्कीर्तिमानम् ।
जगति सुगुणधानं वीरमीडेऽघहानम् ॥१२॥
दुरिततरुकुठारः पुण्यपुञ्जप्रहारः ।
शिवनगरविहारः शुद्धतत्त्वैकसारः ॥

अधिगतगुणसारः कीर्णसत्कीर्तिभारो ।
जयति जयति सारो वीरनाथोऽस्तमारः ॥१३॥

विनिहतभवजालः प्राप्तसत्कीर्तिमालः ।
शशिसमशुचिभालः कर्मवृन्दैककालः ॥
हतमनसिजचालः साधुसंदोहपालो ।
जयति विजितकालो वीरनाथो नृपालः ॥१४॥

निखिलगुणसुपूरः कर्मपाशैकदूरो ।
भवतिमिरसूरः पापसैन्यैकशूरः ।
जयति जनसुवन्द्यः साधुसङ्घैकवन्द्यः ।
चरमजिनवरेन्द्रः पादनम्रामरेन्द्रः ॥१५॥

भुजङ्गप्रयातं छन्दः

अगाधे भवाब्धौ पतन्तं जनं यः ।
समुद्दिश्य तत्त्वं सुखाढ्यं चकार ॥
दयाब्धिः सुखाब्धिः सदा सौख्यरूपः ।
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥१६॥

विदग्धोऽपि लोकः कृतो येन मुग्धः ।
स कामः प्रकामं रतञ्चात्मतत्त्वे ॥
न शक्तो बभूव प्रजेतुं मनाग् यम् ।
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥१७॥

यदीयं प्रवीर्यं हि बाल्येऽपि देवो ।
धृताहीन्द्ररूपो न किञ्चिद् विवेद ॥
प्रमोदस्वरूपस्त्रिलोकी प्रभूपः ।
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥१८॥

जगज्जीवघातीनि घातीनि कृत्वा ।
हतान्येव लेभे परं ज्ञानतत्त्वम् ॥
अलोकं च लोकं व्यलोकीदृशो यः ।
स वीरः प्रवीरः प्रमोद प्रदद्यात् ॥१९॥

सशिष्यः स विप्रो गुरुर्गौतमो यम् ।
समासीनमाराद् विलोक्यैव नूनम् ॥
मदं भूरिमानं मुमोच स्वकीयम् ।
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥२०॥

सुरेन्द्रानुगेनालकानायकेनाऽऽ ।
कृतास्थानभूमिं समास्थाय दिव्यैः ॥
वचोभिर्य ईशो दिदेशार्थसार्थम् ।
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥२१॥

विहृत्यार्यखण्डे सुधर्मामृतस्य ।
प्रवृष्ट्या समस्तान् जगज्जीवसस्यान् ॥
प्रवृद्धान् चकाराभ्ररूपोऽधिपो यः ।
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥२२॥

अनेकान्तदण्डैः प्रचण्डैरखण्डैः ।
समुद्दण्डवादिप्रवेतण्डगण्डान् ॥
बिभेदाशु यश्च प्रकृष्टप्रमाणः ॥
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥२३॥

ततो ध्यानरूपं निशातं विसातम् ।
कृपाणं स्वपाणौ य आदाय सद्यः ॥

अघातीनि हत्वा बभूव प्रमुक्तः ।
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥२४॥

अथामन्दमानन्दमाद्यन्तहीनम् ।
निजात्मप्रजातं ह्यनर्घं समक्षम् ॥
चिरं यश्च भेजे निजे नैजरूपम् ।
स वीरः प्रवीरः प्रमोदं प्रदद्यात् ॥२५॥

इति महावीरस्तवनम्

## साम्यप्रकरणम्

मोहवह्निमपाकर्तुं स्वीकर्तुं संयमश्रियम् ।
छेत्तुं रागद्रुमोद्यानं समत्वमवलम्ब्यताम् ॥१॥

साम्यसाधनमाह

चिदचिल्लक्षणै भावैरिष्टानिष्टतया स्थितैः ।
न मुह्यति मनो यस्य तस्य साम्ये स्थितिर्भवेत् ॥२॥

तनुत्रयविनिर्मुक्तं दोषत्रयविवर्जितम् ।
यदा वेत्त्यात्मनात्मानं तदा साम्ये स्थितिर्भवेत् ॥३॥

मोहपङ्के परिक्षीणे शीर्णे रागादिबन्धने ।
नृणां हृदि पदं धत्ते साम्यश्रीर्विश्ववन्दिता ॥४॥

सौधोत्सङ्गे श्मशाने स्तुतिशपनविधौ कर्दमे कुङ्कुमे वा ।
पल्यङ्के कण्टकाग्रे दृषदि शशिमणौ चर्मचीनांशुकेषु ॥
शीर्णाङ्गे दिव्यनार्यामसमशमवशाद् यस्य चित्तं विकल्पैः ।
नालीढं सोऽयमेकः कलयति कुशलः साम्यलीलाविलासम् ॥५॥

एकः पूजां रचयति नरः पारिजातप्रसूनैः ।
क्रुद्धः कण्ठे क्षिपति भुजगं हन्तुकामस्ततोऽन्यः ॥
तुल्या वृत्तिर्भवति च तयोर्यस्य नित्यं स योगी ।
साम्यारामं विशति परमज्ञानदत्तावकाशम् ॥६॥

रागादिविपिनं भीमं मोहशार्दूलपालितम् ।
दग्धं मुनिमहावीरैः साम्यधूमध्वजार्चिषा ॥७॥

यः स्वभावोत्थितां साध्वीं विशुद्धिं स्वस्य वाञ्छति ।
स धारयति पुण्यात्मा समत्वाधिष्ठितं मनः ॥८॥

साम्यकोटिं समारूढो यमी जयति कर्म यत् ।
निमेषान्तेन तज्जन्म कोटिभिस्तपसेतरः ॥९॥

शाम्यन्ति जन्तवः क्रूरा बद्धवैराः परस्परम् ।
अपि स्वार्थप्रवृत्तस्य मुनेः साम्यप्रभावतः ॥ १०॥

भजन्ति जन्तवो मैत्र्यमन्योऽन्यं त्यक्तमत्सराः ।
समत्वालम्बिनां प्राप्य पादपद्मार्चितां क्षितिम् ॥११॥

चलत्यचलमालेयं कदाचिद् दैवदोषतः ।
नोपसर्गैरपि स्वान्तं मुनेः साम्यप्रतिष्ठितम् ॥१२॥

उन्मत्तमथ विभ्रान्तं दिग्मूढं सुप्तमेव वा ।
साम्यस्थस्य जगत्सर्वं योगिनः प्रतिभासते ॥१३॥

साम्यमेव परं ध्यानं प्रणीतं विश्वदर्शिभिः ।
तस्यैव व्यक्तये नूनं मन्येऽयं शास्त्रविस्तरः ॥१४॥

वाचस्पतिरपि ब्रूते यद्यजस्रं समाहितः ।
वक्तुं तथाऽपि शक्नोति न हि साम्यस्य वैभवम् ॥१५॥

इति साम्यप्रकरणम्

## सल्लेखनाप्रकरणम्

तरुदलमिव परिपक्वं स्नेहविहीनं प्रदीपमिव देहम् ।
स्वयमेव विनाशोन्मुखमवबुध्य करोतु विधिमन्त्यम् ॥१॥

गहनं न शरीरस्य हि विसर्जनं किं तु गहनमिह वृत्तम् ।
तत्र स्थास्नु विनाश्यं न नश्वरं शोच्यमिदमाहुः ॥२॥

प्रतिदिवसं विजहद्बलमुज्झद्भुक्तिं त्यजत्प्रतीकारम् ।
वपुरेव नृणां निगिरति चरमचरित्रोदयं समयम् ॥३॥

सविश्वा याऽप्रकृतिरिव जनिताऽखिलकायकम्पनातङ्का ।
यमदूतीव जरा यदि समागता जीवितेषु कस्तर्षः ॥४॥

कर्णान्तकेशपाश ग्रहणविधेर्बोधितोऽपि यदि जरया ।
स्वस्य हितैषी न भवति तं किं मृत्युर्न संग्रसते ॥५॥

उपवासादिभिरङ्गे कषायदोषे च बोधिभावनया ।
कृतसल्लेखनकर्मा प्रायाय यतेत गणमध्ये ॥६॥

यमनियमस्वाध्यायास्तपांसि देवार्चनाविधिर्दानम् ।
एतत्सर्वं निष्फलमवसाने चेन्मनो मलिनम् ॥७॥

द्वादशवर्षाणि नृपः शिक्षितशस्त्रो रणेषु यदि मुह्येत् ।
किं स्यात्तस्यास्त्रविधेर्यथा तथान्ते यतेः पुराचरितम् ॥८॥

स्नेहं विहाय बन्धुषु मोहं विभवेषु कलुषतामहिते ।
गणिनि च निवेद्य निखिलं दुरीहितं तदनु भजतु विधिमुचितम् ॥९

अशनं क्रमेण हेयं स्निग्धं पानं ततः खरं चैव ।
तदनु च सर्वं निवृत्तिं कुर्याद् गुरुपञ्चकस्मृतौ निरतः ॥१०॥

कदलिघातवदायुषि कृतिनां सकृदेव विरतिमुपयाति ।
तत्र पुनर्नैष विधिर्यद् दैवे क्रमविधिर्नास्ति ॥११॥

सुरौ प्रवचनकुशले साधुजने यत्नकर्मणि प्रवणे ।
चिरो च समाधिरते किमिहासध्यं यतेरस्ति ॥१२॥
जीवितमरणाशंसे सुहृदनुरागः सुखानुबन्धविधिः ।
एते सनिदाना स्युः सल्लेखनहानये पञ्च ॥१३॥
शिक्षयेच्चेति तं सेयमन्त्या सल्लेखनाऽऽर्य ! ते ।
अतीचारपिशाचेभ्यो रक्षैनामतिदुर्लभाम् ॥१४॥
प्रतिपन्नो सज्जन्नस्यां मा शंस स्थास्नु जीवितम् ।
भ्रान्त्या रम्यं बहिर्वस्तु हास्यः को नाऽऽयुराशिषः ॥१५॥
परीषहभयादाशु, मरणे मा मतिं कृथाः ।
दुःखं सोढा निहन्त्यंहो ब्रह्म हन्ति मुमूर्षुकः ॥१६॥
सहपांसुक्रीडितेन स्वं सख्या माऽनुरञ्जय ।
ईदृशैं बहुशो भुक्तै र्मोहदुर्ललितैरलम् ॥१७॥
मा समन्वाहरप्रीति-विशेषे कुत्रचित् स्मृतिम् ।
वासितोऽक्षसुखैरेव बंभ्रमीति भवे भवी ॥१८॥
मा काङ्क्षीर्भाविभोगादीन् रोगादीनिव दुःखदान् ।
वृणीते कालकूटं हि कः प्रसाद्येष्टदेवताम् ॥१९॥

आराध्य रत्नत्रयमित्थमर्थी ।
समर्पितात्मा गणिने यथावत् ॥
समाधिभावेन कृतात्मकार्यः ।
कृती जगन्मान्यपदप्रभुः स्यात् ॥२०॥

इति सल्लेखनाप्रकरणम्